CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

026

श्रीगोकर्णमाहात्म्यम्

Script: Devanagari Meterial: Paper

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

026

श्रीगोकर्णमाहात्म्यम्

Script: Devanagari Meterial: P

CSU-Sringeri Campus R

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

11

॥ अथ श्रीगोकर्णमहात्म्यप्रारंभः ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

श्रीगणेशायनमः ॥ श्रीसरस्वत्यैनमः ॥ निर्विघ्नमस्तु ॥ ॐम् ॥ वंदेविघ्नेश्वरंदेवंसर्वविघ्नाधिदैवतम् ॥
अंतरायनिवृत्त्यर्थंतंनमामिगजाननम् ॥ १ ॥ कुरूणामन्वयेजातोराजापरमधार्मिकः ॥ शौनकाद्यै
र्मुनिवरैःकृतसत्प्रश्नसत्कथः ॥ २ ॥ ऋषिभिःसहितश्चापिशतानीकोमहामतिः ॥ आस्तेकृताभिषे
कोऽथसन्यासायकृतक्षणः ॥ ३॥ अथाजगामधर्मात्माव्यासशिष्योमहामतिः ॥ तीर्थयात्रांपरिचरन्सू
तःपौराणिकोऽर्थवित् ॥ ४॥ उग्रश्रवाःशतानीकंजयाशीर्भिरवर्धयत् ॥ अभिवाद्यमुनीन्सर्वाञ्छौन
कादीन्तपोधनान् ॥ ५ ॥ पप्रच्छकुशलंसर्वंतपःस्वाध्यायकर्मसु ॥ ततःसराजाधर्मात्मायुधिष्ठिरकु
लोद्भवः ॥ ६ ॥ सूतमाहमहाप्राज्ञमास्यतामितिसादरम् ॥ आसनंकल्पयामासशौनकस्यमतेतदा
॥ ७ ॥ अनुज्ञांप्राप्यसूतस्तुमुनीनांभावितात्मनाम् ॥ उपविष्टःसभामध्येकृतातिथ्योमहामतिः ॥८ ॥
विश्रांतोऽभूच्चिरंतस्यांसभायांसूतनंदनः॥ ततोऽब्रवीदिदंसूतंशौनकोमुनिसंसदि ॥९॥ शौनकउवाच ॥
कुतआगम्यतेवत्सइदानींसूतनंदन ॥ क्वगतोहिभवान्पूर्वंकिमुद्दिश्यप्रयोजनम् ॥ १० ॥ सूतउवा

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

 च ॥ तीर्थयात्रांगतोब्रह्मन्निःपरीत्यधरामिमाम् ॥ भवंतंद्रष्टुमायातःशतानीकंचपार्थिवम् ॥ ११ ॥
गोकर्णेसुचिरंकालमुषित्वानियतेंद्रियः ॥ समागतोऽस्मिब्रह्मर्षेकिंकरोमिप्रशाधिमाम् ॥१२ ॥ शौन
 कउवाच ॥ तीर्थस्नानेचदानेचयत्फलंब्रूहिसांप्रतम् ॥ उपवासेजपेहोमेदेवार्चास्वपियत्फलम् ॥ १३ ॥
तीर्थानामपिचोत्पत्तिंपुण्यापुण्यफलंचयत् ॥ तत्सर्वंकथयास्माकंपरंकौतूहलंहिनः ॥ १४ ॥ अती
तानागतेचोभेसांप्रतंयच्चवर्तते ॥ तत्सर्वंविदितंसूततीर्थानांसंभवस्त्वया ॥ १५ ॥ इत्युक्तेमुनिनारा
जाशतानीकोमहाद्युतिः ॥ पप्रच्छेदंसभामध्येसूतंवैरोमहर्षणिम् ॥ १६ ॥ शतानीकउवाच ॥ गोक
र्णादागतमितिश्रुतंतेवदतोऽनघ ॥ कस्मिन्देशेसगोकर्णस्तीर्थराजःप्रशस्यते ॥ १७॥ तत्रवासःकिम
र्थंचत्वयावैसूतनंदन ॥ केचविप्रास्त्वयासार्धंगोकर्णेह्यवसंस्तदा ॥ १८ ॥ ब्रह्मशेषेणवैसूतयस्माद
द्यागतोसिहि ॥ ततःक्रमेणचब्रूहितीर्थानिवदतांवर ॥१९॥ सूतउवाच ॥ श्रूयतांकुरुशार्दूलसहैभि
र्मुनिपुंगवैः ॥ व्यासप्रसादाद्वक्ष्यामिसर्वंप्रत्यक्षदर्शिवत् ॥ २० ॥ सिद्धिक्षेत्राणित्रीण्याहूरहस्यानि

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

सुरैरपि ॥ अहंतेवर्णयिष्यामितानिराजान्निबोधमे ॥ २१ ॥ शालग्रामंपुष्करंचगोकर्णंचनराधिप ॥
सत्वंरजस्तमश्चैवगुणाःसंकीर्तितास्त्रयः ॥ २२ ॥ विष्णुर्ब्रह्माचरुद्रश्चगुणानामाधिदेवताः ॥ ऋग्वेद
श्चयजुर्वेदःसामवेदस्तथैवच ॥ २३ ॥ त्रिधाभूतंजगत्सर्वआदौसंपरिवर्तते ॥ सिद्धिक्षेत्राणिराजेंद्र
त्रीणितानिनिबोधमे ॥ २४ ॥ ब्राह्मंचवैष्णवंचैवशैवंचैवनराधिप ॥ अष्टादशपुराणानिसिद्धिद्वारा
णिपार्थिव ॥ ॥ २५ ॥ तानितेसंप्रवक्ष्यामिशृणुष्वैकमनाभव ॥ आद्यंसर्वपुराणानांपुराणंब्राह्ममु
च्यते ॥ २६ ॥ पाद्मंचवैष्णवंचैवशैवंभागवतंतथा ॥ तथान्यंनारदीयंचमार्कंडेयंचसप्तमम् ॥ २७ ॥
आग्नेयमष्टमंचैवभाविष्यंनवमंस्मृतम् ॥ दशमंब्रह्मवैवर्तंलैंग्यमेकादशंतथा ॥ २८ ॥ वाराहंद्वादशं
चैवस्कांदंचैवत्रयोदशम् ॥ चतुर्दशंवामनकंकौर्मंपंचदशंस्मृतम् ॥ २९ ॥ मात्स्यंचगारुडंचैवब्रह्मां
डंचततःपरम् ॥ सर्गश्चप्रतिसर्गश्चवंशोमन्वंतराणिच ॥ ३० ॥ वंशानुचरितंचेतिपुराणंपंचलक्षण
म् ॥ तेषांषड्वैष्णवींसित्विमाहुःसात्विकलक्षणाम् ॥ ३१ ॥ षड्ब्राह्मींसित्विमाहुश्चराजसींराजसत्त

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

म ॥ आहुःशैवींशिवमयींषडन्यानिचपांडव ॥ ३२ ॥ शतानीकउवाच ॥ सिद्धित्रयमितिप्रोक्तंत्व
येदानींमहामते ॥ किमुच्यतेसिद्धिरितिसिद्धःकोवामहामते ॥ ३३ ॥ सिद्धेस्तुलक्षणंब्रूहिब्रूहिसि
द्धेःप्रयोजनम् ॥ सिद्धिक्षेत्रेषुयेसिद्धिंप्राप्तास्तान्ब्रूहिसत्तम ॥ ३४ ॥ सूतउवाच ॥ संवर्तकोनाम
मुनिरग्निपुत्रोमहायशाः ॥ अवसत्सुचिरंकालंगोकर्णेतीर्थसत्तमे ॥ ३५ ॥ तपोघोरंसमास्थायत्रेता
ख्येयुगसत्तमे ॥ निर्द्वंद्वोनिरहंकारःसिद्धिमिच्छन्परांद्विजः ॥ ३६ ॥ अथाजगामभगवान्नारदोमुनि
सत्तमः ॥ यदृच्छयातत्सकाशंसर्वत्रसमदर्शनः ॥ ३७ ॥ तमागतमभिप्रेक्ष्यनारदंमुनिसत्तमम् ॥
अभ्युत्थायार्घ्यमादायशिरसातमवंदत ॥ ३८ ॥ आसनंचददौतस्मैमुनयेपावकात्मजः ॥ कुशलंपरि
पप्रच्छभगवान्नारदोमुनिः ॥ ३९ ॥ संवर्तकंमहात्मानंयोगानामीश्वरंप्रभुम् ॥ सुखासीनोनृपवरं
नारदस्तपसांनिधिः ॥ ४० ॥ आस्यतामितिप्रोवाचसंवर्तकमुदारधीः ॥ संवर्तोपिमहाराजप्राप्या
नुज्ञामुपाविशत् ॥ ४१ ॥ विश्रांतंमुनिमासीनमिदमाहाथपावकिः ॥ संवर्तकउवाच ॥ अद्यमेस

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

फलंजन्मकृतार्थोऽस्मिमहामुने ॥ तवसंदर्शनादद्यसुप्रीतश्चद्विजोत्तम ॥ ४२ ॥ देवाअपिहिकांक्षंते
मुनयश्चतपोधनाः ॥ तवसंदर्शनंयस्मादपुण्यानामसंभवम् ॥ ४३ ॥ तपसासिद्धमात्मानंमन्येऽहंतव
दर्शनात् ॥ कर्मक्षयेहिभवतिसंगमोवैभवादृशाम् ॥ ४४ ॥ इतिसंपूजितोराजन्संवर्तेनसनारदः ॥
प्रीतिमानब्रवीद्वाक्यंसंवर्तकमिदंपुनः ॥ ४५ ॥ नारदउवाच ॥ सिद्धोसिवैमुनिश्रेष्ठतपसाचदमेन
च ॥ भक्त्याचदेवदेवस्यरुद्रस्यपरमेष्ठिनः ॥ ४६ ॥ क्षेत्रस्यचप्रभावेणगुरुशुश्रूषणेनच ॥ किंतेभी
ष्टंद्विजवरब्रूहिताद्दितराम्यहम् ॥४७॥ अमोघंदर्शनंविद्धिमदीयंब्राह्मणोत्तम ॥ नह्यशक्यंमयादातुंत्रैलो
क्यमपिमानद ॥ ४८॥ संवर्तकउवाच ॥ दर्शनादेवतेब्रह्मन्कृतार्थोऽस्मिनसंशयः ॥ तथापियन्मेमं
नसिवर्ततेसुचिरंद्विज ॥ ४९ ॥ तत्तेऽहंसंप्रवक्ष्यामिप्रसन्नोवक्तुमर्हसि ॥ अस्मिन्क्षेत्रवरेसिद्धाविप्राः
कतिमहामुने ॥ ५० ॥ सिद्धिरित्याभिधीयेतार्कितद्वदमहामुने ॥ गोकर्णमितियन्नामतस्यनिर्वचनंव
द ॥ ५१ ॥ अत्रकेमुनयःसिद्धाःकेनोपायेनसत्तम ॥ यतःसंजायतेविश्वंयत्रसंपरिवर्तते ॥ ५२ ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

संन्हीयतेपुनर्यत्रकिमाधारंप्रचक्षनः ॥ नारदउवाच ॥ श्रूयतामभिधास्यामियत्पृष्टोहामिहत्वया ॥५३॥
रहस्यंसर्वदेवानांमुनीनामपिसत्तम ॥ अस्त्वतंत्रमिदंप्रोक्तंशंभुनालोकशंभुना ॥ ५४ ॥ कुमारायपुरा
विप्रयोगयोग्यायपृच्छते ॥ तत्तेऽहंसंप्रवक्ष्यामिनमस्कृत्वाशिवायवै ॥ ५५ ॥ नमस्त्रिशूलहस्ताय
त्र्यक्षायचत्रिमूर्तये ॥ त्रिधाम्नेचत्रिभेदायत्रिविधायनमोनमः ॥५६॥ ब्रह्मविष्णुस्वरूपायशंकरायनमो
नमः ॥ नमस्तेज्ञानपतयेलोकानांपतयेनमः ॥ ५७ ॥ सर्वात्मनेनमस्तेस्तुसर्वज्ञायनमोनमः ॥ परशु
व्यग्रहस्तायपरमात्मस्वरूपिणे ॥ ५८ ॥ नमःसहस्रशिरसेसहस्रचरणायते ॥ सहस्रबाहवेतुभ्यंसह
स्रनयनायच ॥ ५९ ॥ नमस्तेवृषवाहायवृषप्रियनमोस्तुते ॥ यतःप्रवर्ततेविश्वंयस्मिंश्चपरिवर्तते ॥
॥ ६० ॥ यस्मिन्विलीयतेचांतेनमस्तेलिंगमूर्तये ॥ सिद्धिंवदंतिमुनयःपरमेश्वराप्तिंसिद्धान्वदंतिशि
वतत्वविदोमुनींद्रान् ॥ क्षेत्राणिचाहुरमलानिशिवस्थितानिक्षेत्रेषुसिद्धिमधिकांप्रवदंतिशैवीम् ॥६१॥
इतिश्रीस्कांदेगोकर्णपुराणेप्रथमोऽध्यायः ॥ १ ॥ ॥ ॥ छ ॥ ॥ ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

नारदउवाच ॥ कैलासशिखरेरम्येसमासीनंवृषध्वजम् ॥ पार्वत्याप्रिययासार्धंविश्वगर्भधरंहरम् ॥१॥
नंदीशप्रमुखैःसिद्धैःशिवज्ञानविशारदैः ॥ संसेव्यमानंनिखिलैःपार्षदैश्चसहामरैः ॥ २ ॥ भक्त्योपग
म्यपितरंववंदेषण्मुखस्तदा ॥ मातरंचाभिवाद्याथसूपविष्टस्तदंतिके ॥ ३ ॥ तमुवाचमहादेवःस्मित
पूर्वमिदंवचः ॥ संहरामिजगत्सर्वमिदानीमेवपुत्रक ॥ ४ ॥ नात्रस्थेयंत्वयावत्सक्षेत्रंसिद्धिप्रदंव्रज ॥
त्रिरात्राभ्यंतरेसर्वंजगत्स्थावरजंगमम् ॥ ५ ॥ विलयंयातितस्मात्त्वंगच्छगोकर्णमद्यवै ॥ ममक्षेत्रेम
हाभागगोकर्णेतीर्थसत्तमे ॥६॥ मयोक्तेनविधानेनस्थित्वासिद्धिमवाप्स्यसि ॥ ७ ॥ कुमारउवाच ॥
किमर्थंदेवदेवेशसंहारःक्रियतेत्वया ॥ सृष्टिंकिमर्थंकुरुषेसृष्टौवावर्तसेकथम् ॥ ८ ॥ सृष्ट्वाभूतानिभू
तेशनयुक्तासंहृतिस्त्वया ॥ इदानीमपिसंहारस्तवायंनप्रशस्यते ॥ ९ ॥ द्वेषोवासर्वभूतेषुप्रीतिर्वावद
शंकर ॥ साम्यंवाशर्वसर्वत्रकिमेतत्तेविचेष्टितम् ॥ १० ॥ गोकर्णस्यप्रभावंचसिद्धिक्षेत्रस्यशंसमे ॥
श्रुत्वैतत्सकलंदेवगमिष्यामिकृतार्थताम् ॥ ११ ॥ शंकरउवाच ॥ शृणुपुत्रपरंगुह्यंसमासात्कथया

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

मिते ॥ अहमेवजगत्सर्वंनान्योऽस्तिसुरसत्तम ॥ १२ ॥ आदावहंतथामध्येअंतेचाहंनसंशयः ॥ म
मनास्त्यादिरंतश्चतथामध्यश्चसत्तम ॥ १३ ॥ आदिमध्यावसानानिमत्कृतानिनिबोधमे ॥ आदौसृ
ष्टिंकरोम्येवमध्येरक्षामिचप्रभुः ॥ १४ ॥ करोमिचांतमंतेचदृश्यादृश्यस्यसत्तम ॥ सत्वंरजस्तमश्चे
तिगुणामद्देहसंभवाः ॥ १५ ॥ सात्विकंराजसंचेतितामसंचत्रिधाजगत् ॥ सिद्धिश्चात्रिविधाचैवस्व
भावादेवषण्मुख ॥ १६ ॥ कुमारउवाच ॥ सृष्टिंमेदेवदेवेशश्रोतुमिच्छाप्रवर्तते ॥ सिद्धिंचात्रिविधां
देर्वासिद्धिक्षेत्राणिचप्रभो ॥ १७ ॥ शंकरउवाच ॥ अहमादिर्हिदेवानांमध्यंचसुरसत्तम ॥ अंतश्चसर्व
भूतानामात्माचाहंनसंशयः ॥ नमेप्रीतिर्नमेद्वेषःसर्वत्रसमदर्शिनः ॥ १८ ॥ गुणत्रयविभागेनसृष्टौ
वर्तामिसुव्रत ॥ १९ ॥ श्रूयतांपुत्रवक्ष्यामिसृष्टेर्लक्षणमादितः ॥ अरूपत्वाददेहोहमनादिरहमच्यु
तः ॥ २० ॥ अनंतोहंकार्तिकेयनमांजानातिकश्चन ॥ मामेकंबहुधापुत्रयजंतिज्ञानचोदिताः ॥२१॥
तथापिमांनजानंतिमद्भिन्नानास्तिकिंचन ॥ अरूपत्वाददेहत्वादमनोगोचरोस्म्यहम् ॥ २२ ॥ नशब्द

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

गोचरश्चाहंयोगिध्येयोहमच्युत ॥ निष्कलःसकलश्चाहंनिर्गुणश्चगुणात्मकः ॥ २३ ॥ कथितंतेसुबहु
धानावगंतासिसुव्रत ॥ आत्माहंसर्वभूतस्यक्षेत्रेक्षेत्रज्ञसंज्ञकः ॥२४॥ त्रैलोक्यंमदधिष्ठानंमच्चेष्टुंपरिव
र्तते ॥ नमेप्रियोहिनद्वेषोनखेदोस्तिकदाचन ॥ २५॥ मय्येवजातंमय्येववर्ततेसचराचरम् ॥ मामेवै
ष्यतिचांतेवैमाययाममोहितम् ॥२६॥ शिवआदौतथामध्येशिवोंतेजगतस्तथा ॥ शिवएवजगत्सर्वं
बहिरंतश्चसर्वतः ॥ २७ ॥ शृणुपुत्रयथातत्वंसंक्षेपाद्वदतोमम ॥ श्रोतव्यंचत्वयावेद्यंनवक्तव्यंहिकुत्र
चित् ॥ २८ ॥ एकोहमादौभुवनानिपुत्रनिक्षिप्यकुक्षौसचराचराणि ॥ तमोगुणंमानयानोभवामिसं
स्त्यभूतानिजलात्मकोहम् ॥ २९ ॥ जलस्वरूपंममदिव्यमाहुःशुद्धंसदानिर्मलंनिष्कलंकम् ॥ नि
त्यंनिरुक्तंनिरपेक्ष्यमाहुरात्मानमेकंपरमंवदंति ॥ ३० ॥ ततःशनैरहममलोजलात्मनांक्रमेणसंयम्यवि
वृद्धचेतनः ॥ सत्त्वात्मकंगुणमहंप्रतिपद्यपुत्रनारायणेतिजगतिप्रथितोभवामि ॥ ३१ ॥ ततोगुणं
सात्विकंसंबभूवरजोगुणंब्रह्मसंज्ञंबभूव ॥ ततोहिरुद्रत्वमवाप्यरौद्रंभावंकृत्वातमसासंहरामि ॥ ३२ ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

कुमारउवाच ॥ किमर्थंसात्विकंतातत मसाकिंप्रयोजनम् ॥ राजसंवासुरश्रेष्ठश्रोतुमिच्छाप्रवर्तते ॥
॥ ३३ ॥ शंकरउवाच ॥ सत्वेनाहंवेदगर्भोदेवानांचसृजामिच ॥ तामसेनासुरान्मूढान्स्थावरांश्च
पशूनपि ॥ ३४ ॥ शेषंराजसभावेनत्रिधात्रैलोक्यसंभवः ॥ ब्रह्मविष्णुशिवाख्योऽहंगुणानांप्रविभाग
तः ॥ ३५ ॥ बहुरूपोस्मिसर्वत्रसर्वव्यापीनिरामयः ॥ त्रिधात्मकोऽहमेकःसन्सर्वसाक्षीनिरंजनः ॥
॥ ३६ ॥ लीलयाचास्यजगतःसर्गस्थित्यादिकाःक्रियाः ॥ करोमिचैकदासर्वमयिसंहृत्यवर्तये ॥
॥ ३७ ॥ बहुनात्रकिमुक्तेनमयिसर्वंचराचरम् ॥ प्रतिष्ठितंचबहुधाव्याप्तश्चाहंसनातनः ॥३८ ॥ इदं
प्रकाशितंतत्वंरहस्यमपितेस्फुटम् ॥ ३९ ॥ इतिश्रीस्कांदेगोकर्णपुराणेद्वितीयोऽध्यायः ॥ २ ॥॥छ॥
कुमारउवाच ॥ भगवन्देवदेवेशसर्वज्ञपरमेश्वर ॥ भक्तानुकंपिन्शंभोतेश्रुतंवैतत्वलक्षणम् ॥
॥ १ ॥श्रोतव्यंपरमंकिंचित्तन्मेब्रूहिपितामह ॥ गच्छगोकर्णमद्यैवेत्येतदाहभवान्मम ॥ २ ॥ ममक्षे
त्रमितीदंचश्रुतंतेवदतोऽनघ ॥ सर्वक्षेत्राणिभवतःसर्वक्षेत्रमयोह्यसि ॥ ३ ॥ त्वमेकःसर्वभूतेषुक्षेत्रेक्षे

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

त्रज्ञसंज्ञकः ॥ तत्कथंममवैक्षेत्रमितिगोकर्णमाश्रये ॥ ४ ॥ तन्ममब्रूहिभगवन्गोकर्णस्यप्रधानता
म् ॥ ५॥ शंकरउवाच ॥ ममांशोब्रह्मणस्तातउत्पन्नःक्रोधसंभवः ॥ ललाटात्तस्यदेवस्यसृष्टिंचिंतय
तःपुरा ॥ ६ ॥ दृष्ट्वोत्पन्नमथोरुद्रमिदमाहप्रजापतिः ॥ सृष्टिंकुरुमहाभागसमर्थस्त्वंहिमेमतः ॥ ७॥
ततोममज्जसलिलेनाकिंचित्प्रत्यभाषत ॥ सृष्टेर्विधानमन्विच्छन्निर्धिवैधानिकोयथा ॥ ८ ॥ अनश्वरा
निरातंकाभूयासुःसर्वदेहिनः ॥ सत्वैकगुणसंपन्नाःसर्वेनाधममध्यमाः ॥ ९ ॥ तपसासाधयाम्येवमि
तिलोकहितेच्छया ॥ निश्चित्यमनसातत्रतपःकर्तुंप्रचक्रमे ॥१०॥ निमग्नःसलिलेरुद्रस्तपसाद्योति
तप्रभः ॥ संनियम्यमनोदेवंसंस्थाप्यत्हृदयांबुजे ॥ ११ ॥ परंज्योतिश्चिदात्मानमद्वयंतमसःपरम् ॥
जगतःपरमंध्यायन्समाधावध्यातिष्ठत ॥ १२ ॥ एवंतपस्यतस्तस्यकोटिसूर्यसमद्युतेः ॥ युगत्रयावधिः
कालःसुमहानत्यगात्किल ॥ १३ ॥ ततोविलंवितंदृष्ट्वारुद्रसर्गंप्रजापतिः ॥ तत्रकारणमन्विच्छ
न्चिंतयामासचाकुलः ॥१४॥ अनश्वराणिभूतानिकरोमीतिप्रयत्नतः ॥ सांप्रतंसतपस्यास्तेपरमेणस

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

माधिना ॥ १५ ॥ एवंतत्कारणंज्ञात्वाविदित्वातन्मनोगतम् ॥ अहोसाहसमाश्रित्यरुद्रस्तपसिवर्तते ॥ १६ ॥ देवासुरमनुष्यादौविशेषोनभवेद्यदि ॥ भवेच्चसर्वसामान्यंनीचोत्कृष्टाविभागिच ॥१७॥ शुद्धैकसत्वसृष्टिश्चेत्त्रिगुणालंबनंविना ॥ सजातीयविजातीयकल्पनाज्ञानजस्तथा ॥ १८ ॥ संकराख्योमहान्दोषःसंभविष्यतिवैचिरम् ॥ तस्मादेतन्नकर्तव्यमितिनिश्चितमानसः ॥ १९ ॥ ततोरजस्तमोभ्यांवैचोदितःपद्मसंभवः ॥ अन्यथाभगवान्पुत्रममशक्त्याप्रचोदितः ॥ २० ॥ चकारसृष्टिंत्रिगुणांब्रह्मणाचकृतांपुरा ॥ ततोरुद्रंतपस्यंतंसमाधिरतमात्मनि ॥२१॥ तंतदासासमागम्यवागुवाचाशरीरिणी ॥ उत्तिष्ठोत्तिष्ठदेवेशनिवृत्तंचिंतितंतव ॥ २२ ॥ अन्यथाब्रह्मणासर्वसृष्टंस्थावरजंगमम् ॥ चतुर्विधानिभूतानिप्राक्सृष्ट्यांयानिसत्तम ॥ २३ ॥ तानिसृष्टानिसर्वाणिदेवाद्याश्चैवपूर्ववत् ॥ तस्माच्छ्रमेणकिंदेवकिमर्थंतप्यसेऽन्यथा ॥ २४ ॥ तच्छ्रुत्वाभगवान्देवोनिवृत्तस्तपसस्तदा ॥ सात्विकीप्रकृतिःसावैस्थितारुद्रस्यसंनिधौ ॥ २५ ॥ तामाहभगवान्शंभुःक्रोधपर्याकुलेक्षणः ॥ कासिभ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

द्रेकुतश्वासिकस्यासिसुभगेवद ॥ २६ ॥ सातमाहमहाभागाशंकरंकमलेक्षणम् ॥ ध्यानेनावैहिभ
गवन्मद्वृत्तांतंसुरोत्तम ॥ २७ ॥ ततोदध्यौचिरंदेवोज्ञातुंतस्यास्तुसंभवम् ॥ ततोवगम्यतांदेवःसा
त्विकींप्रकृतिंस्वकाम् ॥ २८ ॥ गुणत्रयेणस्पृष्टंवैदृष्ट्वाक्रोधसमन्वितः ॥ उत्प्लुत्योर्ध्वंतयासार्धंप्रकृत्या
पुरुषोत्तमः ॥ २९ ॥ अंगुष्ठमात्रःपुरुषोद्वादशादित्यसंनिभः ॥ ऊर्ध्वमुत्प्लुत्यवेगेनकर्णाच्छिद्रेणानिःसृ
तः ॥३०॥ निर्गत्यभूमेर्भगवान्ददर्शभुवनत्रयम् ॥ कुमारउवाच ॥ कथंप्रविष्टोभूम्यांचकथंनिर्गतवान्
शिवः ॥ निर्गत्याकिंवाकृतवान्सर्वमेवदशंकर ॥ ३१ ॥ शंकरउवाच ॥ मज्जितोऽहंपुरापुत्रसमुद्रेतपसि
स्थितः ॥ ततस्त्रैलोक्यमखिलंकृतवान्पद्मसंभवः ॥ ३२ ॥ श्रुत्वाहंप्रकृतेर्वाक्यमुत्थितश्चतयासह ॥
आगत्यदृष्टवान्पुत्रमेदिनींचक्रसंस्थिताम् ॥ ३३ ॥ क्रुद्धोऽहमब्रुवंपृथ्वींदेहिपंथानमित्युत ॥ ततोमा
माहसादेवीधराविश्वंभरासती ॥ ३४ ॥ कृतांजलिपुटाभूत्वावेपंतीकदलीयथा ॥ विव्हलाभूतभर
णाद्दृष्ट्वामांकुपितंतदा ॥ ३५ ॥ भवत्वंशरणंदेवभक्तानामभयंकर ॥ रौद्रमूर्तेसुरश्रेष्ठनित्यानित्यप्रव

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

र्तक ॥३६॥ त्रैलोक्यकांतकामारेधर्मप्रियसुरेश्वर ॥ विश्वमूर्तेविश्वकर्मन्विष्णमूर्तेमहेश्वर ॥ ३७ ॥
बहुमूर्तेजगन्नाथशिवमूर्तेतकर्मणे ॥ अनंतरूपिणेनित्यंसमस्तावरणायच ॥ ३८ ॥ सूर्येंदुवन्हिनय
नमहदादिप्रवर्तक ॥ यज्ञमूर्तेयज्ञभवयज्ञेशायाव्ययायच ॥ ३९ ॥ कर्त्रेभर्त्रेचहर्त्रेचमूर्तामूर्तस्वरू
पिणे ॥ परमात्मन्परंधामपवित्रंपरमंभवान् ॥ ४० ॥ त्वमादिःसर्वभूतानामनादिस्त्वंसुरेश्वर ॥ आ
दिमध्यावसानस्त्वंभूतानांपरमेश्वर ॥ ४१ ॥ त्वंयज्ञस्त्वंवषट्कारस्त्वंहविस्त्वंहुताशनः ॥ त्वमोंकारः
सुरश्रेष्ठत्वंब्रह्मात्वंसुराधिपः ॥ ४२ ॥ त्वंविष्णुस्त्वंरविःसोमस्त्वंयमोवरुणस्तथा ॥ आदित्यावसवो
रुद्रामरुतःपितरस्तथा॥४३ ॥ विश्वेदेवाश्चाश्विनौचअहमाकाशएवच ॥ नागायज्ञाःपिशाचाश्चमनु
ष्याःपशवस्तथा ॥ ४४ ॥ पक्षिणःपर्वताश्चैवसर्वस्थावरजंगमम् ॥ त्वदंशभूतंदेवेशदृश्यादृश्यंनसंश
यः ॥ ४५ ॥ शिरस्तथातेगगनंसुरेशत्वष्टौदिशश्चैवतुबाहवस्ते ॥ त्वदीयमाहुर्नयनत्रयंचसूर्यानलौ
सोममितिक्रमेण ॥ ४६ ॥ पादौतवाहंतवदिव्यमूर्तेगुल्फास्तवेमेगिरयःसमस्ताः ॥ रोमाणितेभूरुहा

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

देवदेवसप्तांबुधींस्तेजठरंवदंति ॥ ४७ ॥ इतिस्तुतोथभगवान्भूम्याभूतपतिस्तथा ॥ प्रीत्येदमाह धरणींकिमिच्छसिशुभेवद ॥ ४८ ॥ इतिश्रीस्कांदेगोकर्णपुराणेतृतीयोऽध्यायः ॥ ३ ॥ ॥ छ ॥ धरण्युवाच ॥ स्त्रीचाहंविह्वलादेवस्वभावाद्भयपीडिता ॥ तवोर्ध्वगमनाद्भीतांमांनभेदयशंकर ॥ १ ॥ नमेरुजंदेवदेवकर्तुमर्हसिशंकर ॥ कर्णच्छिद्रेणमेनाभेर्ह्रस्वोभूत्वोर्ध्वमुत्पत ॥ २ ॥ रुद्रउवाच ॥ तथाभद्रेकरिष्यामियथानैवैषिवेदनाम् ॥ मत्संयोगादिहशुभोभाविष्यतिसुतस्तव ॥ ग्रहाणामधिपश्चंडः सोंऽगारकइतिश्रुतः॥३ ॥ इत्युक्त्वाधरणींदेवोनाभिरंध्रेप्रविश्यच ॥ तयाप्रकृत्यासहितोंगुष्ठमात्रवपुर्धरः ॥ ४ ॥ ऊर्ध्वमुत्प्लुत्यवेगेनकर्णच्छिद्रेणानिःसृतः ॥ धरणींप्राहविश्वात्मादयालुःपरमेश्वरः ॥ ५ ॥ रुद्रउवाच ॥ भविष्यतीदंभद्रंतेक्षेत्रंत्रैलोक्यविश्रुतम् ॥ गोशब्दःप्रथमंदेवीत्वयिसंपरिवर्तते ॥ ६ ॥ कर्णश्चायंतवशुभेदेविशब्दग्रहोयतः ॥ तस्माद्गोकर्णमितिचंख्यातिंलोकेगमिष्यति ॥ ७ ॥ रुद्रयोनीतिनाम्नाचत्रैलोक्येपरिगीयते ॥ पातालादूर्ध्वगमनेममयोनीरभूयतः ॥ ८ ॥ वरुणावर्तनाम्नाचत्रै

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

लोकयेविश्रुतंभवेत् ॥ एकार्णवेजगत्यास्मिन्नावर्तोवरुणस्ययत् ॥ ९ ॥ आपातालात्सत्यलोकमाव
र्तमिवसागरे ॥ विनाशोनैववविलयेवरुणावर्तकंततः ॥ १० ॥ येस्मरिष्यंतिगोकर्णंप्रातरुत्थायनि
त्यशः ॥ तेषांरात्रिकृतंपापंतत्क्षणादेवनश्यति ॥ ११ ॥ तथादिवाकृतंपापमपराह्णेविनश्यति ॥ ये
स्मरिष्यंतिगोकर्णंवर्णत्रयविभूषितम् ॥ १२ ॥ तेषांवाचाकृतंपापंमत्प्रसादाद्विनश्यति ॥ येपश्यंति
महाक्षेत्रंगोकर्णंसुरपूजितम् ॥ १३ ॥ जन्मप्रभृतितेषांवैकृतंपापंप्रणश्यति ॥ स्नानंकुर्वंतियेत्वत्ररुद्र
योन्यांद्विजोत्तमाः ॥ १४ ॥ तेषांत्रिजन्मचरितंस्वल्पंवायदिवाबहु ॥ विनश्यत्यचलेदेविमत्प्रसादा
न्नसंशयः ॥ १५ ॥ अश्वमेधक्रतुकृतंपुण्यंभवतिचस्फुटम् ॥१६॥ सूतउवाच ॥ इत्युक्त्वाधरणींदे
वःकोपाटोपसमन्वितः ॥ दृष्ट्वाब्रह्मकृतांसृष्टिंकिंचिदीशान्यभागगः ॥ १७ ॥ दग्धुकामःप्रजाःसर्वाः
स्थितवान्क्रोधविह्वलः ॥ ततोनानाविधाकाराभूताःसृष्टामयासुत ॥ १८ ॥ उग्रायुधधराघोराःप्रचं
डाह्युग्रविक्रमाः ॥ सप्तकोटिमहावीराःपार्षदाःपुत्रवैक्षणात् ॥ १९ ॥ आत्मनःसदृशावीर्येनानावेष ॥ ८ ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

विभूषणाः ॥ त्रिशूलकार्मुकधराःखड्गशक्तिधराःपराः ॥ २० ॥ जातमात्रेणतेसर्वैप्रबंधकरसंपुटाः ॥
मामूचुःप्रणताः सर्ववयंसृष्टास्त्वयाकुतः ॥ २१ ॥ अनुज्ञांदेहिचास्माकंकरिष्यामोवचस्तव ॥ इत्यु
क्तेभूतनाथैस्तुरुद्रस्तान्प्राहकोपवान् ॥ २२ ॥ इमान्ब्रह्मकृतान्लोकान्दग्ध्वास्थावरजंगमान् ॥ यू
यमायातमांभूयोव्यादिशंप्रमथानिति ॥ २३ ॥ ततोहरिस्तद्विदित्वालोकोनश्येदितित्वरन् ॥ क्षिप्रमा
साद्यगोकर्णमामुवाचजनार्दनः ॥ २४ ॥ अपराधंक्षमस्वाद्यब्रह्मणायत्कृतंविभो ॥ इदानींलोकसंहा
रोनोचितःशंकरत्वया ॥ २५ ॥ अंतेसंहारकर्ताचत्वमेवपरमेश्वर ॥ इतिविष्णूदितंश्रुत्वाशांतकोपः
कृपान्वितः ॥ २६ ॥ तंप्राहशंकरोविष्णुंयथापूर्वकृतंजगत् ॥ लोकास्तथैवविद्यंतुतववाक्याज्ज
नार्दन ॥ २७ ॥ इत्युदार्यहरिंपुत्रभूतेशानब्रुवंतदा ॥ यस्मात्संहारकरणेयूयंसृष्टामयाततः ॥ २८ ॥
प्रमथाइतिलोकेऽस्मिन्ख्याताभवतपुत्रकाः ॥ मदाज्ञाकारिणोयूयंसकाशेममतिष्ठत ॥ २९ ॥
इत्यादिश्यगणान्विष्णुमब्रुवंवचनंतदा ॥ अहंलोकान्दग्धुकामःस्थितवान्यत्रतत्रतु ॥ ३० ॥ रु

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

द्रभूमिरितिख्यातादहनान्मुक्तिदानृणाम् ॥ प्रकृत्यापार्षदैःसार्धमत्रविष्णोवसाम्यहम् ॥ ३१ ॥ इ
त्युक्तेशंभुनाविष्णुस्तथास्त्वितिययौदिवम् ॥ ३२ ॥ सूतउवाच ॥ गोकर्णेसर्वदावासंमरणंमुक्तिमंड
पे ॥ रुद्रभूम्यांतुदहनंकांक्षंतेविबुधाअपि ॥ ३३ ॥ ततोरुद्रश्चिंतयित्वाभाविष्यत्कार्यगौरवम् ॥ स्व
प्रतिज्ञाव्यथामाभूदितिव्याकुलमानसः ॥ ३४ ॥ ब्रह्मादिस्थावरांतेषुअणुमात्रेषुवासुत ॥ जीवराशिषु
यत्सत्त्वंवर्ततेतत्प्रगृह्यच ॥ ३५ ॥ ततोमयास्वर्णदेहोनिर्मितोमगउत्तमः ॥ ऋतेनारायणाद्देवान्नज्ञातं
केनचित्क्वचित् ॥ ३६ ॥ तमहंमगमादायपार्षदैःसहपुत्रक ॥ कैलासमगमंपश्चात्क्रीडन्नासन्यथा
सुखम् ॥ ३७ ॥ कुमारउवाच ॥ श्रुतंतवमुखांभोजात्क्षेत्रसंभवमादितः ॥ तस्मिन्क्षेत्रेऽमरगुरोसिद्धा
न्मेवक्तुमर्हसि ॥ ३८ ॥ सिद्धेर्लक्षणमाख्याहिसिद्धानांचरितंचमे ॥ ३९ ॥ शंकरउवाच ॥ शृणु
पुत्रप्रवक्ष्यामिमत्क्षेत्रेमामनुस्मरन् ॥ इंद्रियाणींद्रियार्थेभ्योनिगृह्यात्मनिबुद्धिमान् ॥ ४० ॥ काम
क्रोधविनिर्मुक्तोनिष्कामोऽनन्यमानसः ॥ निर्द्वंद्वोनिरहंकारोमद्याजीमत्परायणः ॥ ४१ ॥ मामेवैष्य

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तिसिद्धः सः पुनरावृत्तिवर्जितः ॥ मांगत्वाननिवर्तंतयत्रगत्वानशोचति ॥ ४२ ॥ आत्मन्येवजगत्सर्वं ज्ञानेनावैहिपुत्रक ॥ एकएवाद्वितीयोऽहमितियोमन्यतेयदा ॥ ४३ ॥ तदासससिद्धःपुरुषःसिद्धिंतांपर मांविदुः ॥ तन्नप्राप्यंसुरश्रेष्ठइंद्रियाकर्षिभिर्नरैः ॥ ४४ ॥ तस्मान्निःसंगचित्तेननिर्द्वंद्वोहिनिरामयः ॥ शुद्धंबुद्धंशिवंशांतंनिर्वाणमधिगच्छति ॥ ४५ ॥ तत्सिद्धिमाहुर्मुनयःसात्विकींसिद्धिमीप्सिताम् ॥ राजसींचापरांसिद्धिंशृणुवक्ष्यामिपुत्रक ॥ ४६ ॥ स्वर्गापवर्गमन्विच्छन्देवत्वंवायथेप्सितम् ॥ अणि मादिमहासिद्धिंगंधर्वत्वमथापिवा ॥ ४७ ॥ यक्षसिद्धिंतथैवान्यांकिंचित्स्वर्लोकवासताम् ॥ यान्या निच्छतिवैकामांस्तांस्तानाप्नोतिनान्यथा ॥ ४८ ॥ दानैर्होमैर्जपैश्चान्यैःसुक्षेत्रमरणैरपि ॥ इष्टापूर्तै श्वविविधैःपुण्यतीर्थावगाहनैः ॥ ४९ ॥ तांराजसींसिद्धिमाहुःपुनरावृत्तिलक्षणाम् ॥ कालेनपुनराग त्यदुःखमाप्नोत्यनंतकम् ॥ ५० ॥ तामसींचशृणुष्वेमामज्ञानकृतलक्षणाम् ॥ इदंशरीरमेवास्तिना स्त्यन्यदितिचिंतयन् ॥ ५१ ॥ नददात्युदितेकालेनजुहोतियथोदितम् ॥ दातव्यमितियोदद्यान्ना

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

चारेणसमासतः ॥ ५२ ॥ श्रुतिस्मृत्युदितंत्यक्त्वागुरुशुश्रूषणंतथा ॥ अष्टादशपुराणोक्तंधर्मंसंत्य
ज्यनिंदया ॥ ५३ ॥ करोत्यधर्मंधर्मज्ञःस्वेच्छयाकूटयुक्तिभिः ॥ अशास्त्रेणाप्यनाचारोददातिचजु
होतिच ॥ ५४ ॥ एतेवैतामसींसिद्धिंप्राप्स्यंत्यज्ञानलक्षणाम् ॥ अश्वादयस्तेविख्यातामृगपाक्षिसरी
सृपाः ॥ ५५ ॥ स्थावराश्चभाविष्यंतितामसामूढचेतसः ॥ नकिंचिदवगच्छंतिमग्नास्तमसिदारुणे
॥५६॥ चक्रवत्परिवर्तंतेतिर्यग्योनिष्वनेकशः ॥ भवांभोधौचिरंपुत्रवर्तंतेशास्त्रवर्जिताः ॥५७॥ आचार्यप्र
थमांसिद्धेःसाधनंकवयोविदुः ॥ तिष्ठाम्याचार्यरूपेणशिष्यस्यहितकाम्यया ॥५८॥ आचार्यमांविजानीहि
विष्णुश्चाचार्यएवच ॥ क्षेत्राणामुत्तमंपुण्यंगोकर्णमाभिधीयते ॥ ५९ ॥ तस्मात्त्वंगच्छगोकर्णंक्षिप्रंसि
द्धिकरंनृणाम् ॥ रहस्यंसर्वदेवानांऋषीणामपिसत्तम ॥६०॥ शिवक्षेत्रमितिप्राहुःक्षिप्रंसिद्धिकरंनृणाम् ॥
सिद्धिमिच्छन्पुरातातअत्मन्येवव्यवस्थितः ॥६१॥ मयोक्तेनविधानेनतिष्ठन्सिद्धिमवाप्स्यसि ॥ गोकर्ण
स्यप्रभावश्चप्रोक्तःसंक्षेपतस्तव ॥ सिद्धित्रयंचकथितंकिमन्यच्छ्रोतुमिच्छसि ॥ ६२ ॥ कुमारउ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

षतः ॥ पातालसंस्थितागंगाह्यत्रायातियथाहर ॥ ३५ ॥ तथाकुरुष्वभगवन्प्रसन्नोयदिशंकर ॥
तच्छ्रुत्वावचनंशंभुर्गंगांसंस्मारपाविनीम् ॥ ३६ ॥ एहीतितांदेवनदींमनसाभक्तवत्सलः ॥ ततस्त
च्चिंतितंज्ञात्वागंगात्रिपथगाप्रभो ॥ ३७ ॥ ऊर्ध्वमागम्यतरसायत्रास्तेशंकरःस्वयम् ॥ शतशृंग
गिरेर्मूर्ध्नि ह्रदिनीपर्यवर्तत ॥ ३८ ॥ तांदृष्ट्वामुनयःसर्वेगंगांशुद्धजलाविलम् ॥ तुष्टुवुःशंकरंतेवैसुमि
त्रंचद्विजोत्तमम् ॥ ३९ ॥ वसिष्ठकाश्यपात्रेयाअगस्त्योभृगवस्तथा ॥ महातपस्विनोविप्राःशौचं
चक्रुर्यथाविधि ॥ ४० ॥ विभज्यतांतेविप्रेंद्रायथाकामंमहाव्रताः ॥ धारांगृह्याश्रमपदान्स्वान्स्वाने
वययुर्द्विजाः ॥ ४१ ॥ गंगाधारेतितामाहुर्मुनयस्तत्वदर्शिनः ॥ दृश्यादृश्येनरूपेणगोकर्णंचसुरापगा
॥४२॥ प्लावयामाससर्वत्रसर्वपापहराशुभा ॥ तत्रस्नातःसर्वतीर्थेस्नातोभवतिमानवः ॥४३॥ तत्रदत्तं
हुतंचैवएकंकोटिर्भविष्यति ॥ तस्मिन्वनेक्रीडतिदेवदेवोमुदातयासार्धमनिंद्यरूपः ॥४४॥सोप्यापिमि
त्रत्वमुपेत्यतस्यसचापिसिद्धिंपरमांजगाम॥४५॥इतिश्रीस्कांदेगोकर्णपुराणेएकविंशोऽध्यायः॥२१॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

नारदउवाच ॥ गंगाधारमितिख्यातमाश्रमंपुण्यवर्धनम् ॥ सर्वदेवमयंपुण्यंसर्वतीर्थमयंशुभम् ॥
॥ १ ॥ तस्मिन्वसातिदेवेशःपार्वत्यासहशंकरः ॥ तस्मादुत्तरतःकिंचित्स्थानंत्रैलोक्यविश्रुतम् ॥ २ ॥
योषिद्रूपधरस्तत्ररमतेगरुडध्वजः ॥ कामिनासहशर्वेणलोककांतेनशंभुना ॥ ३ ॥ संवर्त्तकउवाच ॥
किमर्थंभगवान्विष्णुःस्त्रीरूपमिवजग्मिवान् ॥ किमर्थंतांमहादेवश्चकमेपुरुषोत्तमः ॥ ४ ॥ शंसै
तत्सकलंपुण्यंपरंकौतूहलंहिमे ॥ प्रसादसुमुखोभूत्वाविस्तराच्छ्रुतिरंजनम् ॥ ५ ॥ नारदउवाच ॥
शृणुविप्रकथांदिव्यांसर्वपापहरांशुभाम् ॥ पुराकृतयुगेतातदनोर्वंशसमुद्भवः ॥ ६ ॥ खरोनाममहा
वीर्योदानवःसुमहाबलः ॥ शतशृंगगिरिंगत्वाविचचारमहासुरः ॥ ७ ॥ क्रीडावनगतांदेवींपार्वतींसं
ददर्शह ॥ अदृष्टइवतांदृष्ट्वाचकमेपुरुषाधमः ॥ ८ ॥ गृहीतुकामस्तांपापोह्युपायंसोभ्यचिंतयत् ॥ ॥ ६१ ॥
चिंतयित्वाबहुविधंतपसेकृतनिश्चयः ॥ ९ ॥ ततस्तपोवनंगत्वातपस्तेपेसुदुश्चरम् ॥ उद्धृत्य
बाहूभद्रंतेपादांगुष्ठेनातिष्ठतः ॥ १० ॥ दिव्यवर्षसहस्रांतेतुतोषभगवान्शिवः ॥ गत्वाश्रमप

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

दंतस्यहरःस्वरमभाषत ॥ ११ ॥ ददामितेवरंब्रूहियद्यपिस्यात्सुदुर्लभम् ॥ सप्रणम्याब्रवीद्देवंत्रिपु
रघ्नंत्रिलोचनम् ॥ १२ ॥ यस्यमूर्ध्निजगन्नाथहस्तक्षेपंकरोम्यहम् ॥ सभस्मसाद्भवेत्क्षिप्रंवरमेत
द्वृणोम्यहम् ॥ १३ ॥ तथास्त्वितिसतेनोक्तःशिवेनाशिवलक्षणः ॥ तमभ्यधावद्वेगेनभगवंतंम
हासुरः ॥ १४ ॥ ज्ञात्वामनोगतंतस्यभगवान्वृषभध्वजः ॥ तस्माद्देशादपाक्रामन्नारायणपुरंप्रति
॥ १५ ॥ तमागतमभिप्रेक्ष्यशंकरंभयविव्हलम् ॥ किमेतदितिचोवाचगौरीशंगरुडध्वजः ॥ १६ ॥
तदोवाचभवःसर्वंयथावृत्तंतपोवने ॥ तच्छ्रुत्वाव्यसृजन्मायांययासर्वंविमोहितम् ॥ १७ ॥ एकेनां
शेनभगवान्पलायनपरेणतु ॥ रुद्रेणसखिनासार्धंदिशमैंद्रींसमाश्रितः ॥ १८ ॥ अपरेणमहाभागो
ह्यंशेनधरणीधरः ॥ अधारयदमेयात्मायोषिद्रूपंमनोहरम् ॥ १९ ॥ अन्वधावत्सदैत्येंद्रोव्रजंतंपर
मेश्वरम् ॥ ददर्शनारींदिव्यांतांरम्यांकमललोचनाम् ॥ २० ॥ दृष्ट्वामनोहरांतांतुउमाशतगुणाधि
काम् ॥ विस्मयोत्फुल्लनयनोकंदर्पवशमागतः ॥ २१ ॥ सुकुमारींसुकेशांतांपूर्णचंद्रनिभाननाम् ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

हिरष्टवर्षांताभद्रांगायंतींसुमनोहरम् ॥ २२ ॥ डोलामारुह्यसौवर्णांसखीमध्यगतांशुभाम् ॥ अनौ
पम्येनवपुषाक्रीडंतींयोषितांवराम् ॥ २३ ॥ दृष्ट्वामुमोहदैत्येंद्रोविस्मृत्यहरपार्वतीम् ॥ तामुवाचान
वद्यांगींमधुरांकाममोहितः ॥ कात्वंकमलपत्राक्षिकिमर्थंचेहातिष्ठसि ॥ २४ ॥ त्वांदृष्ट्वासुभगेचाद्यवे
पथुर्जायतेमम ॥ दर्शनादेवसुश्रोणित्वयामेपहृतंमनः ॥ २५ ॥ मांभजस्ववरारोहेत्रैलोक्यैश्वर्य
पूजितम् ॥ यथाकामंयथाश्रद्धंभोगान्भुंक्ष्ववरानने ॥ २६ ॥ एहिसार्धंमयासुभ्रुसुचिरंरमयस्वमाम्॥
हिरण्यकशिपोर्वंशेजातोहंलोकविश्रुते ॥ २७ ॥ नाम्नाखरइतिख्यातःसर्वत्रशुभलोचने ॥ ससुरासु
रगंधर्वाःसयक्षोरगराक्षसाः ॥ २८ ॥ वशेतिष्ठंतिमत्तेभगमनेमेद्यकिंकराः ॥ अनुरूपाममैवत्वंतवचा
हमनिंदिते ॥ २९ ॥ तपसासिद्धमात्मानंमन्येत्वांप्राप्यसुंदरीम् ॥ आराधितोमयादेविदेवःशाठ्येन
तोषितः ॥ ३० ॥ तस्मादवाप्तमधुनावरमन्यैःसुदुर्लभम् ॥ यस्यमूर्ध्निशुभेहस्तंनिक्षिपामिशुभान
ने ॥ ३१ ॥ सदेवोदानवोवापिमनुष्योवानसंशयः ॥ भस्मसाच्चभवेत्सोपितत्क्षणाद्विद्विषन्मम ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

वाच ॥ तस्मिन्क्षेत्रवरेदेवसिद्धान्मेवक्तुमर्हसि ॥ तवक्षेत्रेमहादेवगोकर्णेवृषभध्वज ॥ ६३ ॥ शंकर
उवाच ॥ शृणुपुत्रममक्षेत्रेमामिष्टासुरसूदन ॥ स्वायंभुवांतरेपुत्रचतुर्विंशतिसत्तमे ॥ ६४ ॥ परांसि
द्धिंगतास्तान्वैशृणुष्वगदतोमम ॥ सनत्कुमारःसनकःसनंदःसमरःसमः ॥ ६५ ॥ नारदोरोमसश्चेति
सप्तवैमुनिपुंगवाः ॥ दुर्वासावैमुनिश्रेष्ठोमार्कंडेयोमहामुनिः ॥ ६६ ॥ लज्जाश्रुतिःस्मृतिर्मेधासावि
त्रीचसरस्वती ॥ धर्मश्चभार्गवश्चैवनववैसिद्धिमागताः ॥ ६७ ॥ वेदानामुत्तमंसामकामःक्रोधश्चसुव्र
त ॥ असूयामत्सरीचंडीद्वेषश्चेर्ष्यातथाष्टमी ॥ ६८ ॥ एतेचतुर्विंशतिकामुक्तिमाप्ताश्चषण्मुख ॥
मन्वंतरेषुसर्वेषुशृणुमुक्तिमुपागतान् ॥ ६९ ॥ स्वारोचिषेंतरेपुत्रविंशन्मुक्तिमुपागताः ॥ वसुर्वरे
ण्योवरदोनरोनारायणस्तथा ॥ ७० ॥ ध्रुवोनलःकुरुश्चैवकालःकर्मकरःक्रिया ॥ रंभातिलोत्तमाज
न्यासुरभिर्मेनकातथा ॥ ७१ ॥ रोमपादःपृथुग्रीवःकंडुःसत्यतपास्तथा ॥ एतेविंशतिकाःपुत्रसिद्धाः
स्वारोचिषेंतरे ॥ ७२ ॥ औतमेचापिमत्क्षेत्रेसिद्धानापिनिबोधमे ॥ क्षमासत्यंदमःकीर्तिरहिंसानंदए

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

वच ॥ ७३ ॥ लक्ष्मीरलक्ष्मीर्घोराचबुद्धिःसन्मानएवच ॥ पूर्वाचपश्चिमाचैवदक्षिणाचोत्तरादिशः ॥
॥ ७४ ॥ अधश्चोर्ध्वंचतिर्यक्कऔतमेमुक्तिमागताः ॥ तामसेचांतरेपुत्रशृणुमुक्तिमुपागतान् ॥ ७५ ॥
देवानंदःसुहोत्रश्चकहोलःकनकःकषः ॥ हिरण्यरोमादीर्घतपाःसुहोत्रःशांबरायणिः ॥ ७६ ॥ गौरी
गणाधिपश्चंडोमेरुःकनकभूषणः ॥ सुभद्राचसुशर्माचसार्वभौमस्तथापरः ॥ ७७ ॥ देवलोवासुकि
स्तक्षोह्यनंतोऽरुणएवच ॥ उलूखलोहिडिंबाचरोदसीनिर्मदातथा ॥ ७८ ॥ चाक्षुषेचांतरेवत्सनिबो
धानंदमागतान् ॥ सुरुचिःसुमतिर्जन्हुर्बंधुःशुक्रःप्रतर्दनः ॥ ७९ ॥ राहुःक्राथःक्रमःक्रांतःसंध्यासिं
धुःप्रजापतिः ॥ अंगिरामधुपर्कश्चसंध्यारात्रिर्विमोहनः ॥ ८० ॥ एतेपुत्रममक्षेत्रेगोकर्णेमुक्तिमाग
ताः ॥ वैवस्वतेंऽतरेपुत्रशृणुनिर्वाणमागतान् ॥ ८१ ॥ इक्ष्वाकुरंबरीषश्चनाभागोनहुषस्तथा ॥ वि
श्वामित्रःसुहोत्रश्चययातिश्चमहायशाः ॥ ८२ ॥ जनकःकण्वईशश्चगोविंदोगोपतिस्तथा ॥ प्रल्हा
दोविनताचापिबाणश्चापिबलेःसुतः ॥ ८३ ॥ सुरुचिर्हव्यवाहश्चवरुणोदारुणस्तथा ॥ वाल्मीकिर

॥ ११ ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

थहर्यश्वोगरुडोविनतासुतः ॥ ८४ ॥ नंदीचविंहलिश्चैवरघूरामःशमःसमः ॥ सुधर्माचपृथुश्रेष्ठोव्या
सःसत्यवतीसुतः ॥ ८५ ॥ यमःकालःकालरात्रिर्मृत्युर्नीलस्तथैवच ॥ निमिःसनिमिषश्चैवमानहाम
धुरःशमः ॥ ८६ ॥ संवर्तोगालवश्चैवगंगाचसरितांवरा ॥ चंद्रभागानदीचैवसिंधुर्गौरीमरीचिजा ॥
॥ ८७ ॥ जमदग्निसुतोरामःसाध्यारुद्रामरुद्गणाः ॥ विश्वेचमरुतश्चैवआदित्याश्वसुरोत्तमाः ॥ मन्वं
तरांतेतुभवान्किमन्यच्छ्रोतुमिच्छसि ॥ ८८ ॥ इतिश्रीस्कांदेगोकर्णपुराणेचतुर्थोऽध्यायः ॥ ४ ॥
कुमारउवाच ॥ अयंमेसंशयस्तातसुचिरंमयिवर्तते ॥ श्रोतव्यंचेन्महादेवतद्ब्रूहिपरमेश्वर ॥ १ ॥ भ
वानेकःसमस्तेषुलोकेषुपरिवर्तते ॥ तात्किमर्थंसुरश्रेष्ठज्ञानिनःकुर्वतेपृथक् ॥ २ ॥ विष्णुरेकःप्रभुर्लो
केभूतभव्यभविष्यकृत् ॥ महदादिरनादिश्चसएवसदसत्परः ॥ ३ ॥ इतिवैज्ञानिनःकेचिद्वदंतिपुरु
षोत्तम ॥ ब्रह्माजगत्पतिःसाक्षान्नान्योऽस्तीत्यपरेविदुः ॥ ४ ॥ सकर्ताचविकर्ताचलोकानांप्रभुर
व्ययः ॥ आदौब्रह्मातथामध्येअंत्येब्रह्माचशाश्वतः ॥ ५ ॥ इतिकेचित्सुरश्रेष्ठवदंतिवदतांवर ॥ शि

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

वएवप्रभुर्लोकेभूतभव्यभविष्यकृत् ॥ ६ ॥ जगदादिरनादिश्चसएवमदसत्परः ॥ नान्योऽस्ति
दैवतंलोकेशिवादित्यपरेविदुः ॥ ७ ॥ इतित्रिधानुवर्ततेज्ञानिनोऽज्ञानिनस्तथा ॥ तेषांहिवदतांतात
श्रुत्वामेसंशयोमहान् ॥८॥ केषांवाक्यंगुरोसत्यमसत्यंकेषुवर्तते ॥ यथामेसंशयस्तातनिरस्यतिजगत्प्र
भो ॥ ९ ॥ तथात्वंब्रूहिभगवन्श्रोतव्यंयदिमेगुरो ॥ १० ॥ शंकरउवाच ॥ एतद्गुह्यंपरंपुत्रनवक्त
व्यंकथंचन ॥ पुत्रस्त्वंमेसुरश्रेष्ठशिष्यस्त्वंज्ञानकोविद ॥ ११ ॥ तस्माद्वक्ष्यामितेपुत्रयज्ज्ञात्वासिद्धि
माप्नुयात् ॥ सत्वंरजस्तमइतिगुणाःसंज्ञाधिकारिणः ॥ १२ ॥ देवानांवेद्यभावश्चएकमूर्तिर्नसंशयः ॥
वातःपित्तंश्लेष्मइतित्रिधादेहस्यसंस्थितिः ॥ १३ ॥ संज्ञास्त्रिधानुवर्त्ततेएकस्मिन्नेवदेहके ॥ संज्ञाः
पृथक्प्रवर्ततेतेषुधातुषुपुत्रक ॥ १४ ॥ पंचेंद्रियाणिवर्ततेपंचभूतानिपुत्रक ॥ एकंशरीरंबहुधासंज्ञा
भेदात्प्रवर्तते ॥ १५ ॥ तथापुत्रप्रवर्ततेमय्यप्येवंनसंशयः ॥ वातपित्तकफाःपुत्रशरीरस्थितयोमताः
॥ १६ ॥ एकनाशेहितत्क्षेत्रंविनाशमधिगच्छति ॥ एकोद्रेकेपिवैपुत्रबाधामुपगमिष्यति ॥ १७ ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

समत्वेवर्ततेयावत्तावत्तातशरीरकम् ॥ वैद्याःपित्तप्रशमनान्गुणान्शंसंतिपैत्तिकान् ॥१८॥ तथावातप्र
शमनान्गुणान्शंसंतिश्लेष्मजान् ॥ येत्रिधातुगुणान्विद्युस्तेवैद्यानात्रसंशयः ॥१९॥ सात्विकंराजसंचै
वतामसंचत्रिधाजगत् ॥ सर्वमेतत्सुरश्रेष्ठमच्छरीरेप्रवर्तते ॥ २० ॥ संज्ञयाभेदमिच्छंतिनमूर्तेर्भेदउ
च्यते ॥ ब्रह्मविष्णुशिवाख्याहिसंज्ञाममनसंशयः ॥ २१ ॥ संज्ञायथामदीयास्तास्तथाविष्णोरपिप्र
भोः ॥ ब्रह्मणश्चतथातावैसंज्ञाःप्रोक्तामनीषिभिः ॥ २२ ॥ वातपित्तश्लेष्मवैद्याभिषजस्तेयथासुख
म् ॥ तथातेज्ञानिनःपुत्रब्रह्मविष्णुशिवात्मकाः ॥ २३ ॥ एतद्गुणोपशमनातेवैद्यानात्रसंशयः ॥
तथैवमद्धातुभवान्देवान्यजतुपुत्रक ॥ २४ ॥ वातपित्तकफोद्भूताधातवस्तेशरीरिणः ॥ तथाभूताः
प्रवर्ततेत्रिधामय्यापिपुत्रक ॥ २५॥ गुणत्रयविभागेनसंज्ञाभेदेनचप्रभो ॥ ब्रह्माविष्णुःशिवश्चेतियजं
तेज्ञानिनोहिते ॥२६ ॥ एकमूर्तौत्रिधासंज्ञालोकेसंपरिवर्तते ॥ बहुधाचपुनःसंज्ञाशरीरावयवेऽपिच॥
॥ २७ ॥ तेषांवैसंज्ञयापुत्रयजंतेतेऽल्पबुद्धयः॥ तेषामपिहिसंसिद्धिर्भवेन्मद्याजिनोहिते ॥ २८ ॥ य

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

थाज्ञानंतथासिद्धिर्यथाज्ञानंतथाप्यसत् ॥ असत्सिद्ध्यासुरश्रेष्ठअधःपातोभवेद्ध्रुवम् ॥ २९ ॥ यथा
निदानराहितंभेषजंव्याधिवर्धनम् ॥ यदाकर्मक्षयंप्राप्यनिर्मलत्वमुपैष्यति ॥ ३० ॥ पचनाल्लेपनात्पेषा
च्छोषणादुदकादपि ॥ निर्मलत्वमुपैष्यंतिकर्तुरुत्साहतःपटाः ॥ ३१ ॥ तथासिद्धाभविष्यंतिक्षेत्रादा
चार्यसंश्रयात् ॥ ज्ञानात्पुराणदृष्ट्याचसतांसंगमनेनच ॥ ३२ ॥ शुश्रूषणरताःपुत्रसिद्धिंप्राप्स्यंतिवै
क्रमात् ॥ ब्रह्माविष्णुःशिवश्चेतिएकएवनसंशयः ॥ ३३ ॥ वातपित्तकफैर्यद्वच्छरीरग्रहणंसुत ॥ य
दाचात्मनिपश्यंतिएकमूर्तिंत्रिसंज्ञिताम् ॥ ३४ ॥ तदासमुक्तःपुरुषअभेदान्मुक्तिरुच्यते ॥ भेदोया
वद्भवेत्पुत्रतावन्मुक्तिंनगच्छति ॥ ३५ ॥ भेदबुध्याप्रवर्तंतेयावत्पुत्रसुरादयः ॥ तावत्कालंप्रवर्तंतेपु
नरावृत्तिलक्षणाः ॥ ३६ ॥ अभेदमात्मनोज्ञात्वातदामुक्तोनसंशयः ॥ वातश्लेष्मशरीरेषुनपित्तंनकफः ॥ १३ ॥
प्रभो ॥ ३७ ॥ इतियेवैकीर्तयंतितेषांवागनृतंभवेत् ॥ यथापित्तंतथाश्लेष्मस्तथावातंहिपुत्रक ॥ ३८ ॥
समानंयेप्रपश्यंतितेसंतोनात्रसंशयः ॥ शिवःप्रधानोभूतानांनब्रह्मानचकेशवः ॥ ३९ ॥ इतियेवैप्रप

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

श्यंतिनतेज्ञानस्यगोचराः ॥ मन्निंदयायजंतेयेविष्णुंत्रिभुवनेश्वरम् ॥ ४० ॥ नतेमुक्तिंगामिष्यंतिसं
साराब्धौपतंतिवै ॥ अवज्ञयावयोःपुत्रब्रह्माणंयेयजंतिच ॥ ४१ ॥ नतेज्ञानस्यविषयेवर्ततेसुचिरंसु
त ॥ ओमित्येकाक्षरंब्रह्मत्रीण्यासन्नक्षराणिवै ॥ ४२ ॥ अकारश्चतथोकारोमकारश्चेतिसंज्ञिताः ॥ ए
कत्वंतुयदाप्राप्तास्तदातत्प्रणवंविदुः ॥ ४३ ॥ पृथक्त्वेभिन्ननामानोनचोंकारोभविष्यति ॥ तद्द्गुणाः
स्वयंभूताब्रह्मविष्णुमहेश्वराः ॥ ४४ ॥ भिन्नानशक्तादातुंतेमुक्तिंवैकुक्कुटध्वज ॥ भिन्नबुध्यायजंते
तान्भक्तिभावेनयेगुह ॥ ४५ ॥ तेषामल्पतरासिद्धिःपुनरावृत्तिलक्षणा ॥ नतांसिद्धिंवदंत्यार्याज्ञानि
नस्तत्वदर्शिनः ॥४६॥ अज्ञानिनोहितांसिद्धिमवगच्छंतिपुत्रक ॥ गत्वागत्वानिवर्ततेभूत्वाभूत्वाचभुं
जते ॥४७॥ भुक्त्वाभुक्त्वाभविष्यंतिदुःखानामाकराहिते ॥ तस्माच्छुद्धस्वभावेनह्यद्वैतंभावयेद्बुधः
॥ ४८ ॥ यदासमत्वबुद्धिःस्यात्तदामुक्तोनसंशयः ॥ तदप्राप्यमपुण्यानांसंज्ञयावस्तुभेदिनाम् ॥४९॥
ब्रह्मविष्णुशिवाख्याहिममसंज्ञानसंशयः ॥ अहमेकस्त्रिधालोकेब्रह्मविष्णुशिवाख्यया ॥ ५० ॥ संज्ञया

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

भिन्नबुद्धीनांभविष्यामिनयोगिनाम् ॥ अबुद्धानांसुरश्रेष्ठमूर्तिभेदोनयोगिनाम् ॥ ५१ ॥ कार्यकर्ता
क्रियाचेतिसिद्धेःसाधनमुच्यते ॥ ब्रह्माविष्णुःशिवश्चेतिसिद्धेःपरमसाधनाः ॥ ५२ ॥ अहमेवजगत्सर्वं
नान्योऽस्तीतियदासुत ॥ मन्यतेयोद्विजोलोकेपरमात्मासउच्यते ॥५३॥ सएवविष्णुर्ब्रह्माचाशिवःसा
क्षात्सएवच ॥ अत्राप्युदाहरंतीममितिहासंपुरातनम् ॥ तत्तेऽहंसंप्रवक्ष्यामिशृणुष्वैकमनागुह ॥ ५४ ॥
इतिश्रीस्कांदेगोकर्णपुराणेमूर्त्यभेदकथनंनामपंचमोऽध्यायः ॥ ५ ॥ ॥ छ ॥ ॥ ॥
शंकरउवाच ॥ भृगोःख्यात्यांसमुत्पन्नोमृकंडुर्नामवैमुनिः ॥ सुमित्रानामतस्यासीद्भार्यापरमशोभना ॥
॥ १ ॥ तयोर्जज्ञेमहातेजाऋषिःपरमधार्मिकः ॥मार्कंडेयइतिख्यातःकृशानुसदृशप्रभः ॥ २ ॥ तंदृष्ट्वा
सुखितौजातौपितरौपरयामुदा ॥ तद्बांधवास्तथाचान्येहृष्टाआसन्महर्षयः ॥ ३ ॥ एवंसमुदितेका
लेवागुवाचाशरीरिणी ॥ मृकंडोतवपुत्रोऽयंषोडशाब्देमरिष्यति ॥ ४ ॥ इतिश्रुत्वातदावाक्यंदुःखितौ
तौबभूवतुः ॥ दुःखेनचक्रतुस्तस्यजातकर्मादिकाःक्रियाः ॥ ५ ॥ कालेगुरुकुलंनीतःपित्रातेनमहा ॥ १४ ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

त्मना ॥ तस्मिन्गुरुकुलेतातशुश्रूषापरमोऽभवत् ॥ ६ ॥ गुरोःप्रसादाद्वेदानांपारगःसंबभूवह ॥ सर्व विद्यासुनिष्णातःस्वगृहंपुन रागतः ॥ ७ ॥ अभिवाद्यपितुःपादौप्रांजलिश्चाग्रतःस्थितः ॥ द्वादशाब्द गतंपुत्रमागतंस्वगृहंपुनः ॥ ८ ॥ दृष्ट्वाननंदतुःपुत्रंसर्वज्ञंमुनिदंपती ॥ दुःखाश्रुभिन्नहृदयौसस्वजेतां पुनःपुनः ॥ ९ ॥ ततोऽब्रवीत्तौपितरौदुःखितौद्विजसत्तमः ॥ १० ॥ मार्कंडेयउवाच ॥ हर्षकालेकि मर्थंवांदुःखमत्यद्भुतंपितः ॥ श्रुतविद्यंकिमर्थंमांतप्यसेमातरीदृशम् ॥ ११ ॥ दुःखंयुवांमहाभागौश्रो तुमिच्छामितत्त्वतः ॥ श्रोतव्यंयदिमेतातब्रूहिकिंकारणंतव ॥ १२ ॥ मृकंडुरुवाच ॥ त्वयिजातेमु दावत्समातातवतपस्विनी ॥ सुमुखेत्वन्मुखेंदौसादृष्टिमुन्मील्यसूतके ॥ १३ ॥ मामाहपुत्रतेमातापु त्रोजातस्तवेतिवै ॥ ततोऽहंतत्कुटिंगत्वातववक्त्रांबुजंसुत ॥ १४ ॥ दृष्टवानस्मिभद्रंतेजातकर्मक्रिया परः ॥ आवयोरधिकादृष्टिस्त्वयिजातेतदाभवत् ॥ १५ ॥ ततोऽतरिक्षेवागुच्चैरशरीराब्रवीच्चमाम् ॥ मृकंडोतवपुत्रोऽयंषोडशाब्देमरिष्यति ॥ १६ ॥ तच्छ्रुत्वाहृदिविद्धोऽहंवज्रेणेवसुदुःखितः ॥ इदानीं

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

द्वादशसमावर्तंततत्रवैसुत ॥ १७ ॥ तदंकंस्मृत्यतेमातादुःखशोकवशंगता ॥ अहंचाप्यभवंपुत्रदुः
खोपहतचेतनः ॥ १८ ॥ एतस्मात्कारणात्पुत्रदुःखशोकवशंगतौ ॥१९॥ मार्कंडेयउवाच ॥ दुः खं
तेऽयपनेष्यामितथामातुर्नसंशयः ॥ यथामृत्युभयंनस्यात्तथैवाहंकरोम्यहम् ॥ २० ॥ इत्युक्त्वातौ
समाश्वास्यकृत्वाचापिप्रदक्षिणम् ॥ अभिवाद्यतयोःपादौपित्रादिष्टोययौगृहात् ॥ २१ ॥ प्राया
त्तपोवनंपुण्यंभृगोर्दिव्यमनुत्तमम् ॥ महद्भिर्मुनिभिःशिष्यैःस्वपत्नीभिश्चसेवितम् ॥ २२ ॥ प्रशां
तमृगभूयिष्ठंब्रह्मघोषैरलंकृतम् ॥ देदीप्यमानमनिशंहूयमानैश्चवन्हिभिः ॥ २३ ॥ तपःस्वाध्याय
निरतैर्योगिभिश्चनिषेवितम् ॥ मत्तद्विजसमाघुष्टंभ्रमद्भ्रमरमंडितम् ॥ २४ ॥ जातीकुरबकाशोककुं
दमंदारशोभितम् ॥ संमानैःकल्पवृक्षैश्चमंदारैर्हरिचंदनैः ॥ २५ ॥ अन्यैश्चविविधैर्वृक्षैःफलपुष्पाविन ॥ १५ ॥
म्रकैः ॥ लसत्कुमुदकल्हारपंकजैर्विमलांबुभिः ॥ २६ ॥ सरोभिरुरुतोयाभिःसरिद्भिरभितोवृतम् ॥
अंगैर्निरुक्तशिक्षाद्यैःसांगैःखिलनिषेवितम् ॥ २७ ॥ पुराणन्यायमीमांसाधर्मशास्त्रैःसमावृतम् ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

आश्रमंब्रह्मपुत्रस्यब्रह्मलोकमिवापरम् ॥ २८ ॥ तत्रासीनंमहात्मानंतपोराशिमकल्मषम् ॥ अद्राक्षी
दमरप्रख्यंभृगुमात्मपितामहम् ॥ २९ ॥ तत्पादकमलंभक्त्यासमभ्यर्च्याभिवाद्यच ॥ भृगवेस्वस्य
वृत्तांतंकथयामासतत्त्वतः ॥ ३० ॥ सतेनचाभ्यनुज्ञातस्तपस्तेपेसुदुश्चरम् ॥ मार्कंडेयोब्रह्मचर्यंव्रत
युक्तोनिरामयः ॥ ३१ ॥ मामेवमनसाध्यायन्मद्भक्तोमत्परायणः ॥ वाय्वंबुभक्षकोवर्षमेकंतत्राश्रमे
त्यगात् ॥ ३२ ॥ पंचाग्निमध्यगोऽप्येकंवर्षंतत्रात्यगात्पुनः ॥ तृतीयंचभ्रमन्नास्तेयत्रसायंनिवेशनः॥
॥ ३३ ॥ चतुर्थवत्सरेपुत्रवारणाशींजगामह ॥ तत्राश्रमपदंकृत्वागंगातीरेसुरोत्तम ॥ ३४ ॥ स्थं
डिलेमांसमावाह्यतत्रपूजांसमाचरत् ॥ शैवागमोक्तविधिनापूजयामासमांमुनिः ॥ ३५ ॥ तत्राजगा
मवैकालःकालेहंतुंमृकंडुजम् ॥ समुनिर्मृत्युमायांतंदृष्ट्वाभीतोऽभवत्तदा ॥ ३६ ॥ मामनुस्मृत्यमन
साधैर्येणास्तेमहामुनिः ॥ गतायुषमपिह्येनंनशक्तोहंतुमोजसा ॥ ३७ ॥ आराधयंतमनिशंभक्त्यामां
भक्तवत्सलम् ॥ एकदासौद्विजश्रेष्ठःशौचार्थंजान्हवींगतः ॥ ३८ ॥ तदाकालःसमभ्यागाद्गृहीतुंपा

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

शभृद्वली ॥ दृष्ट्वामृकंडुतनयःकालंमांशरणंगतः ॥३९॥ गृहीत्वाकलशंपूर्णमद्भिर्दृढमरिंदम ॥ मत्पा
दौचतदाध्यात्वामनसानिश्चलेनसः ॥ ४० ॥ ततोऽहंतस्यतपसाभक्त्याचानन्यपूर्वया ॥ क्षेत्रस्यच
प्रभावेणतस्यप्रत्यक्षतांगतः ॥ ४१ ॥ गंगांबुपूर्णकलशादहमुत्थायसत्वरम् ॥ अपश्यमंतिकेकालं
तंजिघृक्षंतमोजसा ॥ ४२ ॥ सपाशंपरशुव्यग्रंखड्गशूलधनुर्धरम् ॥ मदाज्ञालंघिनंपुत्रदृष्ट्वाक्रोधमुपे
यिवान् ॥ ४३ ॥ ममक्रोधाग्निनाकालोभस्मशेषोबभूवह ॥ हत्वाकालमहंदृष्ट्वामृकंडुतनयंमुनिम् ॥
॥ ४४ ॥ समाश्वास्याब्रुवंपुत्रक्षीणायुस्त्वंद्विजोत्तम ॥ मद्भक्त्याध्रियसेविप्रचरत्वंतपआयुषे ॥ ४५ ॥
तपसामहताविप्रपरितोषयकेशवम् ॥ सदास्यतिचतेविप्रआयुर्वैमनसेप्सितम् ॥ ४६ ॥ अनाराध्यज
गन्नाथंसर्वधातारमच्युतम् ॥ नकिंचिल्लभ्यतेपुत्रतस्मादाराधयाच्युतम् ॥ ४७ ॥ इत्युक्त्वादर्शनेनैव
मार्गेणाहंततोगतः ॥ गतेतदामयिसुततपस्तेपेसुदुश्चरम् ॥ ४८ ॥ मामेवमनसाध्यायन्नियतोऽनन्य
देवतः ॥ ब्रह्माणंलोककर्तारंविष्णुंभुवननायकम् ॥ ४९ ॥ अवमत्याधियाभक्त्यामामेवयजतेसदा ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तस्याहंविप्ररूपेणपुनर्दर्शनमागतः ॥ ५० ॥ वृद्धोतिवयसापुत्रयष्ट्याप्राणस्खलन्निव ॥ वालुकामुष्टि
मादायगंगायांक्षिप्तवानहम् ॥५१॥ पुनःपुनश्चमृन्मुष्टिमादायादायसत्वरम् ॥ क्षिप्यमाणंचमांदृष्ट्वामा
र्कंडेयोब्रवीद्वचः ॥ ५२ ॥ किमिदंतेद्विजश्रेष्ठमृन्मुष्टिःक्षिप्यतेंभसि ॥ भवताकिमभिप्रेतमुच्यतांका
रणंद्विज ॥ ५३ ॥ ततस्तमब्रुवंपुत्रवाचोहास्यंसहैतुकम् ॥ सेतुंबध्वागमिष्यामिपरंपारंद्विजोत्तम ॥
॥ ५४ ॥ लोकोपकारोभवतिसर्वेयास्यंतिसेतुना ॥ इतिमद्वचनंश्रुत्वामार्कंडेयोमहातपाः ॥ ५५ ॥
जहासोच्चैरिदंप्राहमामसौद्विजसत्तमः ॥ नशक्यतेद्विजश्रेष्ठवृथोत्साहस्त्वयोद्यतः ॥ ५६ ॥ अति
वेगप्रवाहेयंगंगाहिमवतःसुता ॥ शक्तियुक्तैरप्यशक्यमशक्तेनत्वयाकुतः ॥ ५७ ॥ वृद्धस्त्वंवयसाविप्र
शिथिलानींद्रियाणिते ॥ तस्माद्विरमविप्रर्षेत्वदुत्साहोनिरर्थकः ॥ ५८ ॥ तच्छ्रुत्वातमहंविप्रमिदमित्य
ब्रुवंपुनः ॥ तथातेविप्रशार्दूलनिरर्थकमिदंतपः ॥ ५९ ॥ अवमत्यहृषीकेशमनाराध्यजगत्पतिम् ॥
केशवंपुंडरीकाक्षंनप्राप्यंतेमनोरथाः ॥ ६० ॥ तस्मान्निरर्थकंकर्मविहायान्यत्समाचर ॥ क्षीणायुस्त्वं

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

द्विजश्रेष्ठरुद्रंपरिचरिष्यासि ॥ ६१ ॥ अवज्ञयाकेशवस्यमृत्योस्त्वंवशमेष्यासि ॥ तस्मादुत्सृज्यवैरुद्रं
विष्णुमाराधयाव्ययम् ॥ ६२ ॥ इत्थंमयोदितंश्रुत्वाचुकोपमुनिपुंगवः ॥ क्रोधान्निर्भर्त्सयामासमामि
त्थंद्विजरूपिणम् ॥६३॥ धिक्त्वांपापसमाचारंवृद्धंब्राह्मणरूपिणम् ॥ विनिंद्यदेवदेवेशंशंकरंभक्तव
त्सलम् ॥ ६४॥ विष्णुंप्रशंससेमूढनतेप्रज्ञाप्रतिष्ठिता ॥ इतितस्यवचःश्रुत्वाममचापिसुरोत्तम ॥ ६५॥
उत्पन्नःसहसाक्रोधोहर्षश्चापिनिबोधतत् ॥ ६६ ॥ इतिश्रीस्कांदेगोकर्णपुराणेषष्ठोऽध्यायः ॥ ६ ॥
शंकरउवाच ॥ भक्त्यामय्यनपायिन्यानिंदयाकेशवस्यतु ॥ दृष्टोरुष्टश्चनितरामहमित्यब्रुवंपुनः ॥ १ ॥
नजानीषेऽल्पबुद्धिस्त्वंविष्णुंत्रिभुवनेश्वरम् ॥ देवदेवंश्रियाकांतमनाराध्यसुदुर्मते ॥ २ ॥ सिद्धिमिच्छ
सिपापिष्ठनकिंचिल्लभ्यतेत्वया ॥ स्वर्गमैश्वर्यमायुश्चमोक्षश्चापिनसंशयः ॥ ३ ॥ तस्मादाराधयविभुं
विष्णुंविश्वेश्वरंद्विज ॥ इत्युदीरितमाकर्ण्यमामाहेदंमृकंडुजः ॥ ४ ॥ कर्तापाताचहर्ताचशिवएव
नसंशयः ॥ सआदिःसर्वभूतानांदेवानांचसुरोत्तमः ॥ ५ ॥ वेदेषुगीयतेशंभुःपुराणेषुचसप्रभुः ॥ स

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

एकःसर्वभूतेषुमाययापरिवर्तते ॥ ६ ॥ सएकएवनान्योऽस्तीत्येवमाहुस्तपस्विनः ॥ तमाराध्यसुराः
सर्वेगंधर्वायक्षराक्षसाः ॥ ७ ॥ नागाःसुपर्णाप्सरसःसर्वेप्राप्तामनोरथान् ॥ नाहंतमुत्सृज्यविभुमन्य
माराधयामिभो ॥ ८ ॥ कोभवान्द्विजरूपेणबुद्धिमाकर्षसेमम ॥ योवाकोवानमस्तुभ्यंक्षम्यतांगम्य
तामितः ॥ ९ ॥ ततोऽहंदर्शयामासस्वरूपंकुक्कुटध्वज ॥ दृष्ट्वामामाहविप्रोऽसौप्रणम्याशिरसातदा
॥१०॥ मार्कंडेयउवाच ॥ देवदेवनमस्तेस्तुविश्वमूर्तेनमोस्तुते ॥ त्वमेवजगतांधाताविधाताविश्वभाव
नः॥ ११ ॥ संहर्ताजगतामंतेनमस्तुभ्यंत्रिमूर्तये ॥ अज्ञानादथवाज्ञानात्त्वयिभक्त्याचशंकर ॥ १२ ॥
दुरुक्तंयन्मयादेवक्षम्यतांभक्तवत्सल ॥ इत्युक्तोऽहंमहाभागःशंकरःशरणागतम् ॥ १३ ॥ इदमाह
महाभागमार्कंडेयंपरंतपाः ॥ कालेहिसर्वभूतानांमृत्युर्भवतिपुत्रक ॥ १४ ॥ मयासृष्टानिभूतानि
मृत्युश्चापिमयाकृतः ॥ त्वन्निमित्तंमयासोऽयंनिहतःकालएवच ॥ १५ ॥ क्षीणायुस्त्वंद्विजश्रेष्ठआयु
ष्काम्यंसमाचर ॥ मदीयेनोपदेशेनमयासार्धंद्विजोत्तम ॥ १६ ॥ ममशक्तिमयंविष्णुमाराधयमहाम

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ते ॥ शक्तियुक्तोददेल्लोकोवांछितंभजतांद्विज ॥ १७ ॥ नशक्नुवंतिवैकर्तुंसदेवासुरमानवाः ॥ श
क्तिहीनंशरीरंतुनिःसारमितिबुध्यताम् ॥ ममशक्तिरसौविष्णुःशरीरंतस्यमांविदुः ॥ १८ ॥ अवमत्य
शरीरस्थांशक्तिंकिंनामसाधयेत् ॥ तथाविष्णुमयंरुद्रंभजन्मांद्रोहकृन्मम ॥ १९ ॥ निर्मथ्यमानेदधिनि
नवनीतमुदाश्विनः ॥ यथाप्रधानंजगतिसमंहितदसारवत् ॥ २० ॥ हृदयंमेविनिर्मथ्यनगदादौद्विजो
त्तम ॥ आत्मनात्मानमनघसंक्षोभ्योन्मत्तवद्द्विज ॥ २१ ॥ साध्याव्रीहिक्रियापुत्रसाधनास्तेनसंशयः ॥
साध्याप्राप्तौसाधनानिनप्रशंसंतिपुत्रक ॥ २२ ॥ किंतुतस्मिन्फलेपुत्र द्विजाद्याहेतवःस्मृताः ॥ तथा
वामुंसुराःसर्वेसात्विकस्यचहेतवः ॥ २३ ॥ यथासौसर्वभूतेषुविष्णुर्भवतिपुत्रक ॥ तदारजस्तमश्चैव
मूलंरक्षतिसात्विकम् ॥ २४ ॥ विष्णुमूलमहंपुत्रब्रह्माचद्विजसत्तम ॥ तस्माद्विष्णुःप्रधानोऽभून्नाहं
ब्रह्मासुरोत्तम ॥ २५ ॥ अशक्तोऽहमसारत्वाद्दातुंभिन्नधियांफलम् ॥ आवयोर्भेदकृन्मर्त्यःसदानरक
भाग्भवेत् ॥ २६ ॥ अवमन्यहृषीकेशंमांयजन्मांविनिंद्यच ॥ विष्णुमाराधयन्कृच्छ्रादागस्कृदुभयो

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

रपि ॥ २७ ॥ तस्मात्त्वंमत्प्रसादेनविष्णुभक्तोभविष्यसि ॥ भेदकर्त्रीमहामायायोगिनामपिमोहिनी
॥ २८ ॥ संसारदुःखदानृणांभवतोनिःसरत्विह ॥ इत्युक्तमात्रेदेवेशेमयातस्यमहामुनेः ॥ २९ ॥ मा
यात्रैलोक्यवितत्तामोहनीयाभत्युत ॥ संत्यज्यवैष्णवींविप्रमाज्ञयाममसत्तम ॥ ३० ॥ देहात्तदीयान्नि
र्गम्यसिद्धोऽसीतिननामतम् ॥ तामाहभार्गवःपुत्रदेवदेवस्यसन्निधौ ॥ ३१ ॥ यश्चेदंपठतेनित्यंयश्चानि
त्यंशृणोतिच ॥ तयोर्देविनगंतव्यंयदिमत्प्रियमिच्छसि ॥ ३२ ॥ तथेतिसावरंदत्वायथाकामंजगाम
ह ॥ मार्कंडेयोपितपसासिद्धिंप्राप्याव्ययःपुनः ॥ ३३ ॥ तुष्टावप्रणतोभूत्वाशर्वंसर्वगतंमुनिः ॥
॥ ३४ ॥ मार्कंडेयउवाच ॥ प्रसीददेवदेवेशप्रपन्नार्तिविनाशन ॥ परमात्मन्परंधामपवित्रंपरमंभ
वान् ॥३५॥ यन्माययाजगत्सर्वंमोहितंसुरसत्तम ॥ त्वंमोहकोऽसिदेवेशनमस्तेमोक्षदायिने ॥ ३६ ॥
त्वमेकःसर्वदेवानांबीजंचाप्यविनाशिवै ॥ त्वान्नजानंतिभगवन्मायया तवमोहिताः ॥ ३७ ॥ द्वैताद्वै
तस्वरूपस्त्वमभेदोभेदकृद्विभुः ॥ परंज्योतिरचिंत्यात्माज्ञेयस्त्वंज्ञानभावतः ॥ ३८ ॥ अरूपस्त्वंस्व

४

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

रूपस्त्वंविश्वरूपनमोस्तुते ॥ अणोरणीयांस्त्वंदेवमहतोऽपिमहानभूः ॥ ३९ ॥ दिव्यमूर्तेनमस्तेऽ
स्तुसदसद्रूपिणेनमः ॥ ब्रह्मात्वंलोककर्तृत्वेविष्णुस्त्वंपालनेभुवः ॥ ४० ॥ संहाररुद्ररूपोऽसिनम
स्तुभ्यंत्रिमूर्तये ॥ योगशास्त्रविधानज्ञयोगिध्येयजगन्मय ॥ ४१ ॥ मातृमानप्रमेयात्मन्प्रमाणा
दिगोचर ॥ नमनोगोचरस्त्वंवैनशब्दस्यापिगोचरः ॥ ४२ ॥ भक्तानुकंपयादेवममप्रत्यक्षतांगतः ॥
आयुर्मेनास्तिभगवन्तस्मादायुःप्रयच्छमे ॥ ४३ ॥ इतिस्तुतोथभगवान्मार्कंडेयेनधीमता ॥ प्रोवा
चेदंमहादेवोमार्कंडेयमिदंतदा ॥४४॥ शिवउवाच ॥ गच्छगोकर्णमद्यैवमन्नियोगाद्द्विजोत्तम ॥ रुद्र
योन्याःपूर्वभागेधर्माश्रमसमीपतः ॥ ४५ ॥ यत्रधर्मःपुरातत्रतपस्तेपेसुदुश्चरम् ॥ सिद्धिंप्राप्यसुपू
ज्योऽभूत्सिद्धानांसमहायशाः ॥ ४६ ॥ गत्वातत्रत्वमपित्रैविष्णुमाराधयाव्ययम् ॥ तवयावत्सुरश्रेष्ठः
साक्षात्प्रत्यक्षमेष्यति ॥ ४७ ॥ तदाहमागामिष्यामीत्युक्त्वाचांतरधीयत ॥ ४८ ॥ इतिश्रीस्कांदेगो
कर्णपुराणेसप्तमोऽध्यायः ॥ ७ ॥ ॥ छ ॥ ॥ ॥ ॥ ॥ ॥ ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

शंकरउवाच ॥ ततोमृकंडुतनयस्तदानीमेवसुव्रत ॥ जगामासिद्धमार्गेणगोकर्णक्षेत्रमुत्तमम् ॥ १ ॥
तत्राश्रमपदंकृत्वाधर्माश्रमसमीपतः ॥ तपस्तप्स्यन्निराहारस्तत्रोवासचतुर्युगम् ॥ २ ॥ अंगुष्ठद्वित
याग्रेणप्रविष्टोऽह्यवनीतलम् ॥ संनियम्यैंद्रियग्राममंमनसाराधयन्हरिम् ॥ ३ ॥ नियतश्चनिराहारोनासाग्रन्य
स्तलोचनः ॥ गुरूपदिष्टविधिनातपस्तेपेसुदुश्चरम् ॥ ४ ॥ घोरेणतपसातस्यतुतोषभगवान्हरिः ॥ आ
विर्बभूवदेवेशःशंखचक्रगदाधरः ॥ ५ ॥ श्रीवत्सांकंचतुर्बाहुंशार्ङ्गधन्वानमच्युतम् ॥ तुष्टावावनतोभू
त्वाविष्णुंविश्वेश्वरंद्विजः ॥ ६ ॥ मार्कंडेयउवाच ॥ नारायणनमस्तेस्तुनमस्तेनररूपिणे ॥ नमस्ते
मत्स्यरूपायकूर्मरूपायतेनमः ॥ ७ ॥ नमोवराहरूपायनृसिंहायनमोनमः ॥ वामनायनमस्तेऽस्तुत्रि
विक्रमनमोऽस्तुते ॥ ८ ॥ रामायरामरूपायनमस्तेरामरूपिणे ॥ श्रीकृष्णायनमस्तेऽस्तुनमस्तेबौद्धरूपिणे
॥ ९ ॥ कल्कीरूपनमस्तेस्तुनमस्तेकमलापते ॥ ममयोनेनमस्तेस्तुनमस्तेकमलेक्षण ॥ १० ॥ नमस्तेके
शिमथनेनमस्तेमधुसूदन ॥ गोविंदायनमस्तेस्तुश्रीधरायनमोनमः ॥ ११ ॥ पद्मनाभनमस्तेस्तुहृषीकेश

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

नमोस्तुते ॥ दामोदरनमस्तेस्तुदानादानस्वरूपिणे ॥ १२ ॥ हव्यवाहनमस्तेस्तुनमस्तेहव्यरूपिणे ॥ मंत्ररूपनमस्तेस्तुमंत्राक्षरनमोनमः ॥ १३ ॥ वेदरूपनमस्तेस्तुवेदोपनिषदेनमः ॥ सांख्यरूपनमस्ते स्तुनमस्तेयोगरूपिणे ॥ १४ ॥ सिद्धांतरूपिणेनित्यंनमस्तेसिद्धरूपिणे ॥ गंधघ्राणस्वरूपायचक्षु रूपात्मनेनमः ॥ १५ ॥ शब्दस्तोत्रस्वरूपायरसजिव्हात्मनेनमः ॥ नमस्त्वक्स्पर्शरूपायनमोह्या काशरूपिणे ॥ १६ ॥ वायुतेजस्वरूपायमेघभूम्यात्मनेनमः ॥ सत्यज्योतिःस्वरूपायनमोऽरूपाय तेनमः ॥ १७ ॥ वाक्पाणिपादरूपायपायूपस्थात्मनेनमः ॥ नमःशुद्धायशांतायक्रूराक्रूरायतेनमः ॥ ॥ १८ ॥ शुद्धिबुद्धिप्रबोधायद्वैताद्वैतायतेनमः ॥ मनुष्यरूपिणेनित्यंनमोदेवासुरात्मने ॥ १९ ॥ प क्षिरूपनमस्तेस्तुगंधर्वाप्सरसात्मने ॥ नागरूपनमस्तेस्तुनमोवृक्षादिरूपिणे ॥ २० ॥ सर्वात्मनेनमस्ते स्तुसर्वज्ञायनमोनमः ॥ शरणंभवमेदेवमृत्योर्भीततरस्यच ॥ २१ ॥ सह्यासह्यामयादेवज्ञानतोज्ञानतो पिवा ॥ ब्रह्मचापल्यतोवापिमयाधृष्टमुदीरितम् ॥ २२ ॥ तत्सर्वंक्षम्यतांदेवभक्तप्रियनमोस्तुते ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

॥ २३ ॥ नारदउवाच ॥ इतिस्तुतोऽथभगवान्विश्वरूपधरोहरिः ॥ प्रीतिमानब्रवीद्देवोमार्कंडेयमि
दंवचः ॥ २४ ॥ प्रीतोऽस्मितेमहाभागवरंब्रूहियथेप्सितम् ॥ इत्युक्तोदेवदेवेनरुद्रंसंस्मारसाद्विजः ॥
॥ २५ ॥ आजगाममहादेवोमार्कंडेयादिदृक्षया ॥ तमायांतमभिप्रेक्ष्यदूराद्ब्रह्मऋषिस्तदा ॥ २६ ॥
ववंदेशिरसाभक्त्यादेवदेवमुमापतिम् ॥ तस्मिन्तथावर्तमानेब्रह्मालोकपितामहः ॥ २७ ॥ आजगा
मविशुद्धात्माज्ञात्वारुद्रमनोगतम् ॥ आगत्यभगवान्ब्रह्माप्राहाविष्णुमिदंवचः ॥ २८ ॥ ब्रह्मोवा
च ॥ श्रूयतांभोसुरश्रेष्ठशंखचक्रगदाधर ॥ असौभक्तोममविभोमार्कंडेयोमहातपाः ॥ २९ ॥ गता
युरपिविप्रोऽसौरुद्रभक्त्याद्यजीवति ॥ जन्मायुतंदेवदेवत्वामाराधितवान्पुरा ॥ ३० ॥ तस्मात्प्रदत्तं
रुद्रेणमनसास्यमहामते ॥ अजरामरतांदेवत्वत्तःकांक्षन्नसौद्विजः ॥ ३१ ॥ तस्मात्त्वमपिदेवेशआयुर
स्मैप्रसादय ॥ ३२ ॥ विष्णुरुवाच ॥ अजरामरत्वंविप्रेंद्रमत्प्रसादाद्भविष्यति ॥ दत्तंमयापूर्वमेवाशि
वभक्त्याद्विजोत्तम ॥ ३३ ॥ यःशिवंभजतेनित्यंसाविष्णुंनात्रसंशयः ॥ योमांभजातिविप्रेंद्रसरुद्रंनात्रसं

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

शयः ॥ ३४ ॥ शिवःशरीरंमेविप्रशक्तिश्चाहंशरीरके ॥ ममापिलोककर्तायंब्रह्मालोकपितामहः ॥
॥ ३५ ॥ एवंत्रिधाहिविप्रर्षेब्रह्माविष्णुमहेश्वराः ॥ पक्षपाताद्भजंतेयेनतेमोक्षस्यगामिनः ॥ ३६ ॥ भे
दबुध्याप्रवर्ततेयावद्येचनराभुवि ॥ संसारघोरनरकेप्रवर्ततेचनित्यशः ॥ ३७ ॥ विष्णुःश्रेष्ठःशिवश्चे
तियेवदंतिनराधमाः ॥ तेषांत्वथोयमस्तातपापिष्ठास्तेनसंशयः ॥ ३८ ॥ येरुद्रंपूजयिष्यंतितेमद्भक्ता
नसंशयः ॥ येमामर्चंतिसततंतेरुद्रंनात्रसंशयः ॥ ३९ ॥ आवामभेदतःसम्यग्येयजंतिनरोत्तमाः ॥ ते
परंब्रह्मपश्यंतिआवयोर्दैवतंहिते ॥ ४० ॥ तस्मादभेदबुद्धेस्तेकिंददामिब्रवीहितत् ॥ ४१ ॥ मार्क
डेयउवाच ॥ इदंममाश्रमंपुण्यंगोकर्णेपुरुषोत्तम ॥ त्वत्प्रसादात्सुरश्रेष्ठपूज्यंभवतुसर्वतः ॥ ४२ ॥
इतितस्मैवरंदत्वाब्रह्माविष्णुमहेश्वराः ॥ सर्वेवरंददुस्तस्मैयथातेनाभिवांछितम् ॥ ४३ ॥ आश्रमंते
द्विजश्रेष्ठलोकेख्यातिंगमिष्यति ॥ पुण्येश्वराभिधानेन।त्रिविष्टपसमंभवेत् ॥ ४४ ॥ अत्रागत्यद्विज
श्रेष्ठकृत्वास्नानंयथाविधि ॥ मार्केडेयन्हदेपुण्येपवित्रेपापनाशने ॥ ४५ ॥ ॥स्तवेनानेनमांभक्त्यापूजये

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

च्छिवसंनिधौ ॥ तस्यात्रिजन्मचरितमल्पंवायादिवाबहु ॥ ४६ ॥ पापंप्रक्षयमायातुमत्प्रसादाद्विजो
त्तम ॥ वैष्णवस्यचयज्ञस्यफलंप्राप्नोतिसाद्विजः ॥४७॥ सुवर्णवस्त्ररौप्यादिअत्रस्थोयःप्रयच्छति॥ यथाश
क्तिद्विजातिभ्योवैशाखेमासिपुत्रक ॥ ४८ ॥ सनरोविविधान्भोगान्भुंक्तेवैशाश्वतीःसमाः ॥ अस्मि
न्पुण्याश्रमेतातपंचत्वमुपयांतिये ॥ ४९ ॥ तेरुद्रलोकंसंप्राप्यमोदंतेशिवसन्निधौ ॥ दानमस्मिन्द्वि
जश्रेष्ठसहस्रगुणितंभवेत् ॥ ५० ॥ तथाहोमजपादिश्चभक्तितोविप्रभोजनम् ॥ ५१ ॥ नारदउवा
च ॥ इतितस्मैवरंदत्वाब्रह्मविष्णुमहेश्वराः ॥ तत्रैवांतर्दधुःसर्वेअभिन्नाभिन्नदर्शनाः ॥५२ ॥ मार्कंडे
योऽपिभगवान्यथाकामंजगामह ॥ एतदेवद्विजश्रेष्ठआश्रमंपुरतस्तव ॥ ५३ ॥ मार्कंडेयन्हदंनाम
तीर्थंत्रैलोक्यविश्रुतम् ॥ देवाअपिहिकांक्षंतेस्नानंतत्रद्विजोत्तम ॥ ५४ ॥ एतत्तेसर्वमाख्यातंब्रह्मर्षेश्च
रितंमहत् ॥ क्षेत्रस्यचप्रभावंचकिमन्यच्छ्रोतुमिच्छसि ॥ ५५ ॥ संवर्तकउवाच ॥ कार्तिकेयोमहा
तेजाःश्रुत्वाशार्वंरितंवचः ॥ वैवस्वतांतेभगवान्किमकार्षीत्तदुच्यताम् ॥ ५६ ॥ नारदउवाच ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

श्रुत्वाह्यभेदंस्कंदोऽपिदेवदेवादुमापतेः ॥ तंप्रणम्यमहादेवंगोकर्णंप्रययौतदा ॥ ५७ ॥ गत्वातीर्थ
वरंतस्मिन्कुमारेश्वरमभ्यगात् ॥ त्रयोदशकुमारावैतत्रसिद्धिमुपागताः ॥ ५८ ॥ ताम्रगौर्याःपूर्व
भागेकिंचिदीशान्यतःस्थितम् ॥ स्रोतसामुत्तमातत्रताम्रगौरीतिविश्रुता ॥ ५९ ॥ गंगाभगीरथस्तु
तापपाताकाशतःपुरा ॥ ताम्रगौरीगिरौतातगौरीगंगामहाव्रता ॥ ६० ॥ तांदृष्ट्वाचकमेदेवउ
पयेमेचतांपुनः ॥ तस्यास्तीरेद्विजश्रेष्ठदेवंत्रिभुवनेश्वरम् ॥ ६१ ॥ आराध्यसिद्धिमगमत्कुमारोऽ
पिद्विजोत्तम ॥ कार्तिकेपौर्णमास्यांतुनक्षत्रंकृतिकायदा ॥ ६२ ॥ तस्मिन्दिनेदेवदेवःसाक्षाद्गंगाध
रःशिवः ॥ प्रत्यक्षतस्तुभगवान्पूजामुपहरिष्यति ॥ ६३ ॥ तस्मिन्कालेद्विजवरस्नात्वातीर्थेगुहोद
के ॥ यःशिवंपूजयेद्विप्रसरुद्रत्वमवाप्नुयात् ॥ ६४ ॥ स्नापयित्वातुतल्लिंगंपंचामृतरसैःशुभैः ॥ गं
धपुष्पादिभिश्चैवनैवेद्यैर्विविधैरपि ॥ ६५ ॥ भोजयित्वाद्विजवरानद्वैतंभावयेद्बुधः ॥ शक्त्याचदाक्षि
णांदत्वामंत्रोजप्यःषडक्षरः ॥ ६६ ॥ बलिंदत्वादिक्पातिभ्यःपुराणश्रवणंचरेत् ॥ नक्तभोजीभवेद्य

॥ २२ ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

स्तुतस्यपुण्यफलंशृणु ॥ ६७ ॥ निष्कमेवतुकुर्वाणोमुक्तिंप्राप्नोत्यसंशयम् ॥ यंयंकामयतेकामंतंतमा
प्नोतिनिश्चितम् ॥ ६८ ॥ त्रिसप्तकुलमुद्धृत्यरुद्रलोकंसगच्छति ॥ तावत्कालंक्रीडयित्वायावच्चं
द्रदिवाकरौ ॥ ६९ ॥ चक्रवर्तीभवेद्भूमौदिव्यज्ञानसमान्वितः ॥ पुराहिदारुणोनामपार्थिवोवंगदेश
जः ॥ ७० ॥ स्वराज्याद्भ्रंशितःसोऽपितत्रतप्त्वामहत्तपः ॥ शंभोरनुग्रहाद्राजास्वराज्यंपुनराप्तवान् ॥
भुक्त्वाभोगान्बहुविधान्शिवलोकमवापच ॥ ७१ ॥ इतिश्रीस्कां० गो० पु० अष्टमोऽध्यायः ॥ ८ ॥
संवर्तकउवाच ॥ आकाशगंगाभगवन्किमर्थंकन्यकासती ॥ पपातपर्वतेतास्मिन्देवीत्रैलोक्यपावनी
॥ १ ॥ उपयेमेकथंतांवैभगवान्वृषभध्वजः ॥ यदर्थंतात्रतलतातन्मेविस्तरतोवद ॥ २ ॥ नारदउ
वाच ॥ हव्यवाहःपुराविप्रतपस्तेपेसुदुश्चरम् ॥ तस्मिन्गिरौसुरश्रेष्ठःसिद्धिकामःपरात्परः ॥ ३ ॥
ज्वालयासहितोदेवोभृगुशापेनदुःखितः ॥ तदाभृगुर्महातेजादिव्यद्वादशवर्षकम् ॥ ४ ॥ अग्निर्भूत्वा
स्वयंहव्यंकव्यंचबुभुजेमुनिः ॥ तावत्कृशानुर्भगवान्गिरेस्तस्यद्विजोत्तम ॥ ५ ॥ अधोभागंप्रविश्यै

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

वास्थित्वाताम्रतलस्यतु ॥ ऊर्ध्वमुत्क्षिप्यचात्मानंबलिंकृत्वाविधानतः ॥ ६ ॥ निवार्यवातंत्वर्षंचपद्मा
सनगतःशुचिः ॥ अज्ञातःसर्वभूतानांध्यानमास्तेविभावसुः ॥ ७ ॥ तुतोषतस्यभगवान्ब्रह्मालोकपि
तामहः ॥ आगत्यतत्रचोवाचवरंब्रूहीतितंविभुः ॥ ८ ॥ दृष्ट्वाऽथयाशोब्रह्माणंननामशिरसाविभुम् ॥
प्रणिपत्याहदेवेशंशप्तोऽहंभृगुणापुग ॥ ९ ॥ सर्वभक्षोभवड्डातितस्यमोक्षंप्रसादय ॥ १० ॥ ब्रह्मोवा
च ॥ द्विधाभवमहातेजामत्प्रसादाद्विभावसो ॥ ज्वालयादह्यतांसर्वंज्वालामालीभविष्यसि ॥ ११ ॥
ज्वालाधक्ष्यतितेपुत्रसर्वभूतानिसर्वदा ॥ अदृश्यस्त्वंदिव्यमूर्तिर्मत्प्रसादाद्भविष्यसि ॥ १२ ॥ येपश्यं
तितवस्थानंतेमुक्तानात्रसंशयः ॥ मंत्रेणावाह्यसत्कृत्यहव्यंयेजुव्हातित्वयि ॥ १३ ॥ तदाहारंभवत्त्वा
शुदेवानांनान्यथाभवेत् ॥ कव्यंवात्वयिदेवेशमंत्रात्क्षिप्तंविभावसौ ॥ १४ ॥ तत्पितॄणांभवेत्पुत्रआ
हारममृतोपमम् ॥ त्वमेवादिर्मत्प्रसादात्सिद्धःसर्वगतोभव ॥ १५ ॥ यावच्चरिष्यसेपुत्रभूतेषुसुरसत्त
म ॥ तावज्जीवतितद्भूतंत्वद्वियोगेमरिष्यति ॥ १६ ॥ त्वमात्माममवैपुत्ररुद्रस्त्वंविष्णुरेवच ॥ त्वाम

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

नाराध्यवैपुत्रनप्राप्यमिहकिंचन ॥ १७ ॥ स्वर्गवामोक्षमथवाऐश्वर्यंचापिमानद ॥ नारदउवाच ॥
॥ १८ ॥ इत्थंप्राप्यवरानिष्ठ्वासिद्धिंप्राप्यविभावसुः ॥ तस्माद्विलाद्विनिष्क्रम्यब्रह्माणमिदमब्रवीत् ॥
॥ १९ ॥ अग्निरुवाच ॥ त्वत्प्रसादाद्देवदेवकृतार्थोऽस्मिसुरेश्वर ॥ अत्रागत्यसुरश्रेष्ठयजंतेमामकल्मषाः॥
॥ २० ॥ तेषांवैमत्प्रसादेनइष्टसिद्धिर्भवेत्सदा ॥ २१ ॥ ब्रह्मोवाच ॥ मत्प्रसादात्सुरश्रेष्ठसर्वमुक्तंभ
विष्यति ॥ कार्तिकेमासिवैपुत्रपूर्वानंदामहातिथिः ॥ २२ ॥ तवदत्तामयावन्हेतिथीनामुत्तमाहिसा॥
तस्मिन्दिनेतवविभोपूजांयोवाकरिष्यति ॥ २३ ॥ तस्याभिलषितंसर्वंमत्प्रसादाद्भविष्यति ॥ स्ना
त्वातीर्थेतवविभोसमिद्भिश्चरुणाज्यकैः ॥ २४ ॥ मंत्रेणानेनवैदेवआदित्योदयनेहुनेत् ॥ ॐअग्नयेस्वा
हा ॥ अग्नयेवैश्वानरायस्वाहा ॥ अग्नयेहव्यवाहनायस्वाहा ॥ अग्नयेकव्यवाहनायस्वाहा ॥ इंद्रा
ग्निभ्यांस्वाहा ॥ ब्रह्मणेस्वाहा ॥ विश्वेभ्योदेवेभ्यःस्वाहा ॥ व्याहृतिभिश्च ॥ एतैर्मंत्रैःसुरश्रेष्ठहुत्वा
ग्नौविधिवत्पुनः ॥ २५ ॥ सुवर्णदक्षिणांदद्याद्यथाशक्तिमहामते ॥ ब्राह्मणायविनीतायश्रोत्रियाय

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

कुटुंबिने ॥ २६ ॥ एवंकरोतियःपुत्रतस्यपुण्यफलंशृणु ॥ अश्वमेधंक्रतुवरंकृत्वाचैवोक्तदक्षिणम् ॥
॥ २७ ॥ सततफलमवाप्नोतिमत्प्रसादान्नसंशयः ॥ पितरस्तस्यवैपुत्रनाकपृष्ठंप्रयांतिच ॥ २८ ॥

तस्मिन्दिनत्रयेस्नानंकृत्वामत्परमोभवेत् ॥ तेषांत्रिजन्मचरितंपापंनश्यतितत्क्षणात् ॥ २९ ॥ दानं
होमंजपंचैवतस्मिन्तीर्थेकृतंसुत ॥ एकंकोटिर्भवत्याशुमत्प्रसादान्नसंशयः ॥ ३० ॥ इतितस्मैवरंद
त्त्वाब्रह्मालोकपितामहः ॥ तत्रैवांतर्दधेदेवःसहसिद्धैर्महात्मभिः ॥ ३१ ॥ नारदउवाच ॥ अग्निकुंड
मितिप्रोक्तंतीर्थंतत्रविभावसोः ॥ गिरेरधस्तात्संजातंसर्वपापप्रणाशनम् ॥ ३२ ॥ रहस्यंतंनजानंतिम
नुष्याःपापकर्मिणः ॥ तस्मात्ताम्रतलाख्योहिपर्वतोद्विजसत्तम ॥ ३३ ॥ अधस्तादाग्निदाहेनतामप
र्णमभूत्तलम् ॥ तस्मात्ताम्रतलंनामगोशृंगंचेतितंविदुः ॥ ३४ ॥ संवर्तकउवाच ॥ अस्मिन्गिरौद्वि
जश्रेष्ठकिमर्थंजन्हुनंदना ॥ पपाताकाशगाविप्रतन्मेवदमहामुने ॥ ३५ ॥ किमर्थंचकमेतांवैदेवदे
वःपिनाकधृक् ॥ नारदउवाच ॥ शृणुतस्यास्तथोत्पत्तिंगंगायाद्विजसत्तम ॥ ३६ ॥ ब्रह्माजगत्पतिः

॥ २४ ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

पूर्वसिद्धिकामःप्रजापतिः ॥३७॥ निर्मलेनैवमनसाध्यानमास्तेमहामतिः ॥ बद्धपद्मासनोदेवःसंयता
त्माजितेंद्रियः ॥ ३८॥ पद्मासनास्थितस्तावद्ध्यायतःपरमेष्ठिनः ॥ उत्तानेदक्षिणेपाणौबभूववरवर्णि
नी ॥ ३९ ॥ तांदृष्ट्वाभगवान्ब्रह्मारुद्रकांताभविष्यसि ॥ ततःसाचक्रमेतंवैरुद्रंत्रिभुवनेश्वरम् ॥
॥ ४० ॥ गोकर्णेचास्यचोद्धारंपातालात्परमेशितुः ॥ तस्यक्षेत्रमितिज्ञात्वाखात्पपातगिरौतदा ॥
॥ ४१ ॥ दिव्यस्वरूपिणीदेवीसर्वाभरणभूषिता ॥ एकाकिनीताम्रतलेगिरौगंगाचचारह ॥ ४२ ॥
ध्यायंतीपरमेशानंसर्वधातारमव्ययम् ॥ ततोगंगाह्रदिस्थंतुज्ञात्वाविश्वेश्वरःशिवः ॥ ४३ ॥ सत्व
रोवृषभारूढःप्रायाद्गोशृंगपर्वतम् ॥ तांददर्शमहादेवोगंगांत्रिपथगांशिवाम् ॥ ४४ ॥ गोशृंगपर्वते
विप्रादिव्यरूपांमहानदीम् ॥ सातुदृष्ट्वाजगन्नाथंशूलपाणिंत्रिलोचनम् ॥ ४५ ॥ ननामशिरसाभ
क्त्याकंपमानालतेवसा ॥ लज्जयाधोमुखीभूत्वामनसाप्रणतास्थिता ॥ ४६ ॥ तस्यारूपंसमीक्ष्यैव
भगवानीश्वरोऽपिसन् ॥ तस्यांप्रतिष्ठभावस्तुप्रसन्नस्तामुवाचह॥४७॥कासिभद्रेकुतश्चासिकस्यासि

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

दयिताशुभे ॥ किमर्थंचेहकल्याणिगिरौचरसिभामिनि ॥ ४८ ॥ त्वयिभावप्रतिष्ठोमेतस्मात्पृच्छा
मिशोभने ॥ इतितस्यवचःश्रुत्वाकन्याकमललोचना ॥ ४९ ॥ कृतांजलिर्वेपमानारुद्रंप्रोवाचल
ज्जया ॥ ५० ॥ गंगोवाच ॥ ममत्वंदेवदेवेशवृत्तांतंज्ञातुमर्हसि ॥ ध्यानेनधामाधिपतेसर्वभूतात्म
कोह्यसि ॥ ५१ ॥ इत्युक्तःसतयादेवोदध्यौचांतर्मनश्चिरम् ॥ ज्ञात्वाकमंडलोःकस्यसंजातांलोकपा
वनीम् ॥ ५२ ॥ कन्यांकमलपत्राक्षीमात्मार्थेपरिकल्पिताम् ॥ दृष्ट्वातुतोषभगवान्तामाहेदंपिनाक
धृक् ॥ ५३ ॥ विदितंतवकल्याणिसर्वमागमनंमया ॥ महतातपसाभद्रेविरिंचेनासिनिर्मिता ॥
॥ ५४ ॥ मदर्थमंदगमनेएहिमत्प्रियमाचर ॥ इत्युक्त्वादेवदेवस्तांगंगांत्रिपथगांपुनः ॥ ५५ ॥ प
स्पर्शपाणिनादेवस्तस्यागात्रंसुशोभनम् ॥ सालज्जमानाभीताचवेपंतीकदलीयथा ॥ ५६ ॥शनैर्भ ॥ २५ ॥
र्तारमाहेदंकन्यकास्मिसुरोत्तम ॥ धर्मस्यचाविरोधेनप्रसादसुमुखोभव ॥ ५७ ॥ इतितस्यावचःश्रु
त्वाभगवान्वृषभध्वजः ॥ सस्मारात्मभुवंदेवोब्रह्माणंविष्णुमेवच ॥ ५८ ॥ तस्यतन्मतमाज्ञायब्र

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ह्माविष्णुसमन्वितः ॥ समेत्यशंभुंतत्रैवतदावचनमब्रवीत् ॥ ५९ ॥ ब्रह्मोवाच ॥ मद्व्रतातपसागंगात्व
दर्थंनिर्मितामया ॥ तस्माद्गृहाणशंभोत्वमस्यास्तुकरपंकजम् ॥ ६० ॥ नारदउवाच ॥ इत्युक्त्वा
भगवान्ब्रह्मादेवैर्ऋषिगणैःसह ॥ आश्विनेमासिब्रह्मर्षेकृष्णपक्षेचतुर्दशी ॥ ६१ ॥ तस्यांस्वात्य
र्क्षयुक्तायांददौगंगांपिनाकिने ॥ वेदवाक्यंजगुर्विप्राननृतुश्चाप्सरोगणाः ॥ ६२ ॥ येचान्येचागता
स्तत्रसर्वेतमुपतस्थिरे ॥ देवदुंदुभयोनेदुर्गंधर्वाललितंजगुः ॥ ६३ ॥ ववौवायुःसुखस्पर्शोनिर्मलंचाभ
वन्नभः ॥ पुष्पवृष्टिंतदादेवामुदातत्रववर्षिरे ॥६४॥ इतिश्रीस्कांदेगोकर्णपुराणेनवमोऽध्यायः ॥९॥
नारदउवाच ॥ ततोविवाहेनिर्वृत्तेब्रह्मणोऽनुज्ञयासुराः ॥ येचान्येचागतास्तत्रसर्वेजग्मुर्यथागतम् ॥
॥ १॥ ततोब्रह्मास्वभवनंविष्णुनासहितोययौ ॥ ततःप्रभृत्यसौविप्रगिरिर्वैवाहिकोऽभवत् ॥२॥ गौ
रीतिनामतस्यास्तुताम्राख्येतुगिरौच्युता ॥ नगेचचारतास्मिन्साताम्रगौरींततोविदुः ॥ ३ ॥ ततःसाता
म्रगौरीतुद्विधाभूताभवत्तदा ॥ नदीरूपेणसादेवीसर्वपापापनोदिनी ॥ ४ ॥ निर्गम्यताम्रतलतोब

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ह्रुतीर्थसमन्विता ॥ गत्वासादक्षिणामाशांक्रोशार्धंसासुपावनी ॥ ५ ॥ संगम्यतीर्थैःसादेवीतीर्थाना
मुत्तमासती ॥ निर्वृत्यचोत्तरेकिंचिद्रुद्रयेोनिंजगामह ॥ ६ ॥ रुद्रयोन्यभितोगत्वापितृस्थालींसमा
सदत् ॥ सर्वतीर्थानिसंगम्यसमुद्रंप्रविवेशह ॥ ७ ॥ पृथिव्यांयानितीर्थानिपातालनिलयान्यपि ॥
अंतरिक्षगतान्येवताम्रगौर्यांवसंतिहि ॥ ८ ॥ तस्मात्तीर्थवरासातुनदीनामुत्तमानदी ॥ पिंडंतिलोद
कंवापित्र्यत्रस्नात्वाददातियः ॥९॥ पितरस्तस्यसंतुष्टानरकस्थाअपिद्विज ॥ तृप्ताःस्वर्गंगमिष्यंतिनात्र
कार्याविचारणा ॥ १० ॥ पौर्णमास्यांचयेतत्रस्नात्वार्चंतिचशंकरम् ॥ तेषांत्रिजन्मचरितंपापंनस्य
त्यसंशयः ॥११॥ पशुपक्षिमृगावैतज्जलस्पर्शनमात्रतः ॥ सर्वपापविनिर्मुक्तास्तेपियांतिकृतार्थताम्
॥ १२ ॥ मनुजानांचविप्रेंद्रभवतीतिकिमद्भुतम् ॥ अन्यरूपेणसादेवीदिव्यस्त्रीरूपधारिणी ॥ १३ ॥
ताम्रगौरीनदीतीरेरुद्रेणसहसंस्थिता ॥ तोषयंतीशिवंसाक्षाद्गौरीप्राङ्मुखतःसदा ॥ १४ ॥ दिव्यरूप
धरांदेवींयेऽर्चयंतिनराभुवि ॥ तेषामभीप्सितंदेवीददात्येवनसंशयः ॥१५॥ सकृदर्चनमात्रेणसर्वपापैः

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

प्रमुच्यते ॥ भुक्त्वाभोगाननेकांश्चसयातिपरमांगतिम् ॥ १६ ॥ संवर्तकउवाच ॥ ताम्रगौर्यास्तुमा
हात्म्यंश्रोतुंकौतूहलंहिमे ॥ वर्ततेमुनिशार्दूलत्वंममाख्यातुमर्हसि ॥१७॥ नारदउवाच ॥ ताम्रगौर्या
स्तुमाहात्म्यंशृणुपापहरंपरम् ॥ रहस्यंसर्वदेवानामृषीणामपिसत्तम ॥ १८ ॥ अस्थिनिक्षेपणंयेऽत्र
ताम्रगौर्याजलेमले ॥ कुर्युस्तेमनुजालोकेसर्वपापविवर्जिताः ॥१९॥ यावदस्थिकणंतिष्ठेत्ताम्रगौर्याज
लेशुभे ॥ तावत्स्वर्गेमहीयंतेदिव्यभोगोपभोगिनः ॥२०॥ पश्चाद्भूलोकमासाद्यसाम्राज्यमनुभूयच ॥
पुत्रपौत्रैश्चसंयुक्ताःपश्चान्मुक्तिंव्रजंतिते ॥ २१ ॥ अत्रार्थेकथयिष्यामिइतिहासंपुरातनम् ॥ शृणुष्वै
कमनाविप्रसंवर्तकमहामते ॥ २२॥ उन्मूचुर्नामराजासीत्पुराप्राचेतसांतरे ॥ ससर्वराज्यमकरोत्प्रजा
नांद्रोहकृत्खलः ॥२३ ॥ तस्यपापेनमहताप्रजाआसन्नुपद्रुताः ॥ चमसोनामतत्पुत्रोधर्मात्माशंसित
व्रतः ॥ २४ ॥ पितर्युपरतेविप्रकिंचिच्छोकसमन्वितः ॥ ससंस्कारंपितुःकुर्वन्वनमायाच्चसार्विजः ॥
॥ २५ ॥ ततोऽतरिक्षेशुश्रावपितॄणांभारतींनृप ॥ पित्रातवमहाभागनृशंसेनदुरात्मना ॥ २६ ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

प्राप्ताःस्मनरकंसर्वेंपुनरावृत्तिवर्जितम् ॥ तस्माद्स्मद्धितार्थायपितुर्गृह्यकलेवरम् ॥ २७ ॥ याहिगो
कर्णमद्यैवसभृत्यःसपुरोहितः ॥ तत्रगत्वातुसंस्कारंपितुःकुरुविधानतः ॥ २८ ॥ अस्थिनिक्षेपणंतत्र
ताम्रगौर्यांकुरुष्वभो ॥ इत्युक्त्वापितरस्तस्यतत्रैवादर्शनंगताः ॥ २९ ॥ तच्छ्रुत्वाचमसस्तूर्णंपितॄणां
वचनंद्विज ॥ तथैवकृतवान्राजापितॄणांवाक्यगौरवात् ॥ ३० ॥ तस्यास्थिसंचयंचक्रेताम्रगौर्यांनृ
पोत्तमः ॥ तत्प्रभावात्क्षयंजग्मुःपापानिसुबहून्यपि ॥ ३१ ॥ स्वर्गंप्राप्तःक्षणादेवउन्मूचुःपितृभिःस
ह ॥ यावदस्थीनिजंतूनांताम्रगौर्यांवसंतिहि ॥ ३२ ॥ तावत्स्वर्गान्नच्यवंतिसंवर्तकनसंशयः ॥
॥ ३३ ॥ नारदउवाच ॥ पुनश्चश्रूयतांविप्र आख्यानंमहदद्भुतम् ॥ पूर्वंगंगानदीसेयंप्रभावाद्योतितप्र
भा ॥ ३४ ॥ ताम्रगौरीतिविख्यातागोकर्णेपापहारिणी ॥ तस्यास्तीरेतुमहतिवर्ततेतापसाश्रमाः ॥
॥ ३५ ॥ नित्यस्वाध्यायनिरताःषट्कर्मनिरताद्विजाः ॥ शिष्यानुपनिषद्भाष्यान्व्याकुर्वद्भिर्द्विजोत्तमैः ॥
॥ ३६ ॥ यमाद्यष्टांगयोगज्ञासिद्धसंघैःसमन्विताः ॥ ब्रह्माहंभावमुदिताजीवन्मुक्तामहीसुराः॥ ३७ ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तपोवनानिरम्याणितपस्विनिलयानिच ॥ चंपकाशोकपुन्नागनारिकेलैश्चपानसैः ॥ ३८ ॥ फलभा
रविनम्रैश्चसर्वर्तुकुसुमान्वितैः ॥ कल्पद्रुमैरुपेतानिनानापक्षिमृगैरपि ॥ ३९ ॥ लसत्कुमुदक
ल्हारकमलोत्पलमंडितैः ॥ मंजुकूजद्विहंगैश्चसरोभिर्विशदोदकैः ॥ ४० ॥ भूषितानिद्विजश्रेष्ठ
चकासंतिवनानिच ॥ तस्मिन्वनेप्रवर्तंतेवानराबहवस्तथा ॥ ४१ ॥ फलपक्वानिखादंतःपादपेषुच
रंतिहि ॥ स्थविरोवानरःकश्चिद्वृक्षाग्रेषुचतत्रवै ॥ ४२ ॥ पर्यटन्फललोभेनप्रमादात्पतितोद्रुमात् ॥
शिलातलेतुमहतिभग्नपादशिरोभुजः ॥४३॥ रुधिरारक्तसर्वांगोमूर्छामापसवानरः ॥ मुहूर्तमात्रात्सं
ज्ञांवैलब्ध्वाचोन्मील्यलोचने ॥ ४४ ॥ आत्मनात्मानमाश्वास्यसमंतादवलोकयन् ॥ तस्मादुत्थाय
शनकैर्महतःसलिलातलात् ॥ ४५ ॥ ताम्रगौरीतलभुवंशनैर्वृक्षमथारुहत् ॥ शाखांतरेनिविष्टःसन्न
त्रस्वांगव्रणातुरः ॥ ४६ ॥ असहन्वेदनांविप्रतत्रप्राणैर्वियोजितः ॥ ततःकतिपयाहःसुगतेषुद्विज
सत्तम ॥ ४७ ॥ शिरोभागोऽपतत्तत्रताम्रगौर्याजलेमले ॥ शेषांगंचस्थितंवृक्षशाखायामेवसुव्रत ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

॥ ४८ ॥ प्रक्षालितंचोत्तमांगंतस्यकेवलमंभसि ॥ तेनपुण्येनमहतावानरःसाद्विजोत्तम ॥ ४९ ॥
कस्मिंश्चिदुत्तरेदेशेचित्ररूपाख्यभूपतेः ॥ क्षेत्रेजातःकुमारोभूच्चित्रबाहुरितिश्रुतः ॥ ५० ॥ मुखमा
त्रमभूत्तस्यकमनीयंनराकृति ॥ सर्वांगंकपिवच्छेषंवानराकारमद्भुतम् ॥ ५१॥ पुत्रोत्सवोजातइतिपु
रोहितमुखाद्द्विज ॥ श्रुत्वाराजाचित्रबाहुःसद्यश्चोत्थायसंसदः ॥ ५२ ॥ प्रविश्यांतःपुरंशीघ्रंगत्वात
त्सूतिकागृहम् ॥ आलोकयामासतदाकुमारमुखपंकजम् ॥ ५३ ॥ दृष्टोभूच्छिष्टसर्वांगंदृष्ट्वाकिंचि
त्सुदुर्मनाः ॥ अलंघनीयानियतिर्भोक्तव्यंचपुराकृतम् ॥ ५४ ॥ अन्यथानभवेदेवंचिंतयित्वासभूप
तिः ॥ जातक्रियादिकर्माणिकल्पयामासतस्यवै ॥ ५५ ॥ दिनेषुगच्छत्सुततोकुमारःसन्यवर्धत ॥
चित्ररूपःसराजर्षिश्चिंतयामासचाकुलः॥५६॥राज्यादिभोगसामग्रीविद्यतेमयिसर्वदा॥ नमयावंचितः
कश्चिद्विधात्रावंचितोस्म्यहम्॥५७॥पुत्रंदृष्ट्वाविरूपंचमानसंमेदुनोतिच॥मुखंयथाससर्जास्यतथाशेषंन
सृष्टवान् ॥५८॥ ईदृशस्तनयोजातःकोवाभाग्यविपर्ययः॥ रूपाकृतिभ्यांकांत्याचपुत्रमात्मसमंगुणैः

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

॥५९॥अलब्ध्वाममराज्येनभोगैर्वाकिंप्रयोजनम् ॥ ममांगसंभवस्यास्यनिदानंयोऽन्यथाकृतेः ॥६०॥ ज्ञात्वासम्यङ्नरोब्रूयाद्दास्येतस्ययथेप्सितम् ॥ सर्वशास्त्रार्थविदुषोविप्रान्दृष्ट्वातदुक्तितः ॥ ६१ ॥ करिष्यामिप्रतीकारमितिसंचिंत्यभूमिपः ॥ ज्योतिःशास्त्रविदोविप्रान्सर्वशास्त्रेषुकोविदान् ॥ ६२ ॥ श्रौतस्मार्तार्थसारज्ञान्स्वाश्रमाचारवर्तिनः ॥ तान्सर्वतःसमानाय्यसत्कारैरर्च्यसादरम् ॥ ६३ ॥ भक्तिनम्रोब्रवीदेवंद्विजातिजनसंसदि ॥ चित्ररूपउवाच ॥ भवंतःसर्वएवैतेब्राह्मणाब्रह्मरूपिणः ॥ सर्वशास्त्रार्थविज्ञानामयोक्तमवधार्यताम् ॥ ६४ ॥ ममराज्यैश्वर्यमस्तिभोगाःसंतिमनोरमाः ॥ तथाप्यहंपुत्रतनोर्विकृतिंवीक्ष्यदुःखितः ॥ ६५ ॥ तत्रमेकारणंब्रूतविधास्येतांप्रतिक्रियाः ॥ राज्ञस्तुवचनंश्रुत्वासर्वेतेब्राह्मणोत्तमाः ॥ ६६ ॥ आलोक्यसर्वशास्त्राणितदर्थांश्चमुहुर्मुहुः ॥ परामृशंतस्तद्धेतुंसर्वेनिर्धार्यशंसितुम् ॥ ६७ ॥ नशेकुस्तेद्विजश्रेष्ठास्तदाभूद्दुर्मनानृपः ॥ वसनाशनपानादिविषयेष्वरतिःसदा ॥ ६८ ॥ चिंताकुलमनाराजासभृशंदैन्यमास्थितः ॥ एतस्मिन्नंतरेकालेकश्चित्सिद्धवरःपुमान्

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

॥ ६९ ॥ यदृच्छयाचरन्भूमौतत्पुरंसमपद्यत ॥ अतीतानागतान्वक्ताराज्ञेविप्रैर्हिवेदितः ॥ ७० ॥
तंदृष्ट्वासिद्धपुरुषंराजाचाभ्यर्च्यभक्तितः ॥ राज्ञोविज्ञापनांश्रुत्वादौर्मनस्यंचतादृशम् ॥ ७१ ॥ वीक्ष्य
सिद्धाक्षिरंदध्यौनिमीलितविलोचनः ॥ ज्ञात्वासकारणंविद्वानब्रवीत्तंद्विजोत्तमः ॥ ७२ ॥ शृणुराज
न्मनस्तापंत्यजतत्कारणंब्रुवे ॥ अवतीर्णापुण्यनदीसार्धरुद्रेणसंस्थिता ॥ ७३ ॥ गोकर्णाख्येमहाक्षे
त्रेताम्रगौरीतिविश्रुता ॥ तस्यारोधभवेवृक्षेमृतःकश्चित्कपिर्जरन् ॥ ७४ ॥ चिराच्च्युतंतस्यशिरोनि
मग्नंतस्यचांभसि ॥ शेषांगंवृक्षएवास्तेक्षालनाच्छिरसःकपिः ॥ ७५ ॥ महत्पुण्यफलंप्राप्यजातःक्षे
त्रेतवौरसः ॥ पुत्रोभून्मुखमेवास्यनराकृतिमहीपते ॥ ७६ ॥ वृक्षस्थशेषांगतयातवपुत्रविरूपता ॥
एतत्कारणमेवात्रविद्धिनान्यंनृपोत्तम ॥ ७७ ॥ नारदउवाच ॥ इत्याकर्ण्याब्रवीद्राजामहांतंसिद्धपू
रुषम् ॥ ७८ ॥ चित्ररूपउवाच ॥ सर्वज्ञोसिमहायोगिन्नाश्चर्यंवदासिप्रभो ॥ अतःपरंममाभीष्टंक
थंसिद्ध्येत्तथाकुरु ॥ ७९ ॥ तदाकर्ण्यनृपंप्राहयोगीचनृपसत्तमम् ॥ शीघ्रंगच्छंतुभवताप्रेषितामंत्रि

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

णस्तव ॥ ८० ॥ पुरोहिताश्चयेविप्रागोकर्णप्रतिभूपते ॥ ताम्रगौरीतटगतवृक्षस्थंवानरांगकम् ॥ ८१ ॥ विकृष्यविक्षिपंत्वाशुताम्रगौर्याशुभेंऽभासि ॥ ततस्तेमनसोऽभीष्टंसिद्धेत्तत्रनसंशयः ॥८२॥ इतिसंचोदितस्तेनराजामांत्रिपुरोहितान् ॥ सभृत्यान्शीघ्रगान्दक्षानाप्तांश्चैवव्यसर्जयत् ॥ ८३ ॥ राज्ञासंचोदिताःसर्वेगोकर्णप्राप्यसत्तम ॥ ताम्रगौरीतटगतंकपेरंगंसमीक्ष्यच ॥ ८४ ॥ तदाकृष्याशुचप्रास्यन्नस्थाएवांभसिद्विज ॥ सद्यःसराजपुत्रोभूत्सुदेहीचरविर्यथा ॥ ८५ ॥ तेजस्वीच यशस्वीचापितुर्नयननंदनः ॥ राजलक्ष्मीनिवासश्चकुमारःसमजायत ॥ ८६ ॥ तस्मिन्क्षणेचित्ररूपोबभूवानंदनिर्भरः ॥ तदालोक्यचसर्वास्तुशुद्धांतवनितास्तदा ॥ ८७ ॥ कुमारंतंपरिष्वज्यतदा हर्षमवाप्नुवन् ॥ तदाश्चर्यमहद्दृष्ट्वाचित्ररूपोमहामनाः ॥ ८८ ॥ नमामतंयोगिवरंप्रसाद्यचपुनःपुनः॥ गोकर्णक्षेत्रमाहात्म्यंताम्रगौर्याविशेषतः ॥ ८९ ॥ तस्मात्सिद्धान्नृपःश्रुत्वाविस्मितःप्रशशंसताम् ॥ अन्वशात्ससवकंराज्यंधर्मेणैवनराधिपः ॥ ९० ॥ नारदउवाच ॥ ताम्रगौरीजलस्पर्शमात्रेणैवद्विजो

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

त्तम ॥ वानरोऽपिनरेंद्रोभूल्लेभेचैवातुलांश्रियम् ॥ ९१ ॥ ताम्रगौरीजलस्नानंकांक्षंतेविबुधादयः ॥
सर्वतीर्थमयीगंगाताम्रगौरीनसंशयः ॥ ९२ ॥ ताम्रगौर्यास्तुमाहात्म्यंश्रुतमात्राघनाशनम् ॥ कथितं
तेद्विजश्रेष्ठकिमन्यच्छ्रोतुमिच्छसि ॥ ९३ ॥ ॥इतिश्रीस्कांदेगोकर्णपुराणेदशमोऽध्यायः ॥ १० ॥
संवर्तकउवाच ॥ यानियानिचतीर्थानिताम्रगौर्यावसंतिहि॥पुण्यानितानिमेब्रह्मन्यथावद्वक्तुमर्हसि॥१॥
॥ नारदउवाच ॥ अशक्यंहिमयावक्तुंसर्वंवर्षशतैरपि ॥ यथाप्रधानंवक्ष्यामिनिबोधद्विजसत्तम ॥२॥
संगमेताम्रगौर्यास्तुसमुद्रस्यचसत्तम ॥ विधूतपापस्थालीतिस्थानंत्रैलोक्यविश्रुतम्॥ ३ ॥ तस्या
धस्ताद्द्विजश्रेष्ठगवांमातामृतस्रवा ॥ ब्रह्मणोमानसात्तातजातापूर्वमनिंदिता ४॥ ॥ जातमात्रेण
सादेवीसुरभिस्तंपितामहम् ॥ प्रणम्योवाचवचनंस्थानंमेसंप्रदीयताम् ॥ ५ ॥ इतितस्यावचःश्रु
त्वाब्रह्माप्रोवाचतांपुनः ॥ ब्रह्मोवाच ॥ अयिपुत्रिमहाभागेपातालेपरमेश्वरः ॥ पूर्वमयासमुत्पन्नह्या
स्ततंयाहिशोभने ॥ ६ ॥ तंप्रार्थयवरारोहेसतेस्थानंविधास्यति ॥ इतितद्वचनंश्रुत्वापातालंसुरभिर्य

॥ ३० ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

यौ ॥ ७ ॥ सर्वदेवमयीदेवीलोकानुग्रहकारिणी ॥ सापातालगतादेवि सुरभिर्ब्रह्मणःसुता ॥ ८ ॥ द
दर्शपरमेशानंववंदेवृषभध्वजम् ॥ तांदृष्ट्वाशंकरःप्रीतःसुरभिंसुरपूजिताम् ॥ ९ ॥ उवाचदेवदेवस्तां
प्रणतामग्रतःस्थिताम् ॥ रुद्रउवाच ॥ उत्तिष्ठोत्तिष्ठभद्रंतेप्रीतोस्मितवदर्शनात् ॥ किमिच्छसिवरारोहे
तद्ददाम्यविलंबितम् ॥ १० ॥ तच्छ्रुत्वावचनंशंभोःसुरभिर्वाक्यमब्रवीत् ॥ सुरभिरुवाच ॥ स्रष्टाहंब्र
ह्मणादेवमनसापद्मजन्मना ॥ मामुवाचसदेवेशोपातालंगच्छशीघ्रतः ॥ ११ ॥ पूर्वमयासमुत्पन्नोरुद्रस्त्रि
भुवनेश्वरः ॥ सपातालगतःपुत्रिवर्ततेशंकरःस्वयम् ॥ १२ ॥ गत्वातंप्रार्थयशुभेसतेस्थानंविधास्यति ॥
इतितस्यवचःश्रुत्वानमस्कृत्वापितामहम् ॥ १३ ॥ आगताहंसुरगुरोत्वामद्यपुरुषोत्तम ॥ किंकरो
मिजगन्नाथस्थानंमेसंप्रकल्पय ॥ १४ ॥ इतितस्यावचःश्रुत्वातामाहवृषभध्वजः ॥ अत्रस्थेयंत्वयाभ
द्रेपातालेसुरनंदिनि ॥ १५ ॥ त्वयाजगदिदंदेवित्रैलोक्यंसचराचरम् ॥ रक्षितव्यंमहाभागेऔर
संमातृवच्छुभे ॥ १६ ॥ सुरभिरुवाच ॥ देवदेवनमस्तेस्तुशूलपाणेनमोस्तुते ॥ कालांतकनमस्ते

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

स्तुनमस्तेत्रिपुरांतक ॥ १७ ॥ त्वयासहासितुंदेवइच्छामिपरमेश्वर ॥ १८ ॥ शंकरउवाच ॥ अ
स्योपरिमहाभागेभूतलेभूतधारिणि ॥ गोकर्णमितिविख्यातंक्षेत्रंसर्वसुरार्चितम् ॥ १९ ॥ स्थितंतत्र
महाभागेगंतव्यंचत्वयानघे ॥ तत्रत्वंवसभद्रंतेमयासार्धमनिंदिते ॥ २० ॥ हविस्त्वंसर्वदेवानांतत्र
स्थात्वंप्रदास्यसि ॥ स्वधांपितृभ्यःकल्याणिअक्षयांप्रापयिष्यसि ॥ २१ ॥ सातथेतिप्रतिज्ञायगोकर्ण
समुपागमत् ॥ हित्वामातागवांदेवीताम्रगौर्यास्तुसंगमे ॥ २२ ॥ समुद्रस्यमहाभागापापस्थाल्यांत
पोऽचरत् ॥ दिव्यवर्षसहस्रंसावायुभक्षाबभूवह ॥ २३ ॥ पूजयंतीदिव्यलिंगमम्रुतोत्थंसुनिर्मलम् ॥
घोरेणतपसातस्यास्तुतोषभगवान्हरिः ॥ २४ ॥ आविर्बभूवदेवेशःशंखचक्रगदाधरः ॥ तंदृष्ट्वापुंड
रीकाक्षंववंदेसुरभिर्द्विज ॥ २५ ॥ नमस्कृत्वाहृषीकेशंस्थित्वाप्रांजलिरग्रतः ॥ तामुवाचजगन्नाथः ॥ ३१ ॥
किमिच्छसिशुभेवद ॥ २६ ॥ दातास्मितेवरंभद्रेयद्यपिस्यात्सुदुर्लभम् ॥ सुरभिरुवाच ॥ वरंददा
सिचेन्मह्यंवरार्हायदिचाप्यहम् ॥ स्थानमेतद्धृषीकेशालिंगंचसुरसत्तम ॥ २७ ॥ पूज्यंभवतुत्रैलो

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

करोत्वत्प्रसादाज्जनार्दन ॥ २८ ॥ श्रीविष्णुरुवाच ॥ सिद्धिर्भवतुतेभद्रेमत्प्रसादाद्वरानने ॥ स्था
नमेतन्महालिंगंत्रैलोक्येषूत्तमंभवेत् ॥ २९ ॥ पश्चादिदंमहाभागेपितृस्थालीभविष्यति ॥ अत्रदत्तं
हुतंचापिजप्तंवासुरनंदिनि ॥३०॥ अक्षय्यंतद्भवेद्भद्रेमत्प्रसादान्नसंशयः ॥ इत्युक्त्वाभगवान्देवस्तत्रै
वांतरधीयत ॥ ३१ ॥ सुरभिस्तत्रवैविप्रासिद्धिंप्राप्यमहेश्वरात् ॥ आस्तेतत्रैवभद्रंतेअधस्तात्सुरनंदि
नी ॥ ३२ ॥ गोबिलंनामतत्रैवसमुद्रेवरुणालये ॥ बिलेनतेनवैभद्राप्रविष्टासुराभिर्द्विज ॥ ३३ ॥
सुतलंनामपातालंसर्वभोगसमन्वितम् ॥ तत्रास्तेऽद्यापिसुरभिरधस्ताद्गोबिलेमले ॥ ३४ ॥ बिलेन
तेनविप्रेंद्रआगच्छतिदिवानिशम् ॥ आगत्यागत्यतत्क्षेत्रंरसैरात्मोद्भवैर्द्विज ॥ ३५ ॥ क्षीरादिभिर्म
हाभागाप्लावयिष्यतिसर्वतः ॥ मध्यंदिनेदिवासातुअर्धरात्रिशुरात्रिषु ॥ ३६ ॥ तदहोरात्रमभवन्नृणां
संवत्सरंद्विज ॥ मध्यंदिनेचैत्रविषुस्तुलाचैवार्धरात्रकम् ॥ ३७ ॥ तस्मिन्कालेद्विजश्रेष्ठपापस्थाल्यां
समाहितः ॥ देवान्पितॄन्समुद्दिश्यब्राह्मणेभ्यःप्रयच्छति ॥ ३८ ॥ सुवर्णरौप्यमथवागोमहिष्यादिकं

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

चयत् ॥ यद्यदिच्छतिवैविप्रस्तत्तद्देयंनरं शयः ॥ ३९ ॥ दातव्यमन्नंविधिनास्वल्पंक्रोधादिवर्जित
म् ॥ तत्फलंनहिमेशक्तिर्वक्तुंसंख्यातुमेववा ॥४०॥ तद्दानंमेरुणातुल्यंतज्जलंसागरोपमम् ॥ दातार
मुपातिष्ठंतियथाकामंसुरालये ॥ ४१ ॥ साधेनुःकामधुग्भूत्वादातारमुपतिष्ठते ॥ यावच्चंद्रश्चसूर्यश्चया
वत्तिष्ठंतितारकाः ॥ ४२ ॥ तावत्स्वर्गेमहाभोगाःक्रीडंत्यप्सरसांगणैः ॥ सर्वभोगमनुप्राप्यविष्णुलो
केवसंतिते ॥ ४३ ॥ इतिश्रीस्कांदेगोकर्णपुराणेएकादशोऽध्यायः ॥ ११ ॥ ॥ छ॥ ॥
संवर्तकउवाच ॥ विधूतपापस्थालीतिनामतस्याःसुशोभनम् ॥ पितृस्थालीतिचविभोकिमर्थंतद्ब्रवी
हिभो ॥ १ ॥ नारदउवाच ॥ शृणुविप्रयथातस्यनामानिर्वचनंमहत् ॥ कामधेनुस्तुसुरभिस्तस्याध
स्ताद्बिलेनतु॥२॥ एत्यायातिमहाभागापुण्यासर्वरसाश्रया ॥ सुधोद्भवागवांमाताश्रुतमात्राघनाशिनी
॥ ३ ॥ घ्राणवातेनतंदेशंपावयंतीमनोहरा ॥ श्वासानिलस्यसंस्पर्शादेनांस्यपहतानिवै ॥ ४ ॥ दूरंग
च्छंतिविप्रर्षेप्रवातेशुष्कपर्णवत् ॥ धूतपापाहिपापिष्ठास्तत्रगाश्चपुनःपुनः ॥ ५ ॥ तस्माद्विधूतपा ॥ ३२ ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

पासास्थालीवैद्विजसत्तम ॥ विधूतपापस्थालीतितद्दंतिमनीषिणः ॥ ६ ॥ पितृस्थालीतियत्तस्या
स्तच्छृणुष्वाद्विजोत्तम ॥ ब्रह्माजगत्पतिःपूर्वंसंध्यारूपीबभूवह ॥ ७ ॥ तेनरूपेणसपितॄन्सृष्टवानब्ज
संभवः ॥ पितृभिःसहतद्रूपंब्रह्मातस्मिन्व्यसर्जयत् ॥ ८ ॥ सासंध्यासहपुत्रैस्तुतत्रतेपेमहत्तपः ॥
अर्यमादिभिरुग्रेणतपसाराधितःशिवः ॥ ९ ॥ दिव्यवर्षसहस्रंसाप्राणायामपरायणा ॥ संगमेपूर्वं
गंगायाःसमुद्रस्यचसत्तम ॥ १० ॥ तस्यास्तपःप्रभावेणतुतोषपरमेश्वरः ॥ तामाहगत्वाभगवान्व
रंब्रूहीतिसादरम् ॥ ११ ॥ साददर्शमहाभागाभगवंतंपिनाकिनम् ॥ प्रणम्याशिरसादेवंदेवीवचन
मब्रवीत् ॥ १२ ॥ सिद्धिमिच्छाम्यहंपुत्रैःसहदेवनमोस्तुते ॥ तवप्रसादात्कामारेतीर्थमेतत्सुरोत्तम॥
॥ १३ ॥ उत्तमोत्तमत्तामेतुद्वितीयोस्तुवरोमम ॥ १४ ॥ शंकरउवाच ॥ सिद्धिर्भवतुतेभद्रेमत्प्रसादा
त्सुदुर्लभा ॥ स्थानमेतन्महाभागेसर्वपापहरंभवेत् ॥ १५ ॥ पितृस्थालीतिभद्रंतेअद्यप्रभृतिशोभने॥
पितॄणांपरमंक्षेत्रंमत्प्रसादाद्भविष्यति ॥ १६ ॥ अत्रदत्तंहुतंचापिपितॄनुद्दिश्यशोभने ॥ अमृतंनाम

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तद्देविपितॄणाभक्षयंभवेत् ॥ १७ ॥ दशापरान्दशावरानात्मानंचापरानितान् ॥ तेस्वर्गेस्वपितॄन्देवि
स्थापयिष्यंतिवैस्थिरम् ॥ १८ ॥ माघकृष्णचतुर्दश्याममायांवाविशेषतः ॥ पिंडंतिलोदकंवात्रयः
प्रणम्यप्रयच्छति ॥ १९ ॥ तस्यवैपितरःसर्वेतृप्तानिर्वाणमाप्नुयुः ॥ येपिशाचत्वमायांतिलोकेस्वकृ
तकर्मणा ॥ २० ॥ तेषामपिविधानेनश्राद्धंयःकुरुतेसुतः ॥ तेनपुण्येनमहतापितरःसपितामहाः ॥
॥ २१ ॥ पिशाचत्वंविमुक्त्वाशुतृप्तिंगच्छंतिशाश्वतीम् ॥ इतिदत्वावरंतस्यैभगवान्वृषकेतनः ॥
॥ २२ ॥ समस्तभूतसहितस्तस्मिन्लिंगेत्रिलोचनः ॥ क्रीडत्यहर्निशंतत्रसहितःपार्षदैःप्रभुः ॥ २३ ॥
तत्रस्नात्वानरोभक्त्याअग्निष्टोमफलंलभेत् ॥ तत्रदत्तंहुतंजप्तंएकंकोटिर्भविष्यति ॥ २४ ॥ संध्या
कालेचयःसंध्यांतत्रगत्वाकरोतिच ॥ तस्यैकवर्षविप्रेंद्रसंध्यालोपोभवेद्यदि ॥ २५ ॥ तत्संपूरयतेवि
प्रपितृस्थालीनसंशयः ॥ एकंवाभोजयेद्विप्रंतत्रस्थोयःसमंत्रकम् ॥ २६ ॥ तेनान्नेनद्विजश्रेष्ठपितरः
सपितामहाः ॥ तृप्तिंयास्यंतिपितरोयावन्मन्वंतरंदिवि ॥ २७ ॥ पितरःपितृलोकस्थावदंत्याशापरा

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

यणाः ॥ अस्माकमन्वयेकश्चित्कदाखलुगमिष्यति ॥ २८ ॥ पितृस्थालींचयोऽस्माकंगयांवापुरुषो
त्तम ॥ पिंडंतिलोदकंतत्र अस्माकंयःप्रयच्छति ॥ २९ ॥ तेनस्मस्तारिताःसर्वेतृप्तिंयास्यामशाश्व
तीम् ॥ एवंपरस्परंविप्रवदंत्याशापरायणाः ॥ ३० ॥ तेषांपितृणांविप्रर्षेयआशांपूरयेदिह ॥ स
यास्यतिपरंस्थानंपुनरावृत्तिवर्जितम् ॥ ३१ ॥ सकुलीनःसचोदारोवंशजःसप्रकीर्तितः ॥ सएवध
न्यःसत्वाढ्यःसबुधःसचबुद्धिमान् ॥ ३२ ॥ सश्रेष्ठःसर्वभूतानांमातेभूदत्रसंशयः ॥ ३३ ॥ नारदउ
वाच ॥ अत्रार्थेकथयिष्येऽहमितिहासंपुरातनम् ॥ चंद्रिकानगरेपूर्वमास्तेवैश्योमहाधनी ॥ ३४ ॥
धर्मगुप्तइतिख्यातोधर्मवानमितप्रभः ॥ पित्रार्जितेनवित्तेनवाणिज्यंकृतवान्द्विज ॥ ३५ ॥ गजानश्वान
श्वतरानुष्ट्रान्क्रीत्वामहाधनी ॥ श्रीगंधादीनिद्रव्याणिशस्त्राणिविविधानिच ॥ ३६ ॥ द्राक्षाखर्जूर
कादीनिलवंगादीनियानिच ॥ तानिसर्वाणिसक्रीत्वाविक्रयामासवैधनी ॥ ३७ ॥ मुक्ताप्रवाल
वैडूर्यपद्मरागादिकान्मणीन् ॥ स्वर्णरजतताम्रादिविक्रयामासशास्त्रतः ॥३८॥ दिक्षुप्रसिद्धिमगनद्बहु

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

द्रविणसंचयात् ॥ पुत्रदारसमायुक्तोनव्ययंकृतवान्द्विज ॥ ३९ ॥ वैधृतौचव्यतीपातेरविसंक्रमणेषुच ॥
अर्धोदयादियोगेषुमन्वादिषुयुगादिषु ॥ ४० ॥ जन्मर्क्षेजन्मदिवसेग्रहणेचंद्रसूर्ययोः ॥ नदत्तंकांचनंकिं
चिद्वस्त्रंवाधान्यमेववा ॥ ४१ ॥ नदत्तागौर्द्विजातिभ्योनवृषोमहिषीतथा ॥ गृहागतायशांताययाच
कायद्विजातये ॥ ४२ ॥ नभैक्षंधान्यमुष्टिंवाशाकंवाप्युपदंशनम् ॥ नदत्तवान्फलंचापितांबूलंवास
षापकृत् ॥ ४३ ॥ द्रव्यलोभेनमहता नदानंकृतवानसौ ॥ पुत्रमित्रकलत्राद्यैर्धान्यैर्नानाविधैरपि ॥
॥ ४४ ॥ नवरत्नैःस्वर्णरौप्यैर्वस्त्राद्यैःपेटिकायुतैः ॥ पशुभिश्चगृहंपूर्णंबलिभिक्षादिवर्जितम् ॥ ४५ ॥
देशेभ्योतिथयोगत्वानिराशावैशपंतितम् ॥एवंबहुविधेकालेगृहंदग्धंहुताशनात् ॥ ४६ ॥ व्याधिताः
पुत्रपौत्राद्याःसर्वेपंचत्वमागमन् ॥ धनंनष्टमभूत्सोपिकुष्ठव्याधियुतोभवत् ॥ ४७ ॥ कृमिभिर्दूषि
तश्चाथतदागेहाद्विनिर्गतः ॥ घोरंविपिनमासाद्यक्षुत्तृष्णापरिपीडितः ॥ ४८ ॥ अस्तंगतेदिनकरेवृ
क्षमूलमुपाश्रितः ॥ तत्रदृष्ट्वामहाव्याघ्रोभक्षयामासतंद्विज ॥ ४९ ॥ तेनदोषेणमहतापिशाचत्वमवा ॥ ३४ ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

प्तवान् ॥ सह्यारण्येमहाघोरेनिर्जनेन्यवसत्सच ॥ ५० ॥ तत्रस्थितान्भूतसंघान्भक्षयामासनित्य
शः ॥ एवंकालेषुगच्छत्सुकदाचिद्दैवयोगतः ॥ ५१ ॥ तीर्थयात्राप्रसंगेनकुत्सोऽगाद्ब्राह्मणोत्तमः ॥ तं
दृष्ट्वाधर्मगुप्तस्तुकुत्संब्राह्मणपुंगवम् ॥ ५२ ॥ मुदापरमयायुक्तोविप्रस्यांतिकमागमत् ॥ दोर्भ्यांविप्रंसमा
श्लिष्यक्षणंतत्रस्थितोद्विज ॥ ५३ ॥ तस्यस्पर्शनमात्रेणपापहानिरभून्मुनेः ॥ जातिस्मृतिरभूत्तस्य
विप्रंत्यक्त्वाननामच ॥ ५४ ॥ उवाचकृतकृत्योऽस्मित्वदंगस्पर्शनान्मुने ॥ मामुद्धरमहाभागदयां
कुरुमयिद्विज ॥ ५५ ॥ इतिश्रुत्वातुवैश्यस्यवचनंकरुणान्वितम् ॥ तमाहवैश्यंधर्मात्माकुत्सोब्रा
ह्मणपुंगवः ॥ ५६ ब्रूहिकस्त्वंघोररूपकिमर्थंचेहतिष्ठति ॥ भवताकिंकृतंपूर्वंईदृशींयोनिमागतः
॥ ५७ ॥ धर्मगुप्तउवाच ॥ अहंवैश्योधर्मगुप्तश्चांद्रिकानगरेस्थितः ॥ पित्रार्जितेनवित्तेनवाणिज्यंकृ
तवानहम् ॥ ५८ ॥ बहुद्रव्यंसमासाद्यनव्ययंकृतवानहम् ॥ प्रदत्तंविप्रमुख्यायनाणुमात्रमपि
द्विज ॥ ५९ ॥ तेनदोषेणमहतापिशाचत्वमवाप्तवान् ॥ मामुद्धरदयालोत्वंत्वामहंशरणंगतः ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

॥ ६० ॥ इत्युक्तोधर्मगुप्तेनकुत्सोवैश्यमुवाचह ॥ माभैष्टवैश्यत्वामयह्युद्धारिष्यामिवैक्षणात् ॥६१॥
याहिसार्धमयावैश्यगोकर्णक्षेत्रमुत्तमम् ॥ तत्रगत्वात्वयासार्धंपितृस्थाल्यांसमाहितः ॥ ६२ ॥ श्राद्धं
कृत्वाविधानेनप्रापयिष्येगतिंतव ॥ इत्युक्त्वातंसमादायकुत्सोगोकर्णमागमत् ॥ ६३ ॥ स्नानं
कृत्वापितृस्थाल्यांवैश्येनसाहितोमुनिः ॥ वैश्यनाम्नाकुशग्रंथिंकृत्वाश्राद्धंव्यधान्मुनिः ॥ तेनपुण्येन
महतामुक्तिमापसुदुर्लभाम् ॥ ६४ ॥ नारदउवाच ॥ कुत्सोपिब्राह्मणोविप्रयथाकामंजगामह ॥ पि
तृस्थालीमहापुण्यासर्वपापहरीशुभा ॥ ६५ ॥ तत्रस्थोरुद्रगायत्रींयोजपेद्विधिपूर्वकम् ॥ चतुर्विंश
तिसाहस्रंतूर्ष्णींदीक्षासमन्वितः ॥ ६६ ॥ जन्मप्रभृतियत्पापंज्ञानतोऽज्ञानतःकृतम् ॥ तन्नश्यति
नसंदेहोनात्रकार्याविचारणा ॥ ६७ ॥ यःसकृत्संगतोवेश्यांकामतोऽकामतोपिवा ॥ सतत्ररुद्रगाय
त्रींजपन्मासेनशुद्ध्यति ॥ ६८ ॥ यस्तुमासंवसेत्पापसिहचैवतनूजया ॥ ससंवत्सरजप्तेनमंत्रेणानेन
शुध्यति ॥ ६९ ॥ ब्रह्महागुरुतल्पीवासुरापीवाद्विजोत्तम ॥ तस्मिन्रुद्रस्यगायत्रींजप्त्वासिद्धमवाप्नुया

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF
त् ॥ ७० ॥ इतिश्रीस्कांदेगोकर्णपुराणेद्वादशोऽध्यायः ॥ १२ ॥ ॥ छ ॥ ॥ ॥
तस्माद्दक्षिणतःकिंचिदाश्रमंश्रमनाशनम् ॥ सरस्वत्याश्रमंनामपुण्यंद्विजनिषेवितम् ॥ १ ॥ देवीस
रस्वतीतत्रसिद्धिमापद्विजोत्तम ॥ घोरेणतपसादेवीब्रह्माणंपर्यतोषयत् ॥ २ ॥ संवर्तकउवाच ॥ स
रस्वत्याश्वब्रह्मर्षेजन्मकर्मचविस्तरात् ॥ तस्यास्तपःप्रभावंचयथावद्वक्तुमर्हसि ॥ ३ ॥ नारदउवाच ॥
शृणुतस्याःप्रभावंचसंभवंचद्विजोत्तम ॥ सर्वपापहरांविप्रकथांकथयतोमम ॥ ४ ॥ ब्रह्माजगत्पतिः
पूर्वंस्वपतःश्रीधरस्यच ॥ नाभिपद्मोद्भवस्तातचतुराननभूषितः ॥ ५ ॥ बद्धपद्मासनोमौनीध्यानमा
स्तेपितामहः ॥ ध्यायतस्तस्यदेवस्यजिह्वाग्रादगलद्रसः ॥ ६ ॥ तमोष्ठाभ्यांविरिंचस्तुदधाररसमुत्त
मम् ॥ गृहीत्वातंरसंराजन्यातुकामःप्रजापतिः ॥ ७ ॥ आकृष्यकंठदेशेतंरसंरसाविदांवरः ॥ नशक्त
स्तंदृढीकर्तुंकर्तालोकस्यसत्तम ॥ ८ ॥ ततोविदारयामासवक्त्राकारंखगध्वजः ॥ तस्मान्मुखाद्बभू
वाशुशुद्धवर्णासरस्वती ॥ ९ ॥ ऊर्ध्वश्रवाकाशगतादेवीदिव्यस्वरूपिणी ॥ वाणीतंवरदंदेवंप्रदक्षि
CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

णमवर्त्तत ॥ १० ॥ तांदृष्ट्वाचकमेदेवःपद्मयोनिःप्रजापतिः ॥ कामाभिभूतोभगवान्तामाहेदंद्विजोत्त
म ॥ ११ ॥ द्विधात्वंविभजात्मानंमान्नियोगादनिंदिते ॥ सरसाद्रसनादेविजातासिममानदे ॥१२॥
सरणात्सरसात्स्वादात्तपनात्तापनादपि ॥ सरस्वतीतितेनामलोकेख्यातिंगमिष्यति ॥ १३ ॥ दि
व्यस्त्रीरूपिणीभूत्वाभजमामेवभाविनी ॥ एकांशेननदीभूत्वासर्वपापहराभव ॥ १४ ॥ व्यक्ताव्यक्त
स्वरूपेणसर्वभूतेष्वनिंदिते ॥ वसभद्रेममप्रीत्यामन्नियोगाद्वरानने ॥ १५ ॥ नारदउवाच ॥ इतित
द्वचनंश्रुत्वावाणीवाक्पतिमब्रवीत् ॥ तथादेवकरिष्यामित्वद्वशाहंसुरोत्तम ॥ १६ ॥ इत्युक्त्वासामर
गुरुमेकांशेनद्विजोत्तम ॥ दिव्यस्त्रीरूपिणीभूत्वाब्रह्माणंपर्यवर्त्तत ॥ १७ ॥ अपरेणजगत्सर्वंपावयं
तीमनोहरा ॥ सर्वभूतेषुवैविप्रव्यक्ताव्यक्तानुवर्तत ॥ १८ ॥ त्यक्त्वादेहंपुनर्देवीदक्षस्यदुहिताभवत् ॥
माविन्ध्यासहधर्मज्ञायोगैश्वर्याभिकांक्षिणी ॥ १९ ॥ तपःसुघोरंगोकर्णेसाविन्ध्यासहसुव्रत ॥ चचारा
ब्दायुतंविप्रसंगृह्यात्मानमात्मना ॥ २० ॥ दिव्यंलिंगंपूजयंतीब्रह्मध्यानपरायणा ॥ तस्यास्तपःप्रभा

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

वेणब्रह्मालोकपितामहः ॥ २१ ॥ तुतोषभगवान्साक्षाद्दर्शयामासवैवपुः ॥ सापितंदेवदेवेशंदृष्ट्वालो
कपितामहम् ॥ २२ ॥ ववंदेभ्येत्यशिरसावाणीभक्त्याप्रजापतिम् ॥ तामाहभगवान्ब्रह्माकिमिच्छ
सिशुभेवद ॥ २३ ॥ दातास्मितेवरंभद्रेयद्यपिस्यात्सुदुर्लभम् ॥ सरस्वत्युवाच ॥ वरदोयदिदेवेशव
राहीयदिचाप्यहम् ॥ सिद्धिमिच्छामिदेवेशत्वत्तःकमलसंभव ॥ २४ ॥ सिद्धाहंसर्वभूतेषुचरिष्येशा
श्वतीःसमाः ॥ तीर्थमेतत्सुरश्रेष्ठलिंगंचसुमनोहरम् ॥ २५ ॥ ख्यातंमत्संज्ञयालोकेसर्वसिद्धिकरंभ
वेत् ॥ ब्रह्मोवाच ॥ सिद्धाहिपूर्वमेवत्वंमद्भक्त्याचविशेषतः ॥ सर्वभूतस्यभद्रंतेजिव्हायांवसभामि
नि ॥२६॥ व्यक्ताव्यक्तामहाभागेज्ञाताज्ञातातथैवच ॥ स्नात्वाभजंतित्वामत्रभक्त्याशुद्धेनचेतसा ॥
॥ २७ ॥ तेषामभीप्सितंसर्वंभविष्यतिनसंशयः ॥ सरस्वतीकुंडमितिख्यातंभवतुशोभने ॥ २८ ॥
मासिचाश्वयुजेशुक्लेदशम्यांस्नानमत्रतु ॥ कृत्वातीर्थेतुतल्लिंगंपूजयेज्ज्ञानवान्भवेत् ॥ २९ ॥ वाक्पटु
त्वंभवेत्तस्यसर्वाभीष्टंभविष्यति ॥ इत्युक्त्वाभगवान्देवोब्रह्मालोकपितामहः ॥ ३० ॥ ययौसासिद्ध

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

मार्गेणसहसिद्धैःप्रजापतिः ॥ सरस्वतीचब्रह्माणमुपतस्थेद्विजोत्तम ॥ ३१ ॥ संवर्तकउवाच ॥ क
थंतत्रैवब्रह्मर्षेसाविच्रीसुरपूजिता ॥ ब्रह्मस्त्रीब्राह्मणानांसामातासिद्धाकथंमुने ॥ ३२ ॥ उत्पन्नाचक
थंदेवीगायत्र्याख्याकथंह्यभूत् ॥ साविच्रीसाकथंदेवीवेदगर्भासुरारणिः ॥ ३३ ॥ नारदउवाच ॥ शृ
णुविप्रकथामेतांसर्वपापहरांशुभाम् ॥ ब्रह्माजगत्पतिःपूर्वंचतुराननभूषितः ॥ ३४ ॥ नाभिपद्माज्ज
गद्योनेःपद्मनाभस्यपद्मभूः ॥ बभूवसतदाविप्रजन्मचाचिंतयत्स्वकम् ॥ ३५ ॥ नाभ्यगच्छद्य
दाजन्ममातरंपितरंतथा ॥ अव्यक्तजन्माभगवान्चिंतयोत्कंठमानसः ॥ ३६ ॥ निगृह्यसर्वद्वाराणि
संधार्यात्मानमात्मनि ॥ ध्यानमास्तेजगन्नाथःसुचिरंद्विजसत्तम ॥ ३७ ॥ ध्यायतस्तस्यदेवस्यमुखा
त्पूर्वादजायत ॥ ऋग्वेदश्चांगसहितःसरहस्यःसलक्षणः ॥ ३८ ॥ मुखाद्दक्षिणतःसामपश्चिमाद्यजु ॥ ३७ ॥
रायशौ ॥ अथर्वोत्तरतोयस्तुसगुह्यःसमजायत ॥ ३९ ॥ मुखेभ्यस्तस्यदेवस्यचतुर्भ्योद्विजसत्तम ॥
अजायंतपुरावेदाःपुनरेकत्वनागताः ॥ ४० ॥ विलोड्यवेदंतंब्रह्माबहुशःपरमेश्वरः ॥ वेदोदधौमथ्य

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

मानेबभूववरवर्णिनी ॥ ४१ ॥ सावित्रीसर्वधर्मज्ञासर्वाभरणभूषिता ॥ गायत्रीचापिविप्रेंद्रसर्वावयव
सुंदरी ॥ ४२ ॥ सज्योतिषासप्रणवासरहस्यासहारणिः ॥ शाखाभिःसहितादेवीब्रह्माणंपर्यवर्तत ॥
॥ ४३ ॥ प्रदक्षिणंतमावृत्यननामशिरसातदा ॥ तांदृष्ट्वादेवदेवेशोगायत्रींप्राहसत्तम ॥ ४४ ॥ गा
यंतंत्रायमाणत्वाद्दुःखसंसारसागरात् ॥ गायत्रीचेतितेनामलोकेख्यातिंगमिष्यति ॥ ४५ ॥ मयिवे
दाःसमुत्पन्नाश्चत्वारःकमलेक्षणे ॥ एकीभूतापुनस्तेवैततोहंसारकांक्षया ॥ ४६ ॥ विलोड्यमहंवेदं
लब्धवान्त्वांशुचिस्मिते ॥ सारभूतासिकल्याणिसर्वदासर्ववस्तुषु ॥ ४७ ॥ सर्ववेदेषुसारत्वात्सावि
त्रीतिबुधाजगुः ॥ मातात्वमसिकल्याणिब्राह्मणानांवरानने ॥ ४८ ॥ मन्नियोगकरीनित्यंमयिवर्त्त
स्वशोभने ॥ एवंकरिष्येदेवेशेत्युक्त्वाचांतरधीयत ॥ ४९॥ ततश्चुकोपसब्रह्मासावित्र्याःपरमेश्वरः ॥
शशापदेवींसावित्रींशरीरंतेविनश्यतु ॥ ५० ॥ त्यक्त्वाशरीरंसादेवीवायुभूताचचारह ॥ ततोगोकर्ण
मासाद्यरुद्रयोन्यास्तुदक्षिणे॥५१॥दिव्यवर्षसहस्रंसाचचारसुमहत्तपः॥ ततस्तंदेशमासाद्यपरमेष्ठीप्रजा

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

प्रीतिः॥५२॥वरंब्रूहीतितामाहदातास्मियदभीप्सितम् ॥ ततःप्रणम्याशिरसासाविनीतमुवाचह ॥५३॥
एतदेववरंदेवदर्शनंतेसुरोत्तम ॥ त्वद्दर्शनंदेवदेवदेवानामपिदुर्लभम् ॥५४॥कर्त्तात्वंसर्वभूतानांहंतापाता
तथैवच ॥ त्वमेवसर्वंजानासिसर्वज्ञस्त्वंयतोभवान्॥५५॥ त्वयाततमिदंविश्वंसर्वभूतात्मकोह्यसि ॥ त्वं
पितासर्वलोकानांत्वंमातासुरसत्तम॥५६॥पितामहोसिसर्वस्यतथैवप्रपितामहः॥परंब्रह्मपरंज्योतिःपवि
त्रंपरमंभवान् ॥५७॥ येत्वांगृह्णंतिदेवेशतेसिद्धिंपरमांगताः ॥ त्वांयजंतिमहात्मानंज्ञानिनःपुरुषोत्तम
॥ ५८ ॥ त्वान्नजानंतिवैमूढाभूत्वाजन्मशतेष्वपि ॥ क्रमेणेष्ट्वासर्वदेवान्कृत्वाकर्मक्षयंविभो ॥ ५९ ॥
यदात्वयिभवेद्बुद्धिस्तदामुक्तोभवेद्ध्रुवम् ॥ शरणंभवमेदेवध्यायंत्यास्त्वत्पदांबुजम् ॥ ६० ॥ सिद्धि
मिच्छामिभगवन्पुनरावृत्तिवर्जिताम् ॥ ब्रह्मोवाच ॥ सिद्धिर्भवतुकल्याणिमत्प्रसादादनिंदिते ॥ प्री
तोस्मितवभद्रंतेस्तोत्रेणानेनसुव्रत ॥ ६१ ॥ सावित्र्युवाच ॥ सिद्धाहंदेवदेवेशत्वत्प्रसादात्सुरेश्वर ॥
पूज्यंभवतुत्रैलोक्येतीर्थमत्राश्रमेविभो ॥ ६२ ॥ अत्रमांत्वांचदेवेशयेयजंतिनरायेनयः ॥ सिद्धिर्भवतु

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तेषांवैद्विंतीयोस्तुवरोमम ॥ ६३ ॥ ब्रह्मोवाच ॥ तीर्थमेतन्महाभागेमत्प्रसादादनिंदिते ॥ ख्यातंना
म्नातवैतच्चअर्चनीयंसुरैरपि ॥ ६४ ॥ उषित्वातुत्रिरात्रंयेस्नानंकृत्वाविधानतः ॥ त्वांपूजयंतियेदेविम
यासार्धमनिंदिते ॥ ६५ ॥ तेषांत्रिजन्मरचितमल्पंवायदिवाबहु ॥ पापंप्रक्षयमायातुमत्प्रसादान्नसं
शयः ॥ ६६ ॥ अत्रस्थोयश्चसावित्रिसावित्रीजपतत्परः ॥ एकोनत्रिंशत्साहस्रंसऋषिच्छंददैवतम् ॥
॥ ६७ ॥ आवर्तयातित्वांदेविमनसामामनुस्मरन् ॥ तेषामभीप्सितासिद्धिर्यद्यपिस्यात्सुदुर्लभा ॥
॥ ६८ ॥ मत्प्रसादाच्छुभेसत्यंभविष्यातिनसंशयः ॥ वर्णसंकरकादीनांपतितानांद्विजोत्तम ॥ ६९ ॥
गाथावागीतिकावापितेषांसिद्धिप्रदाभवेत् ॥ गायत्रीतीर्थमन्यच्चप्राच्यांसिद्धिप्रदंमहत् ॥ ७० ॥
स्नातानांपुण्यजननंसर्वयज्ञफलप्रदम् ॥ इतिदत्वावरंतस्यैब्रह्माचांतरधीयत ॥ ७१ ॥ इतिश्रीस्कांदे
गोकर्णपुराणेत्रयोदशोऽध्यायः ॥ १३ ॥ ॥ छ ॥ ॥ ॥ ॥ ॥
नारदउवाच ॥ शृणुचान्यन्महाभागतीर्थानामुत्तमोत्तमम् ॥ नागतीर्थमितिख्यातंनागानांकामदंशुभ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

म् ॥ १ ॥ काद्रवेणःपुरातातपस्तेपुःसुदुश्वरम् ॥ शप्तामात्रापुरानागास्तन्मोक्षार्थंद्विजोत्तम ॥
॥ २ ॥ संवर्तकउवाच ॥ नागाःकिमर्थंदेवर्षेशप्तामात्रामहाबलाः ॥ उत्पन्नाश्चकथंतेवैकथंमोक्षमु
पागताः ॥ ३ ॥ नारदउवाच ॥ शृणुपुण्यांकथामेतांसर्वकिल्बिषनाशिनीम् ॥ कद्रुर्नाममहाभागावि
नताचद्विजोत्तम ॥ ४ ॥ दक्षस्यकन्येद्वेविप्रप्रदत्तेकाश्यपायच ॥ कद्रूंजज्ञुर्महाभागाःशेषाद्याःपन्न
गोत्तमाः ॥ ५ ॥ द्वौपुत्रौविनतायाश्चजज्ञातेपक्षिसत्तमौ ॥ महाबलौमहावीर्यौविख्यातौगरुडारुणौ
॥ ६ ॥ नागाःसहस्रंविप्रेंद्रकद्रुपुत्रामहाबलाः ॥ दशतेषांप्रधानांश्चतान्छृणुष्वमहामते ॥ ७ ॥ अनं
तोवासुकिस्तक्षःकंबलाश्वतरौतथा ॥ सुमुखोधृतराष्ट्रश्चपिंडिकोगुलिकस्तथा ॥ ८ ॥ धनंजयश्चद
शमःप्रधानास्तेप्रकीर्त्तिताः ॥ तयोर्भगिन्योर्विप्रेंद्रमिथोभेदोऽभ्यजायत ॥ ९ ॥ द्वेषःसापत्निकोविप्र ॥ ३९ ॥
बद्धवैरोथजायते ॥ द्वेषाभिभूतानागानांमातामत्सरिणीपुरा ॥ १० ॥ मेरुपृष्ठेविनतयाचचारसहसा
शुभा ॥ ददर्शातेश्वरत्नंतेउच्चैःश्रवसमंतिकात् ॥ ११ ॥ कुंदेंदुशंखप्रतिमंचरंतंस्वेच्छयागतम् ॥ द्व

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF
ष्ट्वाकद्रुरुवाचेदंविनताद्विजसत्तम ॥ १२ ॥ श्वेतवाजिरयंभद्रेकृष्णवालोतिशोभनः ॥ मथ्यमानेमृ
तेजातःपूर्वंसुरगणार्चितः ॥ १३ ॥ अथतामाहविनताअश्वराजंविलोक्यवै ॥ शुक्लवालोमहानेषःदृ
श्यतेचाभिनंदिते ॥ १४ ॥ सर्वश्वेतोभिकल्याणिपूर्णचंद्रइवास्थितः ॥ कद्रुरुवाच ॥ कृष्णवाल
मिदंभद्रेअश्वरत्नमनिंदिते ॥ संदेहोयदितेभद्रेपश्यतांकिंविलंबसे ॥ १५ ॥ विनतापिद्विजश्रेष्ठतामा
हेदंविनिश्चिता ॥ एहियत्तेभिलषितंतदस्तुपणमावयोः ॥ १६ ॥ कद्रुरुवाच ॥ यद्यश्वराजोभगि
निश्वेतवालोभवेदयम् ॥ तवदासीभविष्यामिनीचकर्मवशानुगा ॥१७॥ यद्ययंकृष्णवालोवैअश्वराजः
शुचिस्मिते ॥ दासीभूत्वाममवशेमत्कर्मकुरुभामिनि ॥१८॥ तेतथेतिप्रतिज्ञायश्वोद्रक्ष्यावेतिजग्मतुः॥
आश्रमंपुण्यशीलस्यकाश्यपस्यमहात्मनः ॥१९॥ ततश्चिंतापराकद्रुर्जेष्यामिविनतांकथम् ॥ निश्चित्य
मनसापुत्रानिदमाहविषोल्बणान् ॥ २० ॥ अनंतादीन्कामबलानाहूयानृतमानसा ॥ कृष्णाभूत्वा
श्वराजस्यवालाग्रेवसतानघाः ॥ २१ ॥ श्वःप्रभातेदंदशूकामन्नियोगान्महाबलाः ॥ तच्छ्रुत्वावि
CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

व्हलाभीताअनृतंपन्नगोत्तमाः ॥ २२ ॥ तामाहुर्मातरंतेवैनकुर्मोवचनंतव ॥ असत्यंनकरिष्यामोय
थेच्छासितथाकुरु ॥ २३ ॥ ततश्चुकोपनागानांमातापुत्रान्शशापच ॥ अलंघनीयंपुत्राणांमातृवा
क्यमितिश्रुतिः ॥ २४ ॥ युष्माभिर्लंघितंतच्चतस्माच्छापंददामिवः ॥ जनमेजयस्यराजर्षेःसर्पसत्रं
भविष्यति ॥ २५ ॥ तस्मिन्विभावसौसर्वेपतिताःक्षयमेष्यथ ॥ इतिमातुर्वचःश्रुत्वादंदशूकाविषो
ल्बणाः ॥ २६ ॥ दशप्रधानागोकर्णंतपश्चर्तुंसमाययुः ॥ इतरेदंदशूकास्तुअश्ववालंचवेष्टिताः ॥
॥ २७ ॥ गोकर्णक्षेत्रमासाद्यप्रधानादशनायकाः ॥ कृत्वाश्रमपदंतत्रतीर्थंलिंगंमहोदयम् ॥ २८ ॥
वायुभक्षास्तपश्चक्रुर्ब्रह्मध्यानपरायणाः ॥ तेषांतपःप्रभावेणब्रह्माप्रत्यक्षतांगतः ॥ २९ ॥ सहरुद्रे
णभगवान्विष्णुनाचद्विजोत्तम ॥ ब्रह्माप्रोवाचतान्नागान्वरंवृणुतसादरम् ॥ ३० ॥ सिद्धिमिच्छा
मभगवन्तप्रसान्महतावयम् ॥ तांनोदेहिमहाभागमग्नानांभवसागरे ॥ ३१ ॥ मात्राशप्तावयंब्रह्म
न्तन्मोक्षंनोप्रसादय ॥ मृत्योर्भीततरादेवत्वांवयंशरणंगताः ॥ ३२ ॥ ब्रह्मोवाच ॥ सिद्धिर्वो

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

भवितानागासिद्धायूयंभविष्यथ ॥ मातृशापोनभवितामत्प्रसादान्नसंशयः ॥ ३३ ॥ तीर्थलिंगं
महाभागाःसर्वसिद्धिकरंभवेत् ॥ नारदउवाच ॥ इतिदत्वावरंतेषांब्रह्माचांतरधीयत ॥ श्राव
णेमासिशुक्लेतुपंचम्यांनागतीर्थके ॥ ३४ ॥ स्नात्वातुविधिनादेवंसर्पसूक्तेनचार्चयेत् ॥ सर्वान्कामान
वाप्नोतिसर्वयज्ञफलंभवेत् ॥ ३५ ॥ उभयोःपक्षयोश्चैवपंचम्यांनागतीर्थके ॥ स्नानंविधायतल्लिंगं
नागसूक्तेनचार्चयेत् ॥ ३६ ॥ संवत्सरांतंविप्रेंद्रश्रद्धाभक्तिसमन्वितः ॥ सर्वपापाद्विनिर्मुक्तोमातृ
शापात्तथैवच ॥ ३७ ॥ पितृशापाद्विमुक्तस्तुदीर्घायुःसंततिर्भवेत् ॥ ३८ ॥ इतिश्रीस्कांदेगोकर्ण
पुराणेनागतीर्थकथनंनामचतुर्दशोऽध्यायः ॥ १४ ॥ ॥ छ ॥ ॥ छ ॥ ॥ ॥
नारदउवाच ॥ अगस्त्यतीर्थंतत्रैवत्रिषुलोकेषुविश्रुतम् ॥ सर्वपापप्रशमनंक्षिप्रंसिद्धिकरंनृणाम् ॥१॥
रहस्यंतन्नजानंतिज्ञात्वानार्चंतिपापिनः ॥ तस्मिन्स्नात्वाद्विजवरतीर्थेगस्त्यतपोमये ॥ २ ॥ पापकं
चुकमुत्सृज्यराजतेत्रनसंशयः ॥ यथाजीर्णत्वचंत्यक्त्वाराजतेवायुभोजनः ॥ ३ ॥ संवर्तकउवाच ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

अगस्त्यस्यचमेशंसजन्मकर्मचसत्तम ॥ तस्यतीर्थप्रभावंचश्रोतुमिच्छाप्रवर्तते॥४॥नारदउवाच ॥ शृणु तस्यमहत्पुण्यंचरितंपुण्यकर्मणः ॥ ब्रह्मणोमानसःपुत्रोअगस्त्योनामविश्रुतः ॥ ५ ॥ निधिःसतपसां वत्ससत्यवादीजितेंद्रियः ॥ पुराविवादेदेवानांत्यक्त्वाक्षेत्रंमहामुनिः ॥ ६ ॥ वायुभूतःशरीरार्थीचचा राकाशगःपुरा ॥ ततोददर्शमित्रंचवरुणंचमहामतिः ॥ ७ ॥ तौविप्रौतपसादग्धकिल्बिषेणांतरात्म ना ॥ तोषयामासविप्रेंद्रघोरेणतपसामुनिः ॥ ८ ॥ येषांमायामयीविप्रतपसानिर्ममेप्रभुः ॥ सादि व्यरूपिणीविप्रत्रैलोक्यानंददायिनी ॥ ९ ॥ कांताकामरतिप्रख्यासर्वाभरणभूषिता ॥ सूक्ष्मांबरध राकाशातपोवनमुपागमत् ॥ १० ॥ प्रभयातद्वनंतस्याबभासेभास्करप्रभम् ॥ मत्तेभगमनामत्ता विचिन्वंतीचपादपान् ॥ ११ ॥ गायंतीचहसंतीचतद्वनंविचचारह ॥ तांदृष्ट्वामित्रावरुणौविस्म योत्फुल्ललोचनौ ॥ १२ ॥ सुप्रसन्नौनिरीक्ष्यैतांकंदर्पवशमागतौ ॥ ततोवायुर्महाभागस्तस्या वस्त्रंशुशोभनम् ॥ १३ ॥ आकृष्याकाशमार्गेणशनैस्तामपकर्षत ॥ ततोविशालजघनाबिभ्रती

॥ ४१ ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

रूपमुत्तमम् ॥ १४ ॥ वस्त्रार्थंपरिबभ्रामवियत्यनुपमाद्विज ॥ तांदृष्ट्वाविचरंतींतौमेघेसौदामि
नीमिव ॥ १५ ॥ कामाभिभूतौतौदेवौविकारमुपजग्मतुः ॥ तस्यारूपेणमहतामोहितौमुनिसत्त
मौ ॥ १६ ॥ अक्षोभ्यौकेनचिद्ब्रह्मन्तयाक्षोभमुपागतौ ॥ रूपेणतेनाप्सरसऋषेस्तस्यतपोबलात् ॥
॥ १७ ॥ तयोःशुक्लंप्रचस्कंदअमोघंदेवयोस्तदा ॥ तौदृष्ट्वाक्लिन्नमनसौव्रीडयाधोमुखौतदा ॥ १८ ॥
गृहीत्वाकलशेवीर्यंनिदधातेद्विजोत्तमौ ॥ जग्मतुस्तौद्विजश्रेष्ठौगंगाधारंप्रतिप्रभौ ॥ १९ ॥ तत्रकृ
त्वायथान्यायंस्नानंतौमुनिसत्तमौ ॥ समाप्यनित्यकर्माणिआश्रमंपुनरागतौ ॥ २० ॥ तावत्तत्क
लशाज्जातोअगस्त्योभगवानृषिः ॥ वसिष्ठश्चमहातेजाबभूवतदनुद्विज ॥ २१ ॥ तौप्रेक्ष्यमित्रावरु
णौविस्मयंजग्मतुःपरम् ॥ तयोःकर्माणिचक्रातेवासिष्ठागस्त्ययोस्तदा ॥ २२ ॥ गर्भाधानादिभद्रंते
चौलोपनयनादिकम् ॥ तयोर्ज्येष्ठोमहातेजामैत्रावरुणिरात्मवान् ॥ २३ ॥ अगस्त्यस्तपसायुक्तो
विभावसुसमप्रभः ॥ सिद्धिकामस्तपस्तेपेघोरमुद्दिश्यशंकरम् ॥ २४ ॥ तमागत्याहसानारीपुत्रस्त्वंमे

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तपोधन ॥ कामयानस्यमांविप्रवरुणस्यमहामतेः ॥ २५ ॥ जातोसितस्माद्विप्रर्षेमाताहंतवसुव्रत ॥
देहिमह्यंवरान्विप्रयथाकामंचराम्यहम् ॥ २६ ॥ तस्यास्तद्वचनंश्रुत्वाअगस्त्योभगवानृषिः ॥ ताम
ब्रवीत्स्वजननींब्रूहिमत्तःकिमिच्छसि ॥ २७ ॥ स्त्रीरुवाच ॥ वरंमेदेहिभगवन्स्थानंमेसंप्रकल्पय ॥
रूपौदार्यगुणैर्ब्रह्मन्नमत्तोन्याधिकाभवेत् ॥ २८ ॥ अगस्त्यउवाच ॥ जलंजातासिकल्याणितपसा
महताममम ॥ तस्मादलंबुसानाम्नालोकेख्यातिंगमिष्यसि ॥ २९ ॥ इंद्रलोकगताभद्रेमत्प्रसादादनिं
दिते ॥ यथाकामंयथाजोषंविचरःशाश्वतीःसमाः ॥ ३० ॥ रूपौदार्यगुणैस्त्वंवैलोकेख्यातिंगामिष्य
सि ॥ स्वर्गौकसांचभद्रंतेचित्तप्रमथिनीभव ॥ ३१ ॥ स्वर्लोकसारभूतात्वंमत्प्रसादाद्भविष्यसि ॥ ना
रदउवाच ॥ इतितस्यैवरंदत्वाभगवान्कुंभसंभवः ॥ चचारतस्मिन्ब्रह्मर्षिस्तपोघोरंमहामते ॥ ३२ ॥ ॥ ४२ ॥
तपोवनेपुण्यतमेसिद्धिकामःपुराद्विज ॥ वायुभक्षोनिराहारोवर्षाणामयुतंमुनिः ॥ ३३ ॥ तीर्थंतत्रवि
धायैवलिंगंस्थाप्यसुनिर्मलम् ॥ संवर्तकउवाच ॥ तपोवनंनाममुनेश्रुतंतेवदतोनघ ॥ तस्यप्रभावंच

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

वदतस्मिन्पुण्यफलंतथा ॥ ३४ ॥ प्रमाणंतस्यभगवन्यथावद्वक्तुमर्हसि ॥ तस्मिन्तपोवनेसिद्धान्व
दमोद्विजसत्तम ॥ ३५ ॥ नारदउवाच. ॥ शृणुपुत्रमहत्पुण्यंश्रुतमात्राघनाशनम् ॥ तपोवनमिति
ख्यातंत्रैलोक्येचोत्तमोत्तमम् ॥३६॥ शतशृंगामितिख्यातांहिमवच्छिखरंमहत् ॥ ब्रह्मादिवसतिर्ह्येषो
मध्येहिमवतःस्थितः ॥ ३७ ॥ पश्चिमेनतुकैलासशृंगांशिवनिकेतनम् ॥ पूर्वभागेस्यविप्रर्षेविष्णोः
स्थानमनुत्तमम् ॥ ३८ ॥ इंद्रनीलमितिख्यातंशिखरांहिमवाच्छिरः ॥ तयोर्मध्यगतोविप्रशतशृंगोम
हागिरिः ॥ ३९ ॥ तस्योपरिष्टाद्गरुडःसुपर्णःपततांवरः ॥ आदायनागराजानंसुमुखोदुर्मुखंबली ॥
॥ ४० ॥ तत्सानुविटपालोकीअधोदृष्टिमपातयत् ॥ अधोमुखात्तुगरुडान्नागस्तस्मिन्पपातह ॥४१॥
दुर्मुखंपतितंदृष्ट्वावैनतेयोमहाबलः ॥ क्रोधात्तदनुभद्रंतेशतशृंगमुपागमत् ॥ ४२ ॥ तमागतमाभि
प्रेक्ष्यदुर्मुखोभुजगोत्तमः ॥ विवेशाधोमुखस्तस्मिन्पर्वतेभयपीडितः ॥ ४३ ॥ सार्धयोजनमास्मिन्सः
प्रविवेशाहिराडसौ ॥ गरुत्मानपिविप्रर्षेक्रोधमाहारयद्भृशम् ॥ ४४ ॥ क्रोधाभिभूतःखगराट्सार्ध

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

योजनमुच्छ्रितम् ॥ उत्पाद्यशतशृंगंतुगरुडःपततांवरः ॥ ४५ ॥ सनागराजमादायजगामनभसाद
रात् ॥ ऋश्यस्तत्रविप्राश्चशृंगेहिमवतःशुभे ॥ ४६ ॥ सब्रह्मकाःसहस्राणांचतुर्दशमहामुने ॥ संति
द्विकोटितीर्थानिसंतिवैब्राह्मणोत्तमाः ॥ ४७ ॥ तैःसर्वैःसहितंशृंगमादायाकाशमागमत् ॥ ततोबुबोध
भगवान्ब्रह्मालोकगुरुःस्वयम् ॥ ४८ ॥ एतत्कर्मसुपर्णस्यज्ञात्वाक्रोधवशंगतः ॥ त्रैलोक्यभारंभगवाना
त्मन्याधायसत्वरम् ॥ ४९ ॥ दधानंशतशृंगंतंपीडयामासवैद्विजम् ॥ तस्मिन्कालेसगरुडोगोकर्ण
स्योपरिस्थितः ॥ ५० ॥ भारात्तोविह्वलःपक्षीररासचरुरोदच ॥ अधोविसार्यदृष्टिंसददर्शतपसांनिधिम्
॥ ५१ ॥ अगस्त्यमाश्रमेतस्मिन्तपस्यंतंतपोवने ॥ दृष्ट्वातमाहगरुडःशरणंभवमेनघ ॥ ५२ ॥
भयार्तेमयिविप्रर्षेदयांकुरुतपोनिधे ॥ प्रसीदभगवन्विप्रनमोस्तुऋषिसत्तम ॥ ५३ ॥ त्वंनोधाता ॥ ४३ ॥
विधाताचलोकानांद्विजसत्तम ॥ तपसाधार्यतेसर्वंत्वयैवपुरुषोत्तम ॥ ५४ ॥ समुद्रेमज्ज्यमानंमांत
पसोद्धर्तुमर्हसि ॥ ततस्तद्वचनंश्रुत्वाअगस्त्योभगवानृषिः ॥ ५५ ॥ माभैरित्याहतंविप्रतपसादग्ध

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

किल्बिषः ॥ तद्वाक्याल्हादनंप्राप्यकिंचिदुच्छ्वसितःखगः ॥ ५६ ॥ तमाहविप्रंब्रह्मर्षेश्रूयतामितिसादरम् ॥ मयाज्ञानाच्चब्रह्मर्षेकृतमेतदसांप्रतम् ॥ ५७ हिमवच्छिखरंविप्रशतशृंगामितिप्रभो ॥ अज्ञानादथदर्पाद्वाक्रोधाद्वाल्याच्चसुव्रत ॥ ५८ ॥ उत्पाटितंमयातस्मात्ब्रह्मार्षिशतसंयुतम् ॥ सब्रह्मकामिदंब्रह्मन्नशक्तोम्यपकार्षितुम् ॥ ५९ ॥ अवतारयैतद्भगवन्मांविशोकंकुरुप्रभो ॥ इतिश्रुत्वासभगवानगस्त्योमुनिसत्तमः ॥ ६० ॥ मज्जमानंसशिखरंगरुडंवीक्ष्यसुव्रत ॥ ध्यात्वामुहूर्त्तंब्रह्मर्षिर्ज्ञात्वातत्कारणंमुनिः ॥ ६१ ॥ शंभोर्मनोगतंसर्वंतस्मादानीतवान्खगः ॥ विशोकंगरुडंविप्रकरिष्यामीतिचिंतयन् ॥ ६२ ॥ अवतारयामासमुनिःशिखरंगरुडाद्दशी ॥ अगस्त्यस्तुमहातेजारुद्रयोन्यास्तुदक्षिणे ॥ ६३ ॥ निधायांभोनिधौतस्मिन्मोक्षयामासकाश्यपिम् ॥ गरुडंमोक्षयित्वातुअगस्त्योभगवानृषिः ॥ स्वयंतपश्चरन्नेवआस्तेमुनिवरस्तदा ॥ ६४ ॥ इतिश्रीगोकर्णपुराणेशतशृंगानयनंनामपंचदशोऽध्यायः ॥ १५ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

॥ नारदउवाच ॥ तंदृष्ट्वाभगवान्ब्रह्माकर्मचान्यैःसुदुष्करम् ॥ कृतंगरुडमालोक्यमुक्तंविस्मयमाय
यौ ॥ १ ॥ वीक्षांचक्रेदशादिशोभगवान्पद्मसंभवः ॥ ततोददर्शपार्श्वस्थमगस्त्यंतपसांनिधिम् ॥ २॥
अनेनमोचितःपक्षीशिखरंचावतारितम् ॥ शक्तोसौतपसाकर्तुंसर्वंसंहर्तुमेववा ॥ ३ ॥ इतिमत्वावि
रिंचस्तुकिंचित्कोपसमान्वितः ॥ ध्यानमास्तेचिरंविप्रकिमेतदितिचिंतयन् ॥ ४ ॥ ततोज्ञात्वायथा
वृत्तंभवितव्यंहितत्तथा ॥ प्रसन्नमूर्तिर्ब्रह्मातुगरुडंवाक्यमब्रवीत् ॥ ५ ॥ ब्रह्मोवाच ॥ तुष्टोस्मिते
पक्षिराजसाध्येतत्कृतवानासि ॥ गोकर्णेसहरुद्रेणवसाम्यत्रयथासुखम् ॥ ६ ॥ ध्यातोरुद्रेणमनसा
रातशृंगागमःखग ॥ निमित्तमात्रंत्वंवत्सतस्मात्तुष्टोस्मिसुव्रत ॥ ७ ॥ गरुडउवाच ॥अपराधंकृत
मिदमज्ञानात्प्रपितामह ॥ बाल्याद्दर्पाच्चमोहाच्चयावत्तत्क्षंतुमर्हसि ॥ ८ ॥ वरंददासिचेन्मह्यंवृणोमि
वितरायवै ॥ ब्रह्मोवाच ॥ वृणीष्वपुत्रतुष्टोस्मिधैर्येणतत्रपक्षिप ॥ त्रैलोक्यभारमुद्वोढुंत्वदृतेनास्ति ॥ ४४ ॥
कश्चन ॥ ९ ॥ गरुडउवाच ॥ त्रैलोक्यभारंभगवन्यदिह्येतत्सुरोत्तम ॥ तवप्रसादाद्देवेशवोढुमि

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

च्छाम्ययत्ततः ॥ १० ॥ भूतेषुकश्चिद्भगवन्स्थावरेषुचरेषुच ॥ नमत्तोन्योधिकोदेवबलवीर्यपराक्र
मैः ॥ ११ ॥ भवेदेतद्वरंदेवममत्वंदातुमर्हसि ॥ ब्रह्मोवाच ॥ त्रैलोक्यभारंगरुडमत्प्रसादादयत्न
तः ॥ वहिष्यसिखगश्रेष्ठबलवीर्यपराक्रमैः ॥ १२ ॥ अधिकोभवसर्वेभ्योमत्प्रसादान्महाबल ॥ वा
योर्विकारस्त्वंपुत्रपक्षिरूपधरोपरः ॥ १३ ॥ वाहनार्थंमहाविष्णोर्निर्मितस्त्वंमयापुरा ॥ ध्वजश्चतस्यदे
वस्यभवान्भवितुमर्हसि ॥ १४ ॥ सएकएवभगवान्विश्वरूपधरोहरिः ॥ हितार्थंसर्वदेवानांवरमन्य
द्ददामिते ॥ १५ ॥ नाक्रमिष्यंतिवैपुत्रआयुधानितनुंतव ॥ इतितस्मैवरंदत्वाब्रह्माब्रह्मर्षिभिःसह ॥
॥ १६ ॥ तपोघोरंसमास्थायशतशृंगेऽवसत्प्रभुः ॥ रुद्रेणसहसंगम्यभगवान्लोकपावनः ॥ १७ ॥
मूर्ध्नितत्पर्वतेंद्रस्यसत्यलोकगतोयथा ॥ कमंडलुंनिधायात्रसर्वतीर्थमयंद्विज ॥ १८ ॥ नारदउवाच॥
गरुडोपिद्विजश्रेष्ठवरंप्राप्यपितामहात् ॥ स्वनाम्नितीर्थेस्नात्वातुस्वमूर्तिंस्थाप्यतत्रतु ॥ १९ ॥ अग
स्त्यमभिवाद्याथयतोविष्णुस्ततोगतः ॥ यदेतद्भुविविख्यातमाश्रमंगारुडंमुने ॥ २० ॥ तीर्थपक्षिपते

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

स्तातगारुडंनामविश्रुतम् ॥ क्षिप्रंसिद्धिकरंतद्वैआयुर्वर्धनमुत्तमम् ॥ २१ ॥ तत्रस्थोयोद्विजश्रेष्ठगाय
त्रींगरुडस्यतु ॥ चतुर्लक्षंजपेद्यस्तुतूष्णींदीक्षासमन्वितः ॥ २२ ॥ महासिद्धिर्भवेत्तस्यअणिमादिर्न
संशयः ॥ अगस्त्यतीर्थाद्वायव्यदिशिकिंचिद्द्विजोत्तम ॥ २३ ॥ पंचविंशत्पदेविप्रगारुडंतीर्थमुत्तम
म ॥ शतशृंगंस्थापयित्वाकृत्वातीर्थमहोदयम् ॥ २४ ॥ तत्रैवविधिवत्स्नात्वास्वमूर्तिंस्थाप्यतत्रतु ॥
विष्णुसान्निध्यमगमत्सर्वलोकसुपूजितः ॥ २५ ॥ नारदउवाच ॥ अगस्त्योपिमहातेजाःस्वनाम्ना
तीर्थमुत्तमम् ॥ विधायलिंगंसंस्थाप्यवरदेश्वरनामकम् ॥ २६ ॥ बहुकालंतपःकृत्वासिद्धिंप्राप्यमहे
श्वरात् ॥ यथाकामंसगोकर्णेस्थितवान्मुनिसत्तमः ॥ २७ ॥ सूतउवाच ॥ तपोवनंपुण्यतमंदेवा
नांविश्रुतंमहत् ॥ आब्रह्मतीर्थाद्भद्रंतेगंगाधारंतदिष्यते ॥ २८ ॥ शतशृंगस्यभद्रंतेतटंपूर्वोत्तरंद्वि
ज ॥ तपोवनंपुण्यतमंदेवगंधर्वसेवितम् ॥ २९ ॥ तीर्थानांकोटितत्रैवएकस्थंभवातिद्विज ॥ भयात्प
तंगराजस्यएकीभूतंपुरातनम् ॥ ३० ॥ तदेतद्दृश्यतेब्रम्हन्शतशृंगोत्तरेतटे ॥ कोटितीर्थमितिख्या

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF.

तंतीर्थकोटिद्रवेमुने ॥ ३१ ॥ तस्मिन्स्नातःसर्वतीर्थैस्नातोभवतिमानवः ॥ दशाश्वमेधावभृथेनतु
ल्यंवदंत्याप्ताःकोटितीर्थेद्विजाग्र्याः ॥ स्नानंपुण्यंपुण्यकृतांवारिष्ठंस्नातास्तस्मिन्नाकपृष्ठंव्रजंति ॥ ३२ ॥
नारदउवाच ॥ गिरेःशृंगवतःपुत्रतटेदाक्षिणपश्चिमे ॥ अपरंकोटिविप्रर्षेतीर्थानांपावकात्मज ॥३३ ॥
भयात्पतंगराजस्यसमुद्रेप्रविवेशह ॥ शतशृंगंगिरिवरंनाकपृष्ठंविदुर्बुधाः ॥ ३४ ॥ ब्रम्हलोकइति
प्रोक्तोब्रम्हावासंचतंविदुः ॥ ध्यातोरुद्रेणमनसाशतशृंगागमोमुने ॥ ३५ ॥ रुद्राज्ञयाविप्रवरसा
रभूतानिसर्वतः ॥ आगतानिद्विजश्रेष्ठबहुनाकथितेनकिम् ॥ ३६ ॥ तस्माच्छ्रेष्ठतमंलोकेगोकर्ण
मभीधीयते ॥ गोकर्णेचाद्विजश्रेष्ठशृंगवानुत्तमोत्तमः ॥ ३७ ॥ गिरेरधस्तात्तत्रैवविशालंनामवैद्वि
ज ॥ बिलंविबुधराजस्यविश्वकर्माचकारह ॥ ३८ ॥ क्रीडत्यहर्निशंतत्रसहासिद्धैःसुरेश्वरः ॥ मा
समेकंसुरश्रेष्ठोवसत्याखंढलःप्रभुः ॥ ३९ ॥ आगत्यविषुसंक्रांत्यांसहदेवैर्महर्षिभिः ॥ स्नात्वासर्वे
षुतीर्थेषुरुद्रपूजापरायणः ॥ ४० ॥ आश्विनेमासिविप्रर्षेसहगंधर्वराक्षसैः ॥ महाप्सरोभिर्भगवा

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

न्बिलेतस्मिन्महायशाः ॥ ४१ ॥ क्रीडित्वातत्रभद्रंतेउषित्वाचद्विजोत्तम ॥ कार्तिकेमासिभ
गवान्पुनर्गच्छेद्यथेप्सितम् ॥ ४२ ॥ यावदास्तेसुरपतिस्तावत्त्रैलोक्यमत्रच ॥ यथास्थानंयथा
जोषंगोकर्णेवसतिद्विज ॥ ४३ ॥ तस्मादाश्वयुजोमासःश्रेष्ठस्तत्तीर्थसेवने ॥ तुलागतेभास्करे
तुससुरासुरपन्नगाः ॥ ४४ ॥ स्नातुमायांतिगोकर्णेस्नातायांतिकृतार्थताम् ॥ इंद्रःसर्वसुरैःसार्धमा
गत्यविषुसंक्रमे ॥ ४५ ॥ गोकर्णस्थेषुतीर्थेषुस्नात्वामासंवसेद्बिले ॥ स्नात्वाकार्तिकपौर्णम्यांपुनर्ग
च्छेद्यथासुखम् ॥ ४६ ॥ तस्माद्गोकर्णयात्रायांविषुयुक्तार्तिकोवरः ॥ भोगार्थंदेवराजस्यनिर्मितंवि
श्वकर्मणा ॥ ४७ ॥ गोकर्णेतद्बिलंश्रेष्ठंसिद्धचारणसेवितम् ॥ विशालंनामभद्रंतेसर्वभोगसम
न्वितम् ॥ ४८ ॥ इतिश्रीगोकर्णपुराणेगरुडतीर्थकथनंनामषोडशोऽध्यायः ॥ १६ ॥ ॥ छ ॥
नारदउवाच ॥ यत्रभूम्यातपस्तप्तंगोगर्भमितिविश्रुतम् ॥ यत्रप्रवेशमात्रेणनपुनर्गर्भभाङ्नरः ॥ १॥
शतशृंगगिरेर्मूर्ध्निस्थितंतत्रैवशोभनम् ॥ संवर्त्तकउवाच ॥ कुतोभूम्यातपस्तप्तंवदकारुण्यतोमुने

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

॥ २ ॥ नारदउवाच ॥ यदाक्षत्रियदायादानिहताःपृथिवीतले ॥ तदाभार्गवरामेणयज्ञार्थंयाचितोमु
निः ॥ ३ ॥ कश्यपःपरमोदारस्तदायज्ञमकारयत् ॥ ततोभार्गवरामोसौतस्मैसर्वांवसुंधराम् ॥ ४ ॥
प्रददौकाश्यपायैवसर्वस्वंदाक्षिणांद्विज ॥ तांभूमिंकाश्यपोब्रम्हन्ब्राम्हणेभ्यःपृथक्पृथक् ॥ ५ ॥ संवि
भज्यददौसर्वांयथायोग्यंमहामुनिः ॥ अराजकातदाचासीत्सर्वाभूमिर्महामुने ॥ ६ ॥ अराजकत्वा
ल्लोकास्तुयथेच्छंपरिवर्तिताः ॥ बभूवातितरांलोकेअधर्मोलोकनाशनः ॥ ७ ॥ ततोभूमिस्तदाधर्मं
सोढुंनाक्षमतानघ ॥ ततोगोगर्भमासाद्यशतशृंगस्यमूर्धनि ॥ ८ ॥ अधोभागंप्रविश्यैवप्राणायामप
रायणा ॥ ब्रम्हाकमंडलुंपूर्वस्थापयामासयत्रवै ॥ ९ ॥ तस्मादीशान्यतोदेशेचचारसुचिरंतपः ॥
भूमित्वंकाश्यपश्चक्रेतदासर्वधरात्मकः ॥१०॥ दिव्यवर्षसहस्रंतुसर्वंदध्रेमहामुनिः ॥ तपस्यंत्यांततोभू
म्यांतस्यैतुष्टोमहेश्वरः ॥ ११ ॥ आविर्बभूवदेवेशःपार्वत्यासहशंकरः ॥ ततोभूमिंसमीक्ष्यैववरंब्रूही
त्यभाषत ॥ १२ ॥ तुष्टोस्मितपसाभद्रेभक्त्याचानियमेनच ॥ किंतेऽभीष्टंममब्रूहितद्ददान्यविलंबि

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तम् ॥ १३ ॥ इतिशर्वेरितंश्रुत्वावाक्यंभूमिस्तदाद्विज ॥ तंप्रणम्यधरादेवीस्तोतुंसमुपचक्रमे ॥१४॥
भूमिरुवाच ॥ नमस्तेविष्णुमित्रायलोकपालार्चितायच ॥ नमस्त्रिशूलहस्तायत्रिनेत्रायत्रिमूर्तये ॥
॥ १५ ॥ जगन्नाथनमस्तेस्तुभक्तप्रियनमोस्तुते ॥ इतिस्तुत्वातदादेवीवाक्यमेतदुवाचतम् ॥ १६ ॥
वरंददासिचेन्मह्यंवराहायदिचाप्यहम् ॥ शंभोवृणोम्यहंत्वत्तःसिद्धिंचानन्यदुर्लभाम् ॥ १७ ॥ अरा
जकमिदंविश्वंयथापूर्वंकुरुप्रभो ॥ इदंममतपस्थानंगोगर्भमितिविश्रुतम् ॥ १८ ॥ अत्रप्रवेशमात्रे
णनराणांपार्वतीपते ॥ नपुनर्गर्भवासश्चयथाभूयात्तथाकुरु ॥ १९ ॥ शंकरउवाच ॥ सिद्धासिपूर्व
मेवत्वंमत्प्रसादाद्वरानने ॥ राजन्वतीभवशुभेकाश्यपीतिप्रथाभवेत् ॥ २० ॥ इदंतवतपस्थानंत्व
न्नाम्नाविश्रुतंभवेत् ॥ अत्रप्रवेशनान्नृणांनभवद्गर्भसंस्थितिः ॥ २१ ॥ पापिष्ठाश्चापिमुच्यंतेकिंपुनः ॥ ४७ ॥
सुजनानराः ॥ अत्रस्थित्वानरोयस्तुगायत्रींलक्षकंजपेत् ॥ २२ ॥ भूमिलाभोभवेत्तस्यवांछितार्थंच
विंदति ॥ इतिदत्वावरंभूम्यैशंकरोलोकभावनः ॥ २३ ॥ पार्वत्याप्रमथैःसार्धंतत्रैवादर्शनंगतः ॥ भू

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

मित्वंप्राप्यसादेवीयथापूर्वीद्विजोत्तम ॥ २४ ॥ शिवंनिरामयंलब्ध्वाकाश्यपीतिप्रथामगात् ॥२५॥
संवर्तकउवाच ॥ वसिष्ठस्यचदेवर्षेर्जन्मकर्मचपौर्विकम् ॥ ब्रह्मणोमानसःपुत्रइतिपूर्वमयाश्रुतम् ॥
॥ २६ ॥ इदानींत्वन्यथाजातंकथितंभवताथमम ॥ तत्सर्वंविस्तराद्ब्रह्मन्श्रोतुमिच्छामिकथ्यताम् ॥
॥ २७ ॥ नारदउवाच ॥ शृणुतस्यमहत्पुण्यंचरितंब्राह्मणस्यच ॥ ब्रह्मणोमानसःपुत्रोवसिष्ठोनाम्नसं
शयः ॥ २८॥ तेजसातत्समोविप्रतपसाचदमेनच ॥ लोकानुग्रहकृच्छांतःक्षमयापृथिवीसमः॥२९॥
तेजसाभास्करसमोगंभीरेवरुणोपमः ॥ कोपेकालानलसमोयोगानामीश्वरःप्रभुः ॥ ३० ॥ हिमवंतं
समागम्यतपःकुर्वन्नुवाससः ॥ इक्ष्वाकुर्मनुजःश्रेष्ठःपौत्रःसूर्यस्यवीर्यवान् ॥ ३१ ॥ वरयामासतेजस्वी
वसिष्ठंगुरुमात्मनः ॥ शुश्रूषयाद्विजश्रेष्ठनृपस्यप्रददौप्रभुः ॥ ३२ ॥ वेदान्सांगोपानिषदःसर्वशास्त्राणि
चैवाहि ॥ ब्रम्हाविद्यांचविप्रर्षेप्रसन्नोऽध्यापयत्तदा ॥ ३३ ॥ अवाप्यविद्यामिक्ष्वाकुर्वरमन्यमयाचत ॥
मदन्वयेजानिष्यंतियेनृपाःपृथिवीश्वराः ॥ ३४ ॥ तेषांपुरोधास्त्वंविप्रगुरुश्चभवमानद ॥ ३५ ॥ नारद

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

उवाच ॥ तथाकरिष्यइत्युक्तोमुनिनासनृपस्तदा ॥ तदन्वयेशुद्धमतिरभवत्पार्थिवोत्तमः ॥ ३६ ॥
निमिर्नाममहातेजाराजापरमधार्मिकः ॥ शापंददौस्वगुरवेतत्याजस्वकलेवरम् ॥ ३७ ॥ त्यक्त्वा
शरीरंभगवान्वसिष्ठोपिमहातपाः ॥ ब्रम्हलोकंजगामाशुसनराजाथसत्तम ॥३८॥ संवर्तकउवाच ॥
किमर्थंस्वगुरुंब्रम्हन्नशप्तवान्राजसत्तमः ॥ किंकृतंतस्यराजर्षेर्वसिष्ठेनमहात्मना ॥३९॥ नारदउवाच ॥
इक्ष्वाकुवंशप्रभवोराजापरमधार्मिकः ॥ निमिर्नाममहातेजामृगयामगमद्वशी ॥ ४० ॥ व्यायामखि
न्नोराजातुस्वगृहंपुनरागमत् ॥ क्षुत्तृड्भ्यांसमहातेजाःपीडितःपुरुषर्षभः ॥ ४१ ॥ श्रमार्त्तःशयने
दिव्येसुष्वापनरपुंगवः ॥ निद्रयापहृतज्ञानोमृतकल्पोबभूवह ॥ ४२ ॥ तावद्वसिष्ठोभगवान्तत्पुरं
समुपागमत् ॥ द्वारदेशंसमागम्यद्वास्थंवचनमब्रवीत् ॥ ४३ ॥ गच्छद्वास्थममादेशाद्राजानंपृथि ॥ ४८ ॥
वीपतिम् ॥ ब्रूहितंदर्शनाकांक्षीवासिष्ठोद्वारितिष्ठति ॥४४॥ तथेत्युक्त्वाततोद्वास्थस्तद्गृहंप्रविवेशह ॥
प्रविश्यदृष्ट्वाशयनेदृढनिद्रामुपागतम् ॥ ४५ ॥ तत्पार्श्वस्थैःसहतदामंत्रयित्वाविनिर्गतः ॥ कृतांज

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

लिपुटोभूत्वाद्दास्थोमुनिमुवाचह ॥ ४७ ॥ निद्रयापह्नतज्ञानोराजाशेतेमहामुने ॥ मुहूर्तंक्षम्यताम
त्रप्रतिवुद्धोभवेदसौ ॥ ४८ ॥ ततोदृष्ट्वामुनिश्रेष्ठराजानंपृथिवीपतिम् ॥ आश्रमंप्रतिगंतासिनमो
स्तुद्विजसत्तम ॥ ४९ ॥ ततश्चुकोपभगवान्वासिष्ठस्तपतांवरः ॥ पुनःपुनरमेयात्मानागच्छत्वित्यभा
षत ॥ ५० ॥ क्षम्यताामितितैरुक्तोप्यशपद्राजसत्तमम् ॥ मामवज्ञायदुर्बुद्धेदर्शनेप्सुमुपागतम् ॥
॥ ५१ ॥ निद्रांनिषेवसेयस्मादशरीरोमरिष्यासि ॥ इत्युक्त्वाप्रययौविप्रोवासिष्ठोपियथागतम् ॥ ५२ ॥
ततःप्रबुद्धोराजर्षिर्निमिःसत्यपराक्रमः ॥ अस्वस्थइवराजेंद्रोगुरुशापप्रपीडितः ॥ ५३ ॥ तस्यतत्क
थयामासशापंकोपंचसत्तम ॥ वसिष्ठस्यमहाबुद्धिरमात्यप्रवरोनृपम् ॥ ५४ ॥ तच्छ्रुत्वाराजशार्दूलो
गुरोःशापमकारणम् ॥ निद्रयापह्नतज्ञानंमृतकल्पमसौगुरुः ॥ ५५ ॥ अनागसेवृथाब्रम्हन्शापाय
कृतनिश्चयः ॥ यस्मादनर्हतेशापोदत्तोद्विजवरत्वया ॥५६॥ तस्मात्तवापिब्रह्मर्षेक्षेत्रंनाशमुपैष्यति ॥
इत्युक्त्वानृवरःसोथतदात्यक्त्वाकलेवरम् ॥ ५७ ॥ अशरीरोवायुभूतोब्रम्हाणंसमुपागमत् ॥ वसिष्ठो

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

पिमहातेजात्यक्त्वाक्षेत्रंमहामते ॥ ५८ ॥ ब्रम्हाणमुपचक्रामशरीरार्थीद्विजोत्तम ॥ तौदृष्ट्वाभगवान्ब्र
म्हावायुभूतौद्विजोत्तम ॥ ५९ ॥ चिंतयामाससतदाकथमेतौकरिष्यतः ॥ अत्रासिष्ठोह्ययंलोकोन
श्यतेनात्रसंशयः ॥ ६० ॥ इतिमत्वाविरिंचस्तुवसिष्ठंप्राहबुद्धिमान् ॥ गच्छत्वंविप्रशार्दूलख्यातंपु
ण्यतमंमहत् ॥ ६१ ॥ तपोवनमितिख्यातंगोकर्णेवरुणाश्रमम् ॥ मित्रेणसार्धंतस्मिन्सघोरेतपासि
वर्तते ॥ ६२ ॥ तत्रगत्वात्वमपिवैतस्यविप्रस्यचोदरम् ॥ प्रविश्यपुत्रदेहंचसमाप्नुहिममाज्ञया ॥ ६३ ॥
इत्युक्त्वातंपद्मयोनिराजानंप्रत्यभाषत ॥ मत्तःकिमिच्छसेराजन्ब्रूहिताद्वितराम्यहम् ॥ ६४ ॥ निमि
रुवाच ॥ नेच्छामिभगवन्क्षेत्रमनित्यमतिचंचलम् ॥ चक्षुषोःसर्वमर्त्यानांवसेयंशाश्वतीःसमाः ॥
॥ ६५ ॥ त्वत्प्रसादाद्देवदेववरमेतद्वृणोम्यहम् ॥ साक्षिवत्सर्वभूतेषुविचरामीतिमेमतिः ॥ ६६ ॥ त ॥ ४१ ॥
थास्त्वितिवरंब्रम्हातस्मैराज्ञेददौविभुः ॥ तदाप्रभृतिराजर्षिर्मर्त्यानांनेत्रयोःस्थितः ॥ ६७ ॥ तदारभ्य
नराराजन्बभूवुःसनिमेषकाः ॥ ६८ ॥ नारदउवाच ॥ वसिष्ठोपिमहातेजाःसहागस्त्येनधीमता ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ततोदेहंचसंप्राप्यवरुणान्मुनिसत्तमात् ॥ ६९ ॥ पुनश्चचारसुचिरंतपोघोरंमहामुनिः ॥ तपोवनेपु
ण्यतमेप्राणायामपरायणः ॥ ७० ॥ लिंगंतत्रप्रतिष्ठाप्यतीर्थंकृत्वासुनिर्मलम् ॥ ततोरुद्रेणतुष्टेनत
पसातस्यधीमता ॥ ७१ ॥ अगस्त्यस्ययथादत्तंतथातस्यापिसुव्रत ॥ योगैश्वर्यादिसिद्धिंचइच्छावा
संमहीतले ॥ ७२ ॥ अवाप्यशंभोर्मुनिराड्यथाकामंजगामह ॥ अगस्त्यतीर्थाद्दक्षिणतःशरपातेद्वि
जोत्तम ॥ ७३ ॥ वसिष्ठस्याश्रमंपुण्यंशतशृंगशुभेतटे ॥ ७४ ॥ इतिश्रीस्कांदेगोकर्णपुराणेसप्त
दशोऽध्यायः ॥ १७ ॥ ॥ ॥ ॥ छ ॥ ॥ ॥ ॥ छ ॥ ॥
संवर्तकउवाच ॥ विश्वामित्रःकथंब्रम्हन्ब्राम्हण्यंसमुपागमत् ॥ ब्रम्हन्कोसौचराजर्षिर्विश्वामित्रोम
हायशाः ॥ १ ॥ राजाभूत्वामहातेजाब्राम्हण्यंप्राप्तकान्कथम् ॥ कस्यवंशेसमुत्पन्नःकथंसिद्धिमुपा
गतः ॥ २ ॥ नारदउवाच ॥ श्रूयतामाभिधास्यामिकथांपुण्यांद्विजोत्तम ॥ ब्रम्हणोमानसःपुत्रोकुशि
कोनामवीर्यवान् ॥ ३ ॥ भूमेःसृष्टःपालनार्थंसृष्टिकर्तास्वयंभुवा ॥ सपालयामासजगत्त्रैलोक्यंस

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

चराचरम् ॥ ४ ॥ तस्यपुत्रोमहानासीत्कुशनाभिरितिश्रुतः ॥ सपालयामासततोपितर्युपरतेसाति ॥
॥ ५ ॥ तस्याप्यभूद्राधिरितिपुत्रःपुत्रवतांवरः ॥ पालयामाससपुनःसप्तद्वीपांवसुंधराम् ॥ ६ ॥ धर्मे
णनरशार्दूलोयथासृष्टंस्वयंभुवा ॥ आधयोव्याधयस्तंद्रीवासंचोरभयंतथा ॥ ७ ॥ अगाधबुद्धेर्गाधे
स्तुब्रह्मोतरमवर्धत ॥ अधर्मेषुमतिःक्वापिनासीद्राजानिशासति ॥ ८ ॥ रंजनात्सर्वभूतानांराजानाम्ना
प्रतीयते ॥ साम्राज्यमकरोद्राजासम्राडितिततःस्मृतः ॥ ९ ॥ कन्याकुब्जेतिविख्यातानगरीतस्य
धीमतः ॥ अनपत्यःसराजेंद्रस्तपोघोरमतप्यत ॥ १० ॥ अमात्यप्रवरेस्वस्यराज्यभारंसमर्प्यच ॥ ग
त्वातपोवनंघोरंतपस्यंतंनृपोत्तमम् ॥ ११ ॥ यदृच्छयागतोब्रह्मन्दुर्वासास्तंददर्शह ॥ उत्धृत्यबाहुं
भद्रंतेपादांगुष्ठेनसंस्थितम् ॥ १२ ॥ तमुवाचमहामन्युर्दुर्वासामुनिपुंगवः ॥ क्षुधितोस्मिमहाराज
भोजनंमेप्रदीयताम् ॥ १३ ॥ उष्णंनवमिदानींमेप्रयच्छाहारमुत्तमम् ॥ इत्युक्तःसमहाराजःप्रणि ॥ ५० ॥
पत्यकृतांजलिः ॥ १४ ॥ स्वागतंतेतुब्रह्मर्षेह्यपनेष्यामितेक्षुधाम् ॥ आहारेणेतिदिव्येनतमुक्त्वापुरः

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

षोत्तम ॥ १५ ॥ मृन्मयंपात्रमादायभिक्षांदेहीत्युवाचह ॥ वृक्षराजंमहस्कंधमश्वत्थंब्राह्मणोत्तम ॥
॥ १६ ॥ ततोश्वत्थान्महाभागाकन्यादिव्यस्वरूपिणी ॥ निर्गत्याहारमादायदिव्यंतस्मैप्रयच्छत ॥
॥ १७ ॥ दत्वाभैक्षंनृपायाथतास्मिन्नेवाविवेशसा ॥ तेनान्नेनसराजर्षिर्भोजयामासतंद्विजम् ॥ १८ ॥
भुक्त्वायथेष्टंभगवान्दुर्वासाब्राह्मणोत्तमः ॥ तुतोषतस्यनृपतेस्तपसाचदमेनच ॥ १९ ॥ भक्त्याच
विप्रशार्दूलोवरंब्रूहीत्यभाषत ॥ ततोगाधिस्तंप्रणम्यअपुत्रोस्मिद्विजोत्तम ॥ २० ॥ प्रयच्छपुत्रंब्र
ह्मण्यंपितृपिंडप्रदायकम् ॥ असह्यदुःखंभगवन्ऋणमल्पंव्यपोहय ॥ २१ ॥ इत्युक्तस्तेनदुर्वासा
ध्यानमास्तेमहामुनिः ॥ ध्यात्वाचिरमुवाचेदंराजानंमुनिसत्तमः ॥ २२ ॥ पुत्रस्तेभविताराजन्ध्रुवंरा
ज्यंचपालयेत् ॥ कन्यारत्नंचभद्रंतेकुमारस्तेभविष्यति ॥ २३ ॥ पुत्रस्तेराजशार्दूलविष्णोस्तुल्योभ
विष्यति ॥ इत्युक्त्वातंनृपवरंदुर्वासामुनिपुंगवः ॥ २४ ॥ उन्मत्तवेगस्तस्मात्तुतत्रैवांतरधीयत ॥
गाधिश्चागम्यनगरींपालयामासमेदिनीम् ॥ २५ ॥ कथयामासराजेंद्रोदुर्वासवचनंतदा ॥ अमात्ये

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

भ्यश्वदेव्यै चयथाद्दत्तंतपोवने ॥२६॥ ततःकालेनमहताकन्याकुब्जेऽप्सरोपमा ॥ अजायतविचित्रांगी
कन्याकमललोचना ॥ २७ ॥ तांकन्यांदेवगर्भाभांदृष्ट्वागाधिरनंदत ॥ तथ्यावाणीतितांदृष्ट्वासोत्यर्थं
राजकुंजरः ॥ २८ ॥ नामतस्याश्वकाराथगिरासत्यवतीतिवै ॥ तंगत्वावरयामासऋचीकोभृगुनंदनः
॥ २९ ॥ तमाहगाधिर्धर्मात्माशुल्कैर्देयासुतामया ॥ तमपृच्छदृचीकस्तुशुल्कंशुल्कवतांवरः ॥३०॥
ततोगाधिर्विचिंत्यैवंऋचीकंवाक्यमब्रवीत् ॥ एकतःश्यामवर्णानांगोक्षीरसमवर्चसाम् ॥ ३१ ॥ स
हस्रंवाजिमुख्यानांमनोमारुतरंहसाम् ॥ मह्यंप्रयच्छविप्रेंद्रकन्याशुल्कार्थमीप्सितम् ॥ ३२ ॥ तथा
स्त्वितिऋचीकस्तुजगामवरुणालयम् ॥ जयाशिषंप्रयुज्यास्मैवरुणायभृगोःसुतः ॥ ३३ ॥ समुद्रमव
दत्सोथकन्याशुल्कार्थमंजसा ॥ एकतःश्यामवर्णानांकुंदेंदुसमवर्चसाम् ॥ ३४ ॥ सहस्रंवाजिमुख्या
नांमह्यंदेहिपयोनिधे ॥ तथेत्युक्त्वाददौतस्मैप्रचेतायादसांपतिः ॥ ३५ ॥ आनाय्याश्वांश्वतान्दिव्या
नृचीकःपुनरागमत् ॥ धर्मेणोद्वाह्यतांकन्यांऋचीकस्तपतांवरः ॥ ३६ ॥ आश्रमंप्रतिचक्रामतया

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

सार्धंद्विजोत्तमः ॥ ततोऋचीकःसुप्रीतस्तयासहसुमध्यया ॥ ३७ ॥ अवसन्मुनिशार्दूलःपौलोम्या
मघवानिव ॥ श्रुत्वाविवाहंपुत्रस्यभृगुःप्रीतोऽभ्ययात्सुतम् ॥ ३८ ॥ तमागतमभिप्रेक्ष्यपितरंपितृव
त्सलः ॥ प्रत्युत्थायतयासार्धंशिरसाह्यनमद्गुरुम् ॥ ३९ ॥ उत्थापयामासगुरुःस्नुषयासहितंसुतम् ॥
स्नुषांदृष्ट्वासभगवान्सुप्रीतेनांतरात्मना ॥ ४० ॥ तामब्रवीद्भृगुःपुत्रिवरंब्रूहीतिसादरम् ॥ प्रसन्नचेत
संज्ञात्वाश्वशुरंसाशुचिस्मिता ॥ ४१ ॥ मनसाचिंतयामासपुत्रंमातुस्तथात्मनः ॥ ४२ ॥ वरमेत
दितिज्ञात्वालज्जयाधोमुखीस्थिता ॥ चिंतितंतदभिज्ञायभृगुस्तांप्रत्यभाषत ॥ ४३ ॥ पुत्रस्तेभवि
ताभद्रेतथामातुस्तवानघे ॥ ऋतुस्नाताचभवतीमाताचतवभामिनी ॥ ४४ ॥ आलिंगेतांपृथग्वृक्षंसा
श्वत्थंत्वमुदुंबरम् ॥ मत्प्रसादादसंदिग्धंद्वयोःपुत्रौभविष्यतः ॥ ४५ ॥ इत्युक्त्वाभगवान्तांचपुत्रप्री
त्याभृगुस्तदा ॥ यथागतंजगामाथअनुज्ञाप्यभृगुःसुतम् ॥ ४६ ॥ तेनोक्तंयत्तथातेवैनचक्रातेन्यथा
ह्यभूत् ॥ तयोर्गर्भःसमभवत्कालेनमहताद्विज ॥ ४७ ॥ ततःपुनरमेयात्माभृगुरायात्तदाश्रमम् ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

दृष्ट्वाऋचीकःपितरमायांतंसूर्यवर्चसम् ॥ ४८ ॥ प्रत्युत्थायसपत्नीकःशिरसातमवंदत ॥ भृगुस्तुभा
र्यांपुत्रस्यदृष्ट्वाप्रीतोभवत्तदा ॥ ४९ ॥ तामाहेदंसभगवान्विपर्यासःकृतस्त्वया ॥ आलिंगनेयथाभ
द्रेमयोक्तंनकृतंत्वया ॥ ५० ॥ तस्मात्तवसुतोभद्रेक्षत्राचारोभविष्यति ॥ भ्रातातवमहाभागेक्षत्रि
योपिचरेत्तपः ॥ ५१ ॥ ब्रह्माचारोभवेत्पुत्रिब्राह्मणश्चभविष्यति ॥ इत्युक्ताभृगुणासातुश्वशुरं
प्रत्यभाषत ॥ ५२ ॥ तवपौत्रोमहाभागत्वत्प्रसादादनिंदितः ॥ ब्रह्माचारोभवेत्तातवरमेतद्वृणोम्यहम्
॥ ५३ ॥ तच्छ्रुत्वाभगवान्प्राहस्नुषांकमललोचनाम् ॥ पुत्रस्तेमत्प्रसादेनब्रह्माचारोभविष्यति ॥५ ॥
पौत्रस्तवमहाभागेक्षत्राचारोभवेद्ध्रुवम् ॥ इत्युक्त्वाप्रययौविप्रःस्वमाश्रममनिंदितः ॥ ५५ ॥
गाधिस्त्वरक्षत्तंगर्भपुत्रजन्मसमुत्सुकः ॥ अजायततस्तस्यांविश्वामित्रःप्रतापवान् ॥ ५६ ॥ आ
दित्यइवतेजस्वीकामदेवइवापरः ॥ गाधिस्तुदृष्ट्वापुत्रस्यमुखंपूर्णशशिप्रभम् ॥ ५७ ॥ हर्षेणमह
ताविष्टोनिधिंदृष्ट्वायथाधनः ॥ सूतकेवर्तमानंतंवागुवाचाशरीरिणी ॥ ५८ ॥ अयंतवसुतोराजन्च

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

क्रवर्तीभविष्यति ॥ प्रभयातवपुत्रस्यत्रैलोक्यंप्रभविष्यति ॥ ५९ ॥ तेजसैतस्यराजेंद्रदेवासुरमहोर
गाः ॥ गंधर्वाप्सरसश्चैवमनुष्याःपशवस्तथा ॥ ६० ॥ बिभेष्यंतिमहाराजन्नित्युक्त्वाविररामह ॥ त
च्छ्रुत्वाराजशार्दूलःप्रीतिमानभवत्तदा ॥ ६१ ॥ पालयामासच्चपुनःसहपुत्रेणमेदिनीम् ॥ जातेकुमा
रेविप्रेंद्रत्रैलोक्यंसचराचरम् ॥ ६२ ॥ येनामित्रंभृशंपुत्रविश्वंकौशिकसूनुना ॥ नामतस्याकरोद्रा
जाविश्वामित्रेतिसादरम् ॥ ६३ ॥ गाधिस्तुदृष्ट्वातनयंसमर्थंराज्यपालने ॥ अभिषिच्यस्वराज्येतंत
पोवनमियात्स्वयम् ॥ ६४ तमागतंराज्यमथविश्वामित्रःप्रतापवान् ॥ पालयामासपृथिवींद्वितीयइ
वभास्करः ॥ ६५ ॥ दशवर्षसहस्राणिराज्यंकृत्वामहामनाः ॥ विरोधमगमद्राजावसिष्ठेनमहात्म
ना ॥ ६६ ॥ ततोब्राह्मण्यमगमत्किमन्यच्छ्रोतुमिच्छसि ॥ ६७ ॥ ॥ इतिश्रीस्कांदेगोकर्णपु
राणेअष्टादशोऽध्यायः ॥ १८ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥
संवर्त्तकउवाच ॥ किंनिमित्तमभूद्वैरंविश्वामित्रवसिष्ठयोः ॥ महात्मनोश्चब्रह्मर्षेश्श्रोतुमिच्छामितत्त्व

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तः ॥ १ ॥ नारदउवाच ॥ शृणुपुत्रमहत्पुण्यंचरित्रंतस्यधीमतः ॥ विश्वामित्रस्यभद्रंतेसर्वकिल्बिष
नाशनम् ॥ २ ॥ सपालयामासाचिरंसतद्वीपवसुंधराम् ॥ प्रजारक्षणधर्मेणसाक्षाद्धर्मइवापरः ॥ ३॥
तेजसादित्यसदृशःक्षमयापृथिवीसमः ॥ पराक्रमेविष्णुसमःकोपेंऽतकसमप्रभः ॥४ ॥ अश्विनाविव
रूपेणज्ञानेरुद्रइवापरः ॥ तस्यधर्मरतस्यासीत्पृथिवीवशवर्तिनी ॥ ५ ॥ तेजसातस्यनृपतेर्देवासुरम
होरगाः ॥ भीतास्तिष्ठंतिवशगाःकिंकराइवनित्यशः ॥ ६ ॥ एवंसाम्राज्यमकरोद्विश्वामित्रःप्रताप
वान् ॥ सकदाचिन्महातेजामृगयामगमद्वशी ॥ ७ ॥ हिमवंतंगिरिवरंसमग्रबलवाहनः ॥ नाना
धातुसमाकीर्णनानाद्रुमलताकुलम् ॥ ८ ॥ मृगैर्नानाविधैर्जुष्टंसिद्धचारणसेवितम् ॥ गंधर्वाप्सर
सोभिश्चसुरकिंनरसेवितम् ॥ ९ ॥ ऋषिभिर्ब्रह्मकल्पैश्चसेवितंवनमुत्तमम् ॥ तस्मिन्सराजाध
र्मात्मामृगयाव्यसनाकुलः ॥ १० ॥ उन्मत्तइवराजेंद्रोगिरौतस्मिन्व्यधावत ॥ ततःसराजाविप्रर्षे
क्षुधयापीडितोभृशम् ॥ ११ ॥ तृषयाचनृपश्रेष्ठोव्यायामेनचधर्षितः ॥ आश्रमंप्रतिचक्रामवासि

॥ ५३ ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ष्ठस्यमहात्मनः ॥ १२ ॥ पादेतुशतशृंगस्यरम्यंमुनिनिषेवितम् ॥ पुण्यतीर्थैःसमाकीर्णब्राह्मणैश्चस
मावृतम् ॥ १३ ॥ प्रशांतमृगभूयिष्ठंपक्षिभिश्चनिषेवितम् ॥ गजाःसिंहैःसहविभोरमंतेतत्रतत्राहि ॥
॥ १४ ॥ तथान्यैर्मृगाविप्रमार्जारैःसहमूषकाः ॥ शांतानिसर्वभूतानिवनेतस्यतपोनिधेः ॥१५॥
फलपुष्पान्वितैर्वृक्षैरुपेतंपुण्यगंधिभिः ॥ तमाश्रमंनृपवरःप्रविवेशयदृच्छया ॥ १६ ॥ तदाशिष्यैःप
रिवृतोवसिष्ठोमुनिसत्तमः ॥ शिष्यानध्यापयन्नास्तेविभावसुसमप्रभः ॥ १७ ॥ तमभ्यगच्छद्राजेंद्रो
विश्वामित्रोमहामनाः ॥ ववंदेशिरसाभ्येत्यब्रह्माणंवासवोयथा ॥ १८ ॥ तमाशीर्भिर्नृपश्रेष्ठमाभिनंद्ये
दमब्रवीत् ॥ वसिष्ठउवाच ॥ स्वागतंतेमहाराजन्नास्यतांसहमंत्रिभिः ॥ आसनंचददौतस्मैसपर्यां
चार्घ्यपूर्विकाम् ॥ १९ ॥ कुशलंतेमहाराजसर्वत्रेतितमब्रवीत् ॥ ततःसराजासुप्रीतःपूजितोमुनिना
भृशम् ॥ २० ॥ तमुवाचततोराजासुप्रीतेनांतरात्मना ॥ विश्वामित्रउवाच ॥ सर्वत्रकुशलंब्रह्मन्प्र
सादात्तवसुव्रत ॥ एवंपरस्परंतौतुसंभाष्येदंद्विजोत्तम ॥ २१ ॥ कथाभिरनुकूलाभिश्चिरंतुतुषतुश्च

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तौ ॥ ततःश्रांतमभिज्ञायविश्वामित्रंतपोनिधिः ॥ २२ ॥ आमंत्रयामासतदासबलोभुज्यतामिति ॥
तच्छ्रुत्वाकौशिकोराजाविस्मयोत्फुल्ललोचनः ॥ २३ ॥ क्षुत्तृड्भ्यांचभृशंराजापीडितोवाक्यमब्रवीत् ॥
बलैर्नानाविधैर्ब्रह्मन्युक्तोहंकेवलोचन ॥ २४ ॥ हस्त्यश्वयुक्ताबहुलासेनाममदुरत्यया ॥ ततोऽश
क्यंभोजयितुमनुज्ञांदेहिमेप्रभो ॥ २५ ॥ तच्छ्रुत्वामुनिशार्दूलोविश्वामित्रस्यभाषितम् ॥ स्थीयतामि
तिचोवाचभोजयिष्याम्यहंक्षणात् ॥ २६ ॥ इत्युक्त्वाहूयसुरभिंनंदिनीमिदमब्रवीत् ॥ प्रियातिथि
रसौराजाममाश्रममुपागमत् ॥ २७ ॥ सबलस्यास्यभद्रंतेदेहिभोजनमुत्तमम् ॥ यथाकामंयथाजो
षंयथाप्रीतियथासुखम् ॥ २८ ॥ षड्रसैःसहितंदेवितस्यान्नंसंप्रदीयताम् ॥ तथेत्युक्त्वातुतंदेवीकाम
धेनुर्दुदोहवै ॥ २९ ॥ प्रासादपंक्तीर्विविधाःस्वर्णप्राकारतोरणाः ॥ हस्तिशालाश्वशालाश्वसभामंडपि
कास्तथा ॥ ३० ॥ गृहाणितेषांसर्वेषामनुरूपाण्यनेकशः ॥ कल्पयामासविविधंनिमेषात्सुरभिस्त
दा ॥ ३१ ॥ तेषुसर्वेषुचपुनःक्षीरबान्यनुरूपतः ॥ गृहेषुपूरयामासरत्नानिविविधानिच ॥ ३२ ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

अपूपानिविचित्राणिघृतकुंभानिभागशः ॥ रौप्यसौवर्णपात्रेषुसंभृतानिदधीनिच ॥ ३३ ॥ वस्त्राणि
चमहार्हाणिपानानिविविधानिच ॥ सुरासंपूर्णपात्राणिसौवर्णानिक्वचित्क्वचित् ॥ ३४ ॥ षड्रसैः
समुपेतानिसंपूर्णान्यन्नसंचयैः ॥ गंधमाल्याद्यलंकारैर्भोज्यैर्नानाविधैरपि ॥ ३५ ॥ यथार्हंबुभुजुस्तेतु
विश्वामित्रचमूचराः ॥ हस्त्यश्वोष्ट्राजशुनकायथाकामंजजाक्षिरे ॥ ३६ ॥ मनुष्याश्चयथाकामंदि
व्यस्रक्चंदनोक्षिताः ॥ स्नात्वाविलिप्यविधिवदलंकृत्ययथार्हतः ॥ ३७ ॥ दिव्यवस्त्रानुसंवीतादिव्या
न्नंबुभुजुस्तदा ॥ एकैकस्यचतुःकन्याश्चतुःपरिचरास्तथा ॥ ३८ ॥ भुक्त्वापीत्वाचमूरेवंयथाकामं
यथासुखम् ॥ यथासुकृतिनःस्वर्गेभोगाभुंजंत्यनामयाः ॥ ३९ ॥ कर्मानुरूपंविप्रेंद्रयथातेबुभुजुस्त
दा ॥ अभिप्रेतान्रसान्पीत्वामत्तानृत्यंतितत्रहि ॥ ४० ॥ अभुक्तंपूर्ववत्भुक्त्वासुप्रीतेनांतरात्मना ॥
विस्मयंपरमंजग्मुःकिमेतदितिसैनिकाः ॥ ४१ ॥ ऊचुःपरस्परंविप्रनयास्यामोगृहान्वयम् ॥ वत्स्या
मोत्रैवसुचिरंस्वर्गोयंनतपोवनम् ॥ ४२ ॥ सिद्धावयंनगच्छामइत्याहुःसैनिकामुदा ॥ नासीत्स्वपुत्र

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

दारेषुसंगृह्यतेषांद्विजोत्तम ॥ ४३ ॥ ततस्तत्रैवतत्रैवभुक्तंपीतंयथासुखम् ॥ तत्क्षणात्तद्बलंसर्वंतृप्तमा
सीद्द्विजोत्तम ॥ ४४ ॥ ततःसराजाविप्रर्षेमुमुदेमघवानिव ॥ स्नात्वादिव्यांबरधरोदिव्यगंधानुलेपितः
॥ ४५ ॥ दिव्यस्त्रीभिःपरिवृतोदिव्यान्नंबुभुजेनृपः ॥ ततःसभोगान्भुक्त्वातुयथाकामंयथासुखम्
॥ ४६ ॥ सुखोपविष्टःशयनेपरार्ध्यास्तरणान्विते ॥ ततःसूतामागधाश्चबंदिनश्चपृथग्विधाः ॥४७॥ स्त्व
न्तोमधुरैर्वाक्यैस्तंत्रीलयसमन्वितैः ॥ उपातिष्ठंतराजानंशक्रंदेवगणाइव ॥ ४८ ॥ ततोनृत्तैश्चगेयैश्च
मुमुदेसनृपोत्तमः ॥ वनंचैत्ररथंप्राप्यमोदतेमघवान्यथा ॥ ४९ ॥ ततस्तांरजनींतत्रसभृत्यबलवाहनः
अवसद्राजशार्दूलःस्वर्गेसुकृतिनोयथा ॥५०॥ इतिश्रीस्कांदेगोकर्णपुराणेएकोनविंशोऽध्यायः॥१९॥
नारदउवाच ॥ व्यपनीयनिशांतांतुसुखसुप्तोत्थितोनृपः ॥ कृत्वाआवश्यकंकर्मवासिष्ठंपुनरागमत् ॥
॥ १ ॥ अभिवाद्योपसंगृह्यइदंवचनमब्रवीत् ॥ कामधेनुरियंब्रह्मन्रत्नभूतासदामम ॥ २ ॥ अयुते
नगवांब्रह्मन्ममैतांदातुमर्हसि ॥ योग्याममैषाब्रह्मर्षेदातुमर्हसिसुव्रत ॥ ३ ॥ वसिष्ठउवाच ॥ नदेयागौ

॥ ५५ ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

नृपश्रेष्ठहोमधेनुरियंमम ॥ अग्नीनामतिथीनांचहविर्भूताहिनंदिनी ॥ ४ ॥ अयुक्तंतवराजेंद्रब्रह्मस्वं याचितुंध्रुवम् ॥ गृहीतुंब्राह्मणेभ्योवैराजात्वंरक्षिताभुवः ॥ ५ ॥ विश्वामित्रउवाच ॥ यद्येतदेवंभग वन्मौल्यंदास्याम्यहंतव ॥ राज्येनभोमदीयेनदेहिगांममभानदाम् ॥ ६ ॥ भुंक्ष्वराज्यंमुनिवरयथाका मंयथासुखम् ॥ लोकालोकांतरगतांपृथ्वीमनुशासय ॥ ७ ॥ राज्येनापिनदेयागौर्ममेयंपार्थिवोत्तम ॥ ननिर्बंधस्त्वयाकार्योगच्छपालयमेदिनीम् ॥ ८ ॥ इत्युक्तस्तेनराजासौकोपमाहारयद्भृशम् ॥ मन्यु नापहृतज्ञानोवासिष्ठमिदमब्रवीत् ॥ ९ ॥ नेष्यामिगांबलाद्विप्रबलार्हःक्षत्रियोऽस्म्यहम् ॥ राज्येनापि गरीयेयंविप्रयेनेरितंत्वया ॥ १० ॥ राज्येनममकिंकार्यंबलहीनेनसुव्रत ॥ क्षमाबलंब्राह्मणानांबलंक्षत्रे षुतैजसम् ॥ ११ ॥ तस्मान्नेष्यामिगांविप्रयथेच्छसितथाकुरु ॥ इत्युक्त्वाकौशिकोराजाअगृह्णात्तांप यस्विनीम् ॥ १२ ॥ क्षमास्वकंबलमितितूष्णीमास्तेमहामुनिः ॥ ततोगृहीत्वातांक्रूराःकशादंडप्रतोद नैः ॥ १३ ॥ बध्वारज्वाभृशंधेनुंवसिष्ठस्यमहात्मनः ॥ विश्वामित्राज्ञयामर्त्यानिर्ययुस्तद्वनाद्बहिः ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

॥ १४ ॥ पाषाणैर्लगुडैःपाशैःपीडितासुरभिर्भृशम् ॥ हुंकारैर्भर्त्सयित्वाताताश्रमंपुनरागमत् ॥
॥ १५ ॥ क्रोधरक्तेक्षणादेवीवसिष्ठस्याग्रतःस्थिता ॥ उवाचचमुनिंधेनुःकिमर्थंत्यजसेप्रभो ॥ १६ ॥
अनागसींद्विजश्रेष्ठतवशुश्रूषणेरताम् ॥ केनदोषेणभगवन्त्यजसेमामनिंदिताम् ॥ १७ ॥ इतित
स्यास्तुवचनंश्रुत्वामेरुरिवाचलः ॥ वसिष्ठःप्राहतांधेनुंममन्युर्नविद्यते ॥ १८ ॥क्षमाबलंब्राह्मणानां
बलंक्षत्रेषुतैजसम् ॥ स्वधर्मान्नचलिष्यामिक्षमासाराहिसाधवः ॥ १९ ॥ नबुद्धिपूर्वंत्यक्तासिमया
त्वंवरवर्णिनि ॥ विश्वामित्रबलैःक्रूरैर्बलात्त्वंनीयसेशुभे ॥२०॥ इतितेनेरितंश्रुत्वाकामधेनुरुवाचह ॥
शक्तोसितपसाविप्रत्रैलोक्यंसचराचरम् ॥ २१ ॥ स्रष्टुंसंहर्तुमथवाकिमुतेकौशिकोऽल्पकः ॥ शर
णंत्वांप्रपन्नास्मिमांनत्यक्तुंत्वमर्हसि ॥ २२ ॥ वसिष्ठउवाच ॥ नकरिष्यामिभद्रंतेतपोव्ययमानिंदि
ते ॥ संचितस्यापिमहतातपसायशसःशुभे ॥ २३ ॥ अल्पोविकोपःसुभगेतूलराशिंकृशानुवत् ॥
क्षणेनभस्मसात्कुर्यात्तस्मात्कोपंत्यजाम्यहम् ॥ २४ ॥ तच्छ्रुत्वासुरभिर्वाक्यंवसिष्ठस्यमहात्मनः ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

कामधेनुरुवाचेदंसुरभिःसुरपूजिता ॥ २५ ॥ सुरभिरुवाच ॥ अस्तिचेन्मय्यनुक्रोशोनयास्यामिम
हाव्रत ॥ बलान्नेतुंनशक्यातैर्यदिनत्यजतेभवान् ॥ २६ ॥ अहंतांवारयिष्यामिविश्वामित्रस्यवाहि
नीम् ॥ अथतामाहभगवान्क्षीयतांयदिशक्यते ॥ २७ ॥ नत्यक्तासिमयाभद्रेयथेच्छसितथाकुरु ॥
आकर्ण्यतद्वचःपुत्रसुरभिर्लोकपूजिता ॥ २८ ॥ विश्वामित्रबलैर्घोरैःपरितःपरिवारिता ॥ संत्यज्य
भूमितरसागौराकाशमुपागमत् ॥ २९ ॥ स्थित्वांतरिक्षेसुरभिःकामधेनुरनिंदिता ॥ यौधान्ससर्जवि
विधान्नानाप्रहरणोद्यतान् ॥ ३० ॥ अंगान्शकान्पुलिंदांश्चम्लेंछानाटविकांस्तथा ॥ बर्बरान्पारदां
श्चैवनिर्मदान्मालवानपि ॥ ३१ ॥ पुच्छतःपार्श्वतश्चैवघ्राणतश्चक्षुषस्तथा ॥ कर्णतोरोमतश्चैवना
नारूपाद्विजोत्तम ॥ ३२ ॥ नानावेषधरास्तेवैनानाप्रहरणोद्यताः ॥ चतुर्गुणाधिकाविप्रबलैर्गाधिसु
तस्यतु ॥ ३३ ॥ परिवार्यबलंतेतुसौरभेयामहाबलाः ॥ क्षणात्तेनाशयांचक्रुःकिंहोम्रुगगणानिव ॥
॥ ३४ ॥ तद्बलंपार्थिवेंद्रस्यविश्वामित्रावशेषितम् ॥ दुर्वाससस्तुवचनाद्भृगोश्चैवमहात्मनः ॥३५ ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

भावित्वाच्चविधेःपुत्रमुक्तस्तस्मादसौनृपः ॥ ३६ ॥ हत्वातद्वाहिनींतैर्वसौरभेयामहाबलाः ॥ विज
न्हुस्तेयथाकामंदेशंप्राप्यमुदान्विताः ॥ ३७ ॥ सुरभिश्चापिराजेंद्रयथापूर्वमतिष्ठत ॥ ततोगाधिसु
तोराजाएकाकीहतसैनिकः ॥ ३८ ॥ वनेनिर्वेदमगमदृष्ट्वाब्राह्मंमहद्बलम् ॥ ब्राह्मणेषुबलंमत्वाधिक्कृ
त्वाक्षात्रियंबलम् ॥ ३९ ॥ तपसेकृतसंकल्पस्त्यक्त्वाराज्यमकंटकम् ॥ शतशृंगमुपागम्याहिमव
च्छिखरंमहत् ॥ ४० ॥ तपस्तेपेनिराहारोद्रष्टुकामोमहेश्वरम् ॥ सहस्रवर्षपर्यंतंवाय्वंबुकृतभोजनः
॥४१॥ ततोरुद्रस्तमभ्येत्यवरंब्रूहीत्यभाषत ॥ वरंवव्रेसराजर्षिर्यथातच्छृणुपावके ॥४२॥ वासिष्ठंहंतु
मिच्छामितेसहाय्येनशंकर ॥ आयुधंचसहायंचवरमेतद्वृणोम्यहम् ॥ ४३ ॥ तथेत्युक्त्वात्रिनेत्र
स्तुरौद्रंदंडमदात्प्रभुः ॥ भूतान्नानाविधांस्तस्यददौसाहाय्यकर्मणे ॥४४॥ रौद्रंदंडंसमादायवृतस्तत्पार्ष
दैर्नृपः ॥ वसिष्ठंपुनरागच्छद्धंतुकामोऽतिनिर्घृणः ॥ ४५ ॥ वसिष्ठस्तुमहातेजाज्ञात्वातस्यचिकीर्षि
तम् ॥ ब्रह्मदंडमुपादायस्थितःसूर्यइवापरः ॥ ४६ ॥ ततोरुद्रगणैःसार्धंरुद्रदंडधरःप्रभुः॥ युयुधेसचि

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

रविप्रभूतैर्नानाविधैःसह ॥ ४७ ॥ तेषांक्षिप्तान्यायुधानिसर्वैषांग्रसतेनघः ॥ ब्रह्मदंडेनभद्रंतेकिम
न्यदधिकंद्विज ॥ ४८ ॥ निर्जितानिब्रह्मदंडाद्बुद्रभूतानिसत्तम ॥ इतस्ततःपलायंतस्त्यक्त्वातंकौशि
कंनृपम् ॥ ४९ ॥ ततश्चुकोपमूढात्मावसिष्ठंहंतुमुद्यतः ॥ क्रोधेनमहताविष्टोलज्जयाचनृपोत्तमः ॥
॥ ५० ॥ रौद्रंदंडंसमादायवसिष्ठायाक्षिपद्बलात् ॥ वसिष्ठोपिमहातेजाःकृत्वारूपंमहत्तरम् ॥ ५१॥
भूम्यंतरिक्षकुहरंस्वरूपेणमहद्युतिः ॥ पूरयामासभगवान्वसिष्ठोब्रह्मतेजसा ॥ ५२ ॥ ततोविदार
यामासवक्त्राकाशंमहामनाः ॥ भक्षयामासतंदंडमौर्वाग्निंवरुणोयथा ॥ ५३ ॥ ततोजज्वालभग
वान्युगांताग्निरिवोत्थितः ॥ ब्राह्मेणरौद्रसंवृत्तःपातयामासरोदसी ॥ ५४ ॥ ततोदेवाःसगंधर्वाःसय
क्षोरगराक्षसाः ॥ भीत्वात्यक्त्वास्वधिष्ण्यानिस्वस्त्यस्त्वित्यब्रुवंस्तदा ॥ ५५ ॥ ततस्तदातस्यतनुंद
ग्ध्वारुद्रस्यतेजसा ॥ अमोघत्वान्महाबुद्धेरुद्रंपुनरुपागमत् ॥ ५६ ॥ ततोब्रह्मापुनस्तस्यशरीरमक
रोत्प्रभुः ॥ अभेद्यमजरंदिव्यमविनाशंप्रजापतिः ॥ ५७ ॥ ब्राह्ममेवबलंलोकेख्यापयित्वामहामुनिः॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

निरामयः पुनरसौयथापूर्वमतिष्ठत ॥ ५८ ॥ ततोगाधिसुतःश्रीमान्मत्वावैब्रह्मशाश्वतम् ॥ गोकर्ण
क्षेत्रमासाद्यकृत्वाश्रमपदंशुभम् ॥ ५९ ॥ शतशृंगागिरेर्मूर्ध्निस्थाप्यालिंगमनुत्तमम् ॥ तस्याधस्ताच्छु
भंतीर्थंकृत्वागाधिसुतस्तदा ॥ ६० ॥ तपश्चचारसुचिरंवर्षाणामयुतंप्रभुः ॥ पंचाग्निमध्यगोमौनी
निराहारोजितेंद्रियः ॥ ६१ ॥ तपसातोषयामासब्रह्मविष्णुमहेश्वरान् ॥ प्रसन्नास्तेसुराराजन्विश्वा
मित्रमथाब्रुवन् ॥ ६२ ॥ वरंवरयभद्रंतेवरदास्मोवयंमुने ॥ इतिश्रुत्वागाधिसुतोह्युवाचप्रणतःसुरा
न् ॥ ६३ ॥ यदिप्रसन्नादेवेशावरार्हौयदिचाप्यहम् ॥ ब्राह्मण्यंप्रार्थयेदेवाब्रह्मदंडमनुत्तमम् ॥ ६४॥
तीर्थमेतत्सुरश्रेष्ठालिंगंचसुमनोहरम् ॥ सर्वसिद्धिकरंभूयात्त्रैलोक्येचोत्तमंभवेत् ॥ ६५ ॥ नारदउ
वाच ॥ ब्रह्मविष्णुमहेशानास्तच्छ्रुत्वातेददुस्तदा ॥ ब्रह्मदंडमभेद्यंचब्राह्मण्यंशाश्वतंद्विज ॥ ६६ ॥
पूज्यत्वंसर्वलोकेषुआश्रमस्यचश्रेष्ठताम् ॥ इतिदत्त्वावरंतस्मैतत्रैवांतर्दधुःसुराः ॥ ६७ ॥ नारदउवा
च ॥ तदेतद्ब्रह्मकुंडस्यदाक्षिणात्वर्त्ततेद्विज ॥ तपसाश्रैष्ठ्यमापन्नस्त्रैलोक्येसमहातपाः ॥ ६८ ॥ दे

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

वासुरास्तस्यवशेभीतास्तिष्ठंतिकिंकराः ॥ सृष्टिसंहारकर्त्तासौमनसैवमहाद्युतिः ॥ ६९ ॥ विवस्वता
सहमुनिःसावित्र्याचद्विजोत्तम ॥ रुद्रेणचजगद्धात्रासिद्धिमापमहामनाः ॥ ७० ॥ विश्वामित्राश्रमं
पुण्यंसर्वपापहरंशुभम् ॥ तत्रगच्छंतियेकेचित्तेषांसिद्धिर्भविष्यति ॥ ७१ ॥ तपोवृद्धिर्भवेत्तत्रपा
पंतेषांव्यपोहति ॥ अयनेविषुसंक्रांत्यामत्रस्नात्वाद्विजोत्तमः ॥७२॥ तल्लिंगंपूज्यसावित्रींलक्षसंख्यांज
पेन्मुने ॥ सप्तजन्मभवेद्विप्रोवेदवेदांगपारगः ॥ ७३ ॥ पापिष्ठास्तंनगच्छंतिविश्वामित्रस्यतेजसा॥
क्रियालोपोभवेद्येषांप्रमादाद्द्विजसत्तम ॥ तत्पूरयातिविप्रेंद्राविश्वामित्राश्रमात्ततः ॥ ७४ ॥ इतिश्री
स्कांदेगोकर्णपुराणेविंशोऽध्यायः ॥ २० ॥ ॥ छ ॥ ॥ ॥ ॥ ॥
॥ संवर्त्तकउवाच ॥ गंगाधारेतिभगवन्श्रुतंतेवदतोनघ ॥ माहात्म्यंतस्यतीर्थस्यउत्पत्तिंचैवशंसमे
॥ १ ॥ नारदउवाच ॥ शृणुविप्रकथांदिव्यांमहर्षेर्भावितात्मनः ॥ सुमित्रोनामविप्रेंद्रोपौलस्त्यकुल
नंदनः ॥२ ॥ तेजसाविद्ययाचापिसाक्षान्मित्रइवापरः॥ ससर्वभोगानुत्सृज्यसिद्धिमिच्छन्महातपाः

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

॥ ३ ॥ क्षेत्रप्रवरमासाद्यगोकर्णंलोकविश्रुतम् ॥ तपस्तेपेनिराहारःशतशृंगतटेशुभे ॥ ४ ॥ लिंगं
तत्रप्रतिष्ठाप्यसुमित्रेश्वरनामकम् ॥ दिव्यवर्षसहस्रंसःशिवमाराधयंत्प्रभुः ॥ ५ ॥ तपसामहताविप्र
सुमित्रस्यमहात्मनः ॥ सुरराट्क्षोभमापन्नोविघ्नंचक्रेतपोव्यये ॥ ६ ॥ धैर्यान्नचलितःसोभूत्ततस्तुष्टो
भवाच्छिवः ॥ तपसामहताविप्रसुमित्रस्यमहात्मनः ॥ ७ ॥ समस्तभूतसहितःसाक्षात्तस्याग्रतोगम
त् ॥ तंदृष्ट्वादेवदेवेशंसुमित्रोद्विजसत्तमः ॥ ८ ॥ ववंदेशिरसाशंभुंभक्त्यानिश्चलयामुने ॥ तमुत्था
प्यमहादेवोवरंब्रूहीत्यभाषत ॥ ९ ॥ सुमित्रोपिवरंवव्रेयथातच्छृणुपावके ॥ इहदेवतपश्चर्त्तुंत्वयासह
सुरोत्तम ॥ १० ॥ इच्छामिदेवदेवेशवरमेतद्वृणोम्यहम् ॥ तमुवाचमहादेवःकथंस्थेयंमयाद्विज
॥ ११ ॥ त्वयासार्धंद्विजश्रेष्ठत्वल्लिंगेचवसाम्यहम् ॥ यद्यदिच्छासिविप्रेंद्रमनसालभ्यमप्युत ॥ १२॥
तत्तत्सिध्यतितेविप्रमत्प्रसादान्नसंशयः ॥ इतिदत्वावरंतस्मैतस्मिन्लिंगेमहेश्वरः ॥ १३ ॥ समस्त
भूतसहितोनिवासमकरोत्तदा ॥ सुमित्रोपिद्विजश्रेष्ठःप्रत्यक्षीकृत्यशंकरम् ॥ १४ ॥ पूजयामासवि

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

धिवद्भक्त्याचानन्ययाशिवम् ॥ प्रत्यक्षीकृतदेवेशंतथासिद्धमनोरथम् ॥ १५ ॥ तंज्ञात्वामुनयःसर्वे
शतशृंगानिवासिनः ॥ आनेतुंजान्हवींसर्वेवासिष्ठाद्यामहर्षयः ॥ १६ ॥ परस्परंसमालोच्यसुमित्रोवा
न्यतोभवेत् ॥ इतिनिश्चित्यमनसिस्वकार्यस्यचसिद्धये ॥ १७ ॥ कोटितीर्थानिदिग्भागेसप्तसप्तति
मेपदे ॥ विनायकंप्रतिष्ठाप्यपूजयित्वायथाविधि ॥१८ ॥ नत्वास्तुत्वाविघ्नराजंभक्त्यातेमुनिपुंगवाः ॥
एवंसंपूजितःसोपिगजास्योऋषिभिस्तदा ॥ १९ ॥ प्रत्यक्षीभूयचोवाचऋषीन्प्रतिगजाननः ॥ तुष्टो
स्मिपूजयाभक्त्यास्तुत्याचनियमेनच ॥ २० ॥ युष्मन्मनोगतंसर्वंमयाज्ञातंद्विजोत्तमाः ॥ सुमित्रा
ख्योमुनिवरस्तपसाराध्यशंकरम् ॥ २१ ॥ सांनिध्यंतस्यचावापसर्वदामुनिपुंगवाः ॥ गच्छध्वंतंमु
नित्वरंसवःकार्यंविधास्यति ॥ २२ ॥ युष्माभिःपूजितंमांयेपूजयंतिनराभुवि ॥ तेषामिष्टार्थलाभंच
दास्याम्येवनसंशयः ॥ २३॥ इत्युक्त्वावचनंतेभ्योतत्रैवास्तेगजाननः ॥ एवंसंपूज्यऋषयश्चिंतामणि
विनायकम् ॥ २४ ॥ सुमित्रांतिकमाजग्मुर्वासिष्ठाद्यामहर्षयः ॥ तत्रदृष्ट्वामहात्मानंसुमित्रंज्ञानबृंहि

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तम् ॥ २५ ॥ इदमाहुर्द्विजश्रेष्ठाःसादरंमुनिपुंगवम् ॥ ऋषयऊचुः ॥ सिद्धोसितपसात्वंवैरुद्रभ
क्त्यामहामुने ॥ मनसावांछितंयत्तेतात्सिध्यतिनसंशयः ॥ २६ ॥ अस्माकमपिविप्रेंद्रवांछांकर्तुंत्व
मर्हसि ॥ ततःसुमित्रस्तान्सर्वानभिवाद्येदमब्रवीत् ॥ २७ ॥ कर्त्तास्मिवांछितंवोवैनिःशंकंवदतान
घाः ॥ रुद्रप्रसादाद्भद्रंवःकृतमित्यवधार्यताम् ॥ २८ ॥ तेतमूचुस्तदाविप्राःसुमित्रंऋषिसत्तमम् ॥
ऋषयऊचुः ॥ तपसातवविप्रेंद्रसहायःशंकरस्तव ॥ सर्वतीर्थमयीगंगासर्वदेवमयीचसा ॥ २९ ॥
पितामहस्यमनसःसमुत्पन्नासुरापगा ॥ स्मरणाद्दर्शनाद्देवीकीर्तनात्स्पर्शनादपि ॥ ३० ॥ पापानिवि
प्रमुच्यंतेदेहिनांनात्रसंशयः ॥ तस्मात्तामानयविभोपातालतलसंस्थिताम् ॥ ३१ ॥ हितार्थंसर्वभूता
नामस्माकंचद्विजोत्तम ॥ आत्मनश्चैवशौचार्थंगंगात्वानीयतांशुभा ॥ ३२ ॥ ततस्तेषांवचःश्रुत्वासु
मित्रःप्रियदर्शनः ॥ आराधयामासतदाशंकरंभक्तवत्सलम् ॥ ३३ ॥ ततःप्रसन्नःसंप्राप्यशंकरोभ
भक्तवत्सलः ॥ सुमित्रस्तंप्रणम्याशुउवाचवचनंतदा ॥ ३४ ॥ हितार्थंसर्वलोकानामस्माकंचाविशे

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

॥ ३२ ॥ इतिशर्वेणसर्वज्ञेनवरोदत्तोममानघे ॥ दत्वावरंसभगवान्मद्गीत्यादर्शनंगतः ॥ ३३ ॥ तं हत्वापार्वतींगृह्यरमेयामितिमेमतिः ॥ तपोवनगतश्चाहंत्वांदृष्ट्वालोकसुंदरीम् ॥ ३४ ॥ त्वय्येवसर्वं भावोमेप्रतिष्ठोगुणसागरे ॥ तस्माद्देविमयासार्धंभुंक्ष्वभोगमानिंदिते ॥ ३५ ॥ इतितद्भाषितंश्रुत्वा योषिद्रूपधरोहरिः ॥ प्रहस्यकिंचिद्भगवान्लज्जायुक्तोब्रवीदिदम् ॥ ३६ ॥ कन्यकास्मिमहाभागप्र कृतिर्नामनामतः ॥ ममानुरूपंभर्त्तारमिच्छेयंदानवोत्तम ॥ ३७ ॥ एकप्रभुंपुरुवरंप्रकृतित्वाद्वृणो म्यहम् ॥ स्थिताहमत्रसुचिरंकदाकश्चिद्वृणोतिमाम् ॥ ३८ ॥ सर्वैःपूर्वगुणैर्युक्तंभर्त्तारंवरयाम्यहम्॥ इतितस्यावचःश्रुत्वाकामार्तःपुरुषाधमः ॥ ३९ ॥ तामुवाचमहाभागेभजस्वेतिपुनःपुनः ॥ नमत्तः पुरुषःकश्चिद्विद्यतेह्यधिकःशुभे ॥ ४० ॥ युद्धेममनतिष्ठंतिब्रह्माविष्णुमहेश्वराः ॥ सुरेंद्रास्त्रिदिवंत्य क्त्वागताःक्वापिनदृश्यते ॥ ४१ ॥ मद्दशेयप्रवर्त्तस्वभोगान्भंक्ष्वयथेप्सितम् ॥ ततोनारायणःश्रुत्वाब ह्वबद्धंतद्गीरितम् ॥ ४२ ॥ स्त्रीरूपधारीभगवान्सव्रीडमिदमब्रवीत् ॥ त्रिपुरघ्नेनयद्दत्तंवरंतेद्यवरानन॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

॥ ४३ ॥ तद्दीयतांममविभोसंगमोस्तुततस्त्वयि ॥ नेच्छामित्वांमहाबाहोह्यन्यथापुरुषर्षभ ॥४४॥
तच्छ्रुत्वादानवपतिःकामांधोमृत्युमात्मनः ॥ नबुबोधददामीतिसोब्रवीत्कालचोदितः ॥ ४५ ॥ अ
ददात्तंवरंतस्यैततस्तांपुनरब्रवीत् ॥ गांधर्वेणविवाहेनमामुपैतुंत्वमर्हसि ॥ ४६ ॥ विवाहानांवरोभद्रे
गांधर्वइतिनिश्चयः ॥ मांसंजीवयभद्रंतेसंतप्तंमदनाग्निना ॥ ४७ ॥ नारदउवाच ॥ एवमुक्तःसतांक
न्यांजग्राहायतलोचनाम् ॥ करेकामाभिसंतप्तोवामेनाप्तमनोरथः ॥ ४८ ॥ ततस्तंगृह्यभगवान्योषि
द्रूपधरोहरिः ॥ कंठेदनुसुतंविप्रदृढंवामकरेणसः ॥ ४९ ॥ पीडयामासकामार्त्तंदक्षिणेनपुनर्हरिः ॥
करंन्यस्यतुतन्मूर्ध्निभवभस्मेत्युदाहरत् ॥ ५० ॥ ततःक्षणेनसखरोभस्मशेषोह्यजायत ॥ ततोंतरि
क्षगादेवाःपुष्पवृष्टिंववर्षिरे ॥ ५१ ॥ तुष्टुवुश्चजगन्नाथंहतेतस्मिन्महासुरे ॥ देवदुंदुभयोनेदुर्न
नृतुश्चाप्सरोगणाः ॥ ५२ ॥ इतिश्रीस्कांदेगोकर्णपुराणेद्वाविंशोऽध्यायः ॥ २२ ॥ ॥ छ ॥ ॥
नारदउवाच ॥ तमात्ममाययाहत्वादेवदेवोजनार्दनः ॥ देवैर्देवर्षिभिश्चैवस्तूयमानोजगद्गुरुः ॥ १ ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

उपसंहृतवान्सद्यःस्त्रीरूपंपुरुषोत्तमः ॥ अपरेणमहाभागदेहेनभवभंगकृत् ॥२॥ रुद्रेणसार्धमविशत्पा
तालंपरमेश्वरः ॥ दिनद्वयंद्विजश्रेष्ठस्थित्वातत्रततोहरिः ॥ ३ ॥ श्रुत्वाहर्षनिनादंचदेवानांसजनार्द
नः ॥ उवाचरुद्रंवरदंएहिपश्यहतंखरम् ॥ ४ ॥ माययाममदेवेशहतस्तवरिपुःप्रभो ॥ तस्मादुत्तिष्ठ
भद्रंतेपश्यदैत्यंनिपातितम् ॥ ५ ॥ इत्युक्तोभगवान्रुद्रोविष्णुनाप्रभविष्णुना ॥ वैतरण्यायतःसोथपुन
श्चोर्ध्वमुपागतः ॥ ६ ॥ सतदोन्मज्जनेतीर्थेह्युत्ततारोत्तमद्युतिः ॥ स्थानंनारायणस्यैवप्राक्संस्थंपाव
नंमहत् ॥ ७ ॥ तत्पुरापूर्वदिग्भागेशरपातेस्थितंशुभम् ॥ उन्मज्जनमितिख्यातंतीर्थानामुत्तमोत्तम
म् ॥ ८ ॥ नदीवैतरणीनामपातालतलसंस्थिता ॥ सार्धंहरिहाराभ्यांसानिःसृतालोकपावनी ॥ ९ ॥
यस्माद्देशादुपाक्रामत्तदुन्मज्जनमुच्यते ॥ उन्मज्जनपुरोभागेस्थित्वातास्मिन्निवृत्यच ॥ १० ॥ सं
भूयसर्वतीर्थैःसादृश्यादृश्यामहानदी ॥ कोटितीर्थसमासाद्यह्रदिनीसमजायत ॥ ११ ॥ संभूयता
स्त्रगौर्यासासमुद्रंप्रविवेशह ॥ उन्मज्जनसमीपेतुतीर्थवैतरणीह्रदम् ॥ १२ ॥ तत्रयःस्नातिवैभक्त्या

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

सर्वपापैःप्रमुच्यते ॥ उन्मज्जनेनरःस्नात्वाविराजतियथोडुराट् ॥ १३ ॥ तस्मिन्सिद्धःपुरानागएलाप
त्रोमहाबलः ॥ एलावनमितिख्यातमभितोन्मज्जनंद्विज ॥ १४ ॥ तत्रगत्वातुयोमर्त्योभक्त्याना
गंप्रपूजयेत् ॥ सर्वान्कामानवाप्नोतियथानागस्तथैवसः ॥ १५ ॥ संवर्त्तकउवाच ॥ ततःकिमक
रोद्देवःशंकरःसहकेशवः ॥ सापिनारीकिमकरोन्मायाविष्णोर्महात्मनः ॥ १६ ॥ एलापत्रःकथंनाम
तत्रसिद्धिमुपागतः ॥ विस्तरेणममाचक्ष्वश्रोतुमिच्छाप्रवर्तते ॥ १७ ॥ नारदउवाच ॥ श्रूयतामाभि
धास्यामिकथांपुण्यांद्विजोत्तम ॥ तस्मादुन्मज्जनाद्देवौनारायणपुरंपुनः ॥ १८ ॥ आगतौतौमु
दायुक्तौसर्वलोकमहेश्वरौ ॥ ददृशातेहृतंपापंस्वरंहारिहरौद्विज ॥ १९ ॥ भस्मावशेषंदनुजंदृष्ट्वावि
स्मयमागतः ॥ उवाचविस्मयःशौरिंकथंपापोनिषूदितः ॥ २० ॥ त्वयाकमलपत्राक्षसोवध्योदेव
दानवैः ॥ तन्मेवदमहाप्राज्ञउत्कंठाजायतेहरे ॥ २१ ॥ श्रीविष्णुरुवाच ॥ रहस्यमिदमत्यंतंनवक्त
व्यंकथंचन ॥ तथापितवचोत्कंठांविनेष्यामिशृणुष्वतत् ॥ २२ ॥ मायाममसुरश्रेष्ठत्रैलोक्यम

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

पिमोहिनी ॥ तयाजगदिदंदेत्रमोहितंसुरसत्तम ॥ २३ ॥ अंशेनममदेवेशस्त्रीरूपंकृतवानहम् ॥
रूपाकारमनिर्देश्यंसर्वलोकमनोहरम् ॥ २४ ॥ उमाशतगुणंदेवरूपसौभाग्यसंपदा ॥ तांदृष्ट्वाच
कमेरक्षउमामदनमोहितः ॥ २५ ॥ त्वांहत्वापापकर्मासावुमांगृह्यसुरोत्तम ॥ यथाकामंयथाजोषं
क्रीडिष्यामीत्यभून्मतिः ॥ २६ ॥ तद्दिस्मृतंतदातेनदृष्ट्वातांप्रकृतिंमम ॥ तामपृच्छत्सदुष्टात्माका
सिकस्यासिशोभने ॥ २७ ॥ सातमाहमहाभागकन्यकास्मीतिशंकर ॥ प्रकृतिर्नामभद्रंतेभर्त्तारंमृ
गयाम्यहम् ॥ २८ ॥ अनुकूलंममविभोएकप्रभुमनिंदितम् ॥ तस्यास्तद्वचनंश्रुत्वाकामत्वान्नष्टचे
तनः ॥ २९ ॥ एकप्रभुरहंभद्रेत्रैलोक्यैश्वर्यपूजितः ॥ एहिसार्धंमयासुभ्रुत्रैलोक्यैश्वर्यमाग्भव ॥३०॥
ममानुरूपात्वंदेवितवाहंमृगलोचने ॥ ॥ भार्याभवममेत्याहस्याप्तथेत्यब्रवीत्तदा ॥ ३१ ॥ तवभा
र्याभविष्यामियन्मयोक्तंचतच्छृणु ॥ शर्वदत्तंवरंयत्तेतन्मह्यंयदिदास्यसि ॥ ३२ ॥ इत्युक्तमात्रेयद्दत्तं
तदातेनदुरात्मना ॥ गृहीत्वातद्वरंदेवीसामायाममशंकर ॥ ३३ ॥ तस्यमूर्ध्निकरंक्षिप्त्वाभवभस्मे

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

त्युवाचतम् ॥ भस्मावशेषमगमत्तदानीमेवपापकृत् ॥ ३४ ॥ शृणुचान्योमहादेववधेतस्यदुरात्मनः ॥
उपायःकारितोस्माभिःसंमंत्र्यसहदैवतैः ॥ ३५ ॥ शुकरूपेणतंगत्वामयेदंसमुदाहृतम् ॥ स्वकंतनामि
तिख्यातंमंत्रमाथर्वणंमहत् ॥ ३६ ॥ अनेनमंत्रेणविभुमाराधयहरंस्वर ॥ संतुष्टस्तवयत्काम्यंतद्दा
स्यतिनसंशयः ॥ ३७ ॥ मंत्रेणानेनदैत्येंद्ररुद्रोपिविलयंव्रजेत् ॥ तदाममवचःश्रुत्वातपश्चर्तुंप्रचक्र
मे ॥ ३८ ॥ तेनमंत्रेणदेवेशयस्त्वामर्चतिशंकर ॥ तवतुष्टिर्महादेवतस्यमृत्युर्नसंशयः ॥ ३९ ॥ त
त्तथाकृतवान्पापोमाययाममयोहितः ॥ वधार्थतस्यदैत्यस्यअवध्यस्यदुरात्मनः ॥ ४० ॥ श्रुतंमयैत
त्सकलंनोत्कंठयितुमर्हसि ॥ तच्छ्रुत्वाभाषितंतेनवचनंभुवनेश्वरम् ॥ ४१ ॥ दर्शयस्वेतितद्रूपंशिवो
विष्णुमुवाचह ॥ तच्छ्रुत्वादेवदेवस्यवचनंमधुसूदनः ॥ ४२ ॥ दर्शयामासतद्रूपंशंकरायतदाहरिः ॥
समस्ततत्वविच्चापिदृष्ट्वाताद्विस्मयंगतः ॥ ४३ ॥ अहोरूपमहोधैर्यमहोलावण्यमित्युत ॥ पुनःपुन
श्चतद्रूपंदृष्ट्वातीवसविस्मितः ॥ ४४ ॥ कामसंतप्तहृदयःकेशवंप्रत्यभाषत ॥ रूपेणानेनमांदेवव

॥ ६५ ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

रयस्वजनार्दन ॥ ४५ ॥ इत्युक्त्वालिंग्यतांदेवोनरनारीश्वरोभवत् ॥ तौदंपतीद्विजश्रेष्ठक्रीडासक्ता
वतीवहि ॥ ४६ ॥ एकत्वमुपयातौतौस्त्रीपुंसौपुरुषोत्तमौ ॥ तस्मिन्नेवपुरेदेवावेकमूर्तिधरौद्विज ॥
॥ ४७ ॥ सुप्रीतौतौयथाकामंवसतिंचक्रतुस्थिराम् ॥ कामःसंवर्धतेतस्मिन्गतस्याद्यापिपावके ॥
॥ ४८ ॥ गोकर्णेतत्पुरंश्रेष्ठंनाकपृष्ठसमंपरम् ॥ पुरंहरिहरंनामगोकर्णेसुरपूजितम् ॥ ४९ ॥ त
स्मिन्दानानिविप्रेंद्रदातव्यानिहितैषुणा ॥ अक्षयंचभवेत्तद्वैनात्रकार्याविचारणा ॥ ५० ॥ तस्मिन्दा
नानिदत्तानिदेवभोग्यानिसत्तम ॥ त्रिसप्तकुलजैःसार्धदातास्वर्गमवाप्नुयात् ॥ ५१ ॥ शिवविष्णोः
कथायावल्लोकेसंपरिवर्तते ॥ तावत्स्वर्गान्नच्यवतेदिव्यभोगसमन्वितः ॥ ५२ ॥ द्वादश्यांशुक्लपक्ष
स्यनक्षत्रंश्रवणंभवेत् ॥ विशेषात्प्रातःश्रावणेतुमासेपुण्यप्रदंभवेत् ॥ ५३ ॥ एकादश्यामुषित्वातुनिरा
हारोद्विजोत्तम ॥ ततःसंपूज्यतौदेवौभक्त्याशक्त्यायथाविधि ॥ ५४ ॥ तयोःप्रीतिकरंकार्यंतदेवाक्ष
यमिच्छता ॥ एवंयःकुरुतेतत्रतस्मिन्कालेद्विजोत्तम ॥ ५५ ॥ सर्वपापैर्विनिर्मुक्तोविष्णुलोकेमही

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

यते ॥ शिवसायुज्यमथवामनसायद्यदिच्छति ॥ ५६ ॥ नाकपृष्ठसमंलोकेपुरंहरिहरंमहत् ॥ तत्र
दत्तंहुतंचापिएकंकोटिर्भविष्यति ॥ ५७ ॥ पुरेहरिहरेतास्मिन्वसतिद्विजसत्तम ॥ मंडपत्रितयंपु
ण्यंपवित्रंपापनाशनम् ॥ ५८ ॥ क्रमेणतेषांनामानिवक्ष्यामिशृणुपावके ॥ वैराग्यदंज्ञानदंचमुक्तिदं
चद्विजोत्तम ॥ ५९ ॥ देवयोःपुरतश्चैवरम्यंमुनिनिषेवितम् ॥ उत्तरादिक्रमेणैवप्राक्दाक्षिण्येनसंस्थि
तम् ॥ ६० ॥ उत्तरस्यांस्थितंयत्तुवैराग्यंमंडपंस्मृतम् ॥ तत्रमासमुषित्वातुगायत्रींवेदमातरम् ॥
॥ ६१ ॥ योजपेद्विधिनाविप्रलक्षमेकंसमाहितः ॥ ब्रह्मचर्यव्रतीयुक्तोउपवासपरायणः ॥ ६२ ॥
सविज्ञानमवाप्यैवविष्णुसायुज्यमाप्नुयात् ॥ देवयोःपुरतोयत्तुमंडपंज्ञानदंविदुः ॥ ६३ ॥ तत्रमासं
वसेद्यस्तुमौनव्रतपरायणः ॥ अष्टाक्षरंजपेन्मंत्रंविधिनाचद्विजोत्तम ॥ ६४ ॥ यथाशक्तियथाबु
द्धिएकंकोटिर्भविष्यति ॥ सज्ञानंसुमहल्लब्ध्वाविष्णुसायुज्यमाप्नुयात् ॥ ६५ ॥ ततोनैर्ऋत्यादिग्भा
गेस्थितंमुक्तिप्रदंद्विज ॥ मंडपंभुविविख्यातंपुण्यापुण्यतरंमहत् ॥ ६६ ॥ तस्मिन्मृताश्चयेकेचि

॥ ६६ ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

त्पापात्मानोपिमानवाः ॥ सर्वपापविनिर्मुक्ताःप्रयांतिपरमंपदम् ॥ ६७ ॥ तत्रमासंवसेयस्तुब्रह्मचर्यवशेस्थितः ॥कामक्रोधविनिर्मुक्तःसत्यवादीजितेंद्रियः ॥ ६८ ॥आसप्तजन्मचरितंतस्यपापंविनश्यति ॥ मासोपवासंकुरुतेनारीतास्मिन्नरोपिवा ॥ ६९ ॥ सर्वपापविनिर्मुक्तोअंतेमुक्तिंसविंदाति ॥ यदाविरक्तःपुरुषोनारीवापितपस्विनी ॥ ७० ॥ प्रायोपवेशनेदीक्षांकृत्वातन्मुक्तिमंडपे ॥ दर्भशय्यानिविष्टस्तुशृण्वन्पुण्यकथांहरेः ॥७१॥ नामसंकीर्त्तनंकुर्यात्साधंभागवतैर्जनैः ॥ ॐकारगम्यमानंदं सर्वसाक्षिणमव्ययम् ॥ ७२ ॥ निरूपंनिर्मलंसाक्षान्नारायणमनामयम् ॥ ध्यायन्नंतःपरंज्योतिरास्तेयोमरणावधि ॥ ७३ ॥ कालेप्राप्तेंतिमेतस्यसमीपंपुरुषोत्तमः ॥ आगत्यदययातस्यस्वकरंमूर्ध्निनिक्षिपेत् ॥ ७४ ॥ ब्रह्मोपदेशंकुरुतेदर्शयन्स्वान्निजंपदम् ॥ सम्प्तोब्रह्मभूतात्मापरंनिर्वाणमाप्नुयात् ॥ ७५ ॥ इतिश्रीस्कांदेगोकर्णपुराणेत्रयोविंशोऽध्यायः ॥ २३ ॥ ॥ छ ॥ ॥ ॥

नारदउवाच ॥ एलापत्रोपिनागेंद्रोवनेतस्मिन्महातपाः ॥ आराधयामासहरंभावगम्यंद्विजोत्तम ॥१॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तस्मिन्नुन्मज्जनेस्नात्वासहस्रपरिवत्सरम् ॥ ततःप्रीतोमहादेवोशंकरःपरमेश्वरः ॥ २ ॥ तंदृष्ट्वाना
गराजासौशिरसाप्राणिपत्यच ॥ तुष्टावदेवदेवेशंभक्तिनम्रःकृतांजलिः ॥ ३ ॥ नारदउवाच ॥ नमोनम
स्तेभुवनैककर्त्रेहर्त्रेचभूयोपिनमोनमस्ते ॥ भर्त्रेपिलोकत्रयभावनायभक्तार्तिहानौसततोद्यताय ॥ ४ ॥
सहस्रनेत्रायहरिप्रियायसहस्रनेत्रारिहरायशंभवे ॥ सहस्रपादायगुणागुणायमहस्ररूपायनमोनमस्ते
॥ ५ ॥ समांहिसर्वत्रसहस्ररूपत्वांवेदगुह्यंप्रवदंतिसूरयः ॥ प्रभुःप्रभूणामपिदेवदेवोजगत्त्रयःक्षोभकरः
सुरेशः ॥ ६ ॥ शरण्यमाद्यंशरणंप्रपद्येविश्वेश्वरंशूलिनमप्रमेयम् ॥ अनादिबोधंपुरुषंपरात्परंत्वांनिर्वि
कारंमनसास्मरामि ॥ ७ ॥ योगिध्येयंयोगिनामप्यगम्यंयोगाधीशंयोगिहृन्मध्यसंस्थम् ॥ भावातीतं
भावनामात्रगम्यंभावातीतायोगिनस्त्वांभजंति ॥ ८ ॥ देवाअपिहिकांक्षंतेतवसंदर्शनंप्रभो ॥ तेषा ॥ ६७ ॥
मगोचरंत्वांहिदृष्टवानस्मिशंकर ॥ ९ ॥ गुह्याद्गुह्यतमंश्रेष्ठंज्ञानगम्यंनिरामयम् ॥ अव्यक्तंसर्वभूतस्थं
क्षेत्रज्ञमचलंध्रुवम् ॥ १० ॥ भक्तप्रियंभक्तिगम्यंस्मृतमात्राघनाशनम् ॥ कीर्तयंतिचयेत्वांवैतेभ्यो

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

नित्यंनमोनमः ॥ ११ ॥ नारदउवाच ॥ श्रुत्वानामेरितंवाक्यंशंकरःप्राहतंपुनः ॥ वरंवरयभद्रंतेयथा त्वंमनसेच्छसि ॥ १२ ॥ सर्वज्ञत्वंत्वणेदेवअमरत्वंतथैवच ॥ तवप्रसादात्कामारेसिद्धिमिच्छामिशाश्वतीम् ॥ १३ ॥ शंकरउवाच ॥ तथाभवतुतत्सर्वंमत्प्रसादादहीश्वर ॥ ईत्युक्त्वाभगवान्रुद्रस्तत्रैवांतरधीयत ॥ १४ ॥ एलापत्रोपिनागेंद्रोयथाकामंचचारह ॥ तस्मादेलावनमितिसर्वलोकेषुविश्रुतम् ॥ १५ ॥ चतुर्विंशतिनागेंद्राएलापत्रादयोद्विज ॥ तस्मिन्सिद्धिंपरांप्रापुःप्रसादाच्छंकरस्यहि ॥१६॥ ॥ संवर्त्तकउवाच ॥ कथंवैतरणीतत्रानिःसृतोन्मज्जनेद्विज ॥ तन्ममाख्याहिभगवन्नद्यास्तस्याकथां शुभाम् ॥ १७ ॥ नारदउवाच ॥ दुहिताधर्मराजस्यनदीनांप्रवराहिसा ॥ सीमासायमलोकस्यकर्मलोकस्यचोभयोः ॥ १८ ॥ सौम्यरूपधरासौम्यापापिष्ठानामनिंदिता ॥ महात्मानः पुण्यकृतःस्वकृतैःपुण्यराशिभिः ॥ १९ ॥ प्रेतराजपुरींजित्वातामुत्तीर्यव्रजंतिहि ॥ सर्वपापहरादेवीपातालतलसंस्थिता ॥२०॥ तांशशापपुरादेवींवरुणोयादसांपतिः ॥ संवर्त्तकउवाच ॥ किमर्थंशप्रवान्देवींवरुणोभ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

गवान्पुरा ॥ केनदोषेणसादेवीपातालतलसंस्थिता ॥२१॥ सर्वासांवरुणोभर्त्तानदीनांचमहामते ॥ रू
पौदार्यगुणैर्युक्तामहानद्यःपृथक्पृथक् ॥२२॥ भजंतिवरुणंदेवंकालेकालेसुशोभनाः ॥ संकेतमाव्रजंति
स्मस्वस्वकालेमनोहराः ॥ २३ ॥ सखीभिःक्रीडिताबालालज्जायुक्तामनस्विनी ॥ सखीदोषेणसादेवी
संकेतंनागमत्पुरा ॥ २४ ॥ ततश्चुकोपवरुणःशशापचमहानदीम् ॥ धिक्त्वांपापसमाचारेममाज्ञालंघि
तात्वया ॥ २५ ॥ तस्मात्प्रविश्यपातालंनिश्चलामलिनोदका ॥ चंडग्राहवतीक्षिप्रंशोणितोदानदीभव
॥२६॥ ततःप्रसादयामासभर्त्तारंसाशुचिस्मिता ॥ अज्ञानादथवाज्ञानात्कृतंतेविप्रियंमया ॥२७॥ तवशु
श्रूषणंकालेनकृतंतत्क्षमस्वभो॥ अस्यशापस्यभगवन्कदामोक्षोभविष्यति ॥२८॥ इत्युक्तःसतयादेव्या
वरुणोयादसांपतिः ॥ तामाहाभ्यर्थितःप्रीतस्तयाभूयःकृपान्वितः ॥२९॥ यदाहरिहरौदेवौयुगपद्द्रक्ष्यसे
शुभे ॥ तदामच्छापमोक्षस्तेभविष्यतिवरानने ॥ ३० ॥ इत्युक्तमात्रेपतिनापातालमविशच्छुभा ॥
ह्रादिनीरुधिरौघेणव्रणभूतावसच्चिरम् ॥३१॥ निबद्धाशापरज्वाचानिश्चलामलिनोदका ॥ सहस्रवर्षवि

॥ ६८ ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

प्रेंद्रदेवावाराधितौतया ॥ ३२ ॥ तस्यास्तुष्टौहारिहरौयुगपद्दर्शनंगतौ ॥ तौदृष्ट्वासामहाभागाशिरसा
वनतास्थिता ॥ ३३ ॥ भर्तृशापपरीतांगीवेपंतीकदलीयथा ॥ तांदृष्ट्वातौसुरवरौकृपांचक्रतुरव्ययौ ॥
॥ ३४ ॥ वरंब्रूहीतितौदेवौतामूचतुरिदंमौ ॥ सावव्रेशापमोक्षंचभर्तृस्नेहंचशाश्वतम् ॥ ३५ ॥ ती
र्थानांश्रेष्ठतांचैववरमेतद्वृणोम्यहम् ॥ तच्छ्रुत्वावचनंतस्यास्तावब्रूतांतथास्त्विति ॥ ३६ ॥ ततःक्ष
णेनसादेवीनिर्मलाविरजांबरा ॥ सुप्रसन्नादिव्यदेहासुकुमारीमनोहरा ॥ ३७ ॥ नदीनांप्रवराभूत्वा
तीर्थानांप्रवराचसा ॥ भर्तृभावगताभद्राप्रसादाद्देवदेवयोः ॥ ३८ ॥ ह्रदात्तस्मान्महाभागाऊर्ध्वं
स्रोतामहानदी ॥ बिलेनतेननिर्गत्यताभ्यांसहमहानदी ॥ ३९ ॥ उन्मज्जनीतिसाख्यातानाम्नावैतर
णीनदी ॥ पावयित्वातुतंदेशंकोटितीर्थंविवेशसा ॥ ४० ॥ पुराद्धरिहराद्विप्रउत्तरेणमहानदी ॥ सं
गत्यसर्वतीर्थैःसाताम्रगौरींसमभ्यगात् ॥ ४१ ॥ तयासंगम्यसादेवीसमुद्रंप्रविवेशवै ॥ तस्यांस्नातः
सर्वतीर्थैस्नातोभवतिमानवः ॥ ४२ ॥ गोसहस्रप्रदानस्यफलंविंदातिसध्रुवम् ॥ यावत्सत्यंप्रवर्तेत

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तावत्साद्दश्यतेनदी ॥ ४३ ॥ विनश्यतियदासत्यंतदासानप्रद्दश्यते ॥ नारदउवाच ॥ तस्मादुन्म
ज्जनीतीर्थादाग्नेय्यांदिशिविद्यते ॥ दुर्गास्थानंद्दिजश्रेष्ठपवित्रंपापनाशनम् ॥ ४४ ॥ संवर्त्तकउवा
च ॥ दुर्गाभगवतीतत्रकिमकार्षीच्चतत्रवै ॥ किंप्रापसामहादेवीतन्मेवक्तुंत्वमर्हसि ॥ ४५ ॥ नार
दउवाच ॥ शृणुतस्यास्तथोत्पत्तिंदुर्गायाद्दिजसत्तम ॥ प्रादुर्भूतायशोदायांतांहंतुंचकमेखलः ॥ ४६॥
उग्रसेनसुतःकंसस्तस्मादपगताततः ॥ गोकर्णक्षेत्रमासाद्यशतशृंगतटेशुभे ॥ ४७ ॥ तीर्थंमनोरमं
कृत्वातपस्तेपेमनोरमा ॥ ततःकालेनमहतातुष्टौहरिहरौद्दिज ॥ ४८ ॥ तस्याःसमीपमासाद्यवरंब्रू
हीत्यभाषताम् ॥ ततोदुर्गाभगवतीउन्मील्यनयनेतदा ॥ ४९ ॥ दृष्ट्वाहरिहरौदेवौनत्वास्तुत्वाजगा
दतौ ॥ स्थानंमेनास्तिदेवेशौस्थानंमेसंप्रदीयताम् ५० ॥ तीर्थमेतत्सुरश्रेष्ठौसर्वपापहरंभवेत् ॥ एव ॥ ६९ ॥
मुक्तेतयादेव्याऊचतुःशिवकेशवौ ॥ ५१ ॥ विंध्याचलगताभद्रेवसनित्यमनिंदिते ॥ तिष्ठैकांशेनवै
ह्यत्रसर्वलोकैकपूजिता ॥ ५२ ॥ तीर्थमेतन्महादेविसर्वकामप्रदंभवेत् ॥ अस्मिन्तीर्थेनरोयस्तुनव

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

म्यांभक्तिसंयुतः ॥ ५३ ॥ आश्विनेशुक्लपक्षेतुकुरुतेस्नानमंजसा ॥ तवमूर्तिंपूजयातिभक्त्याशक्त्या
यथाविधि ॥ ५४ ॥ ससर्वदुःखनिर्मुक्तोलोकेपूज्योभविष्यति ॥ इतिदत्वावरंतस्यैतदाहरिहरौद्विज॥
॥ ५५ ॥ अदर्शनंगतौतत्रविंध्याचलमगाच्चसा ॥ एकांशेनस्थितातत्रशतशृंगतटेशुभे ॥ ५६ ॥
कथितंतेद्विजश्रेष्ठदुर्गायाश्चरितंमहत् ॥ संवर्त्तकमहाबुद्धेकिमन्यच्छ्रोतुमिच्छसि ॥ ५७ ॥ इतिश्री
स्कांदेगोकर्णपुराणेचतुर्विंशोध्यायः ॥ २४ ॥ ॥ छ ॥ ॥ ॥ ॥ ॥
॥ संवर्त्तकउवाच ॥ तस्यशृंगस्यभगवन्परेपार्श्वेस्थितानिच ॥ तीर्थाण्याचक्ष्वसर्वाणिप्रसादसुमुखः
प्रभो ॥१॥ नारदउवाच ॥ शृणुचापरपार्श्वस्थतीर्थानिद्विजसत्तम ॥ शतशृंगस्यभद्रंतेसर्वपापहरा
णिच ॥ २ ॥ एकबिंदुरितिख्यातंतीर्थंतद्दशबिंदुकम् ॥ शतबिंद्वभिधंपश्चात्तथासाहस्रबिंदुकम् ॥३॥
सर्वपापहराण्याहुस्तीर्थानिजगतीतले ॥ अंतरिक्षचराण्येवगिरौतस्मिन्पतंतिच ॥ ४ ॥ तेनमार्गेण
चपुनःपातालेचपतंतिवै ॥ चंद्रतीर्थंसूर्यतीर्थमानंतंतीर्थमेवच ॥५॥ अग्नितीर्थंरामतीर्थंवारुणंतीर्थमे

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

वच ॥ शिंशुमारमितिख्यातंतीर्थंसर्वसुरार्चितम् ॥ ६ ॥ मालिनीनामभद्रंतेनदीपुण्यजलामला ॥
तीर्थकोव्यपरंतत्रसमुद्रेपतितंह्यभूत् ॥ ७ ॥ भयात्पतगराजस्यद्रवरूपेणचाविशत् ॥ अशक्यंपरि
संख्यातुंपृथक्कृत्वासमासतः ॥ ८ ॥ मयोच्यमानंविप्रेंद्रप्राधान्येनानिबोधतत् ॥ शतशृंगोगिरिवरः
शतधालवणोदधौ ॥ ९ ॥ तदाभग्नोनिपातितःक्षेत्रस्यपरितःस्थितः ॥ यदावतारितोविप्रगरुडात्कुंभ
योनिना ॥ १० ॥ सार्धयोजनविस्तीर्णोशिवक्षेत्रेमहागिरिः ॥ शतशृंगोगिरिवरोदेवर्षिगणसेवितः
॥ ११ ॥ द्वौभागौतस्यशृंगस्यसमुद्रेपतितौद्विज ॥ दक्षिणोत्तरतस्तस्यक्षेत्रस्याद्विजसत्तम ॥ १२ ॥
तस्याष्टनवतिर्ब्रह्मन्पेतुःशृंगाणिगोश्रुतौ ॥ अस्तव्यस्ताश्चपरितोभागाःशृंगस्यसत्तम ॥ १३ ॥ तेषु
सर्वेषुतीर्थानिह्यसंख्यानिद्विजोत्तम ॥ नामतस्तान्यशक्यानिवक्तुंवर्षशतैरपि ॥ १४ ॥ यथाप्रधानंते
वक्ष्येसंक्षेपात्तवसुव्रत ॥ रुद्रयोन्याःक्रोशमात्रेचक्रतीर्थमितिस्थितम् ॥१५॥ तत्रैवकापिलंतीर्थमार
ण्यंतीर्थमेवच ॥ तीर्थंवैनायकंनामक्रोशार्धेचातिपावनम् ॥ १६ ॥ त्रैलोक्येयानितीर्थानिदृश्यादृश्येन

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

संतिहि ॥ अत्रस्थाऋषयःसर्वेतपस्यंतिसुदुश्चरम् ॥ १७ ॥ देवताश्चमहाभागगंधर्वाप्सरसस्तथा ॥
असुराःकिंनरायक्षानागाश्चाद्विजसत्तम ॥ १८ ॥ येयेसिद्धिमभीप्संतस्तेह्यत्रस्थानसंशयः ॥ शिवक्षे
त्रमिदंदिव्यंयथाविष्णोर्नसंशयः ॥ १९ ॥ ब्रह्मलोकोह्ययंदिव्यइतिविद्वद्भिरुच्यते ॥ कामक्रोधवि
निर्मुक्ताब्रह्मचर्यव्रतेस्थिताः ॥ २० ॥ दंभानृतविहीनाश्चसर्वदोषविवर्जिताः ॥ अहिंसकामहात्मा
नइष्टदैवतपूजकाः ॥ २१ ॥ मौनव्रतपरायेवैनियतानियताशनाः ॥ जपयज्ञपरायेतुमहादानरतास्त
था ॥ २२ ॥ अचिरात्सिद्धिमाप्स्यंतिनात्रकार्याविचारणा ॥ वर्षाणांहिसहस्रेणासिद्धिःकृतयुगेद्विज॥
॥ २३ ॥ वर्षैःसप्तशतैःसिद्धिस्त्रेतायामत्रपावके ॥ द्वापरेत्रिशतैर्वर्षैराप्नुयात्सिद्धिमुत्तमाम् ॥ २४ ॥
युगंपश्चिममासाद्यसिद्धिःसंवत्सरेणहि ॥ युगानांप्रवरोलोकेकलिश्चांत्ययुगोद्विज ॥ २५ ॥ तथैव
सर्वक्षेत्राणांगोकर्णंशिरउच्यते ॥ धर्मश्चभगवानत्रसिद्धिंप्राप्तःसनातनः ॥ २६ ॥ सिद्धिस्थानानि
तत्रैवअसंख्यानिद्विजोत्तम ॥ अदृश्यानिभविष्यंतियुगेतुचरमेद्विज ॥ २७ ॥ कलौयुगेतुसंप्राप्तेध

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

र्मःसंक्षीयतेयदा ॥ भवंतिसर्वतीर्थानिदृश्यादृश्यानिसत्तम ॥ २८ ॥ लिंगकोटित्रयंतत्ररुद्रयोन्याभि
तस्थितम् ॥ बालुकांतर्हितंतत्रनदृश्येतकलौयुगे ॥ २९ ॥ ऋषयोपिमहात्मानोह्यव्यक्ताविचरंत्यु
त ॥ आश्रमेषुमहात्मानःपुण्येषुस्वेषुसत्तम ॥ ३० ॥ संवर्त्तकउवाच ॥ एकबिंदोश्वभगवन्दशबिं
दोश्वसत्तम ॥ शतबिंदोश्वसाहस्रबिंदोरपितथैवच ॥ ३१ ॥ उत्पत्तिंश्रोतुमिच्छामितेषांवदमहामते ॥
प्रभावंचमहाभागप्रसन्नोवक्तुमर्हसि ॥ ३२ ॥ नारदउवाच ॥ शृणुष्वैकमनास्तातकथांतेषांमहात्म
नाम् ॥ अत्रिवंशोद्भवास्तेतुभ्रातरोमुनिपुंगवाः ॥ ३३ ॥ शतशृंगंसमासाद्यब्रह्मादिवसांतिंपरम् ॥ अ
न्विच्छंतःपरांसिद्धिंतपस्तेपुःसुदुश्चरम् ॥ ३४ ॥ मुक्तस्पृहामुक्तिकामाब्रह्मज्ञानपरायणाः ॥ तटेगिरे
राश्रमपदंकृत्वातेचपृथक्पृथक् ॥ ३५ ॥ अदृश्याःसर्वभूतानांदुर्गदेशंसमाश्रिताः ॥ मौनव्रतधरा
स्तेतुतपोघोरंप्रचक्रमुः ॥ ३६ ॥ दिव्यवर्षसहस्राणिकाष्ठभूतावनेवसन् ॥ निराहारानिर्विचेष्टाऊर्ध्वी
च्छ्रितकराद्विज ॥३७॥ वल्मीकभूतास्तप्यंतस्तृणगुल्मलतावृताः ॥ तेषांतपःप्रभावेणऋषीणांभावि

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तात्मनाम् ॥३८॥ सज्वालाकवलोधूमस्त्रैलोक्यंसमुपावृणोत् ॥ ततोदेवाःसगंधर्वाऋषयश्चतपोधनाः
॥ ३९ ॥ ब्रह्माणमूचुर्भगवन्रक्षस्वेतिपुनःपुनः ॥ ततोधिगम्यविप्रोत्थंभयंब्रह्मापितामहः ॥ ४० ॥
सुरानाहततोब्रह्मागच्छध्वंत्रिपुरांतकम् ॥ मुक्तिकामास्तपस्यंतिअत्रिपुत्रामहाव्रताः ॥ ४१ ॥ त
स्माद्याचध्वममरारुद्रंत्रिभुवनेश्वरम् ॥ यदाप्रसन्नश्चायातिशूलधृक्सहकेशवः ॥ ४२ ॥ तदामुक्ताभ
विष्यंतिआत्रेयामुनिपुंगवाः ॥ ततस्तेत्रिदशाःसर्वेविरिंचवचनात्तदा ॥ विष्णुमाराधयामासुस्तथारुद्रं
चपावके ॥ ४३ ॥ ततःप्रसंनास्तेदेवाब्रह्माविष्णुमहेश्वराः ॥ आगत्यदेवैःसहितःशतशृंगंपिनाकधृ
क् ॥ ४४ ॥ तानब्रवीन्महादेवोवरंब्रूतयथेप्सितम् ॥ मौनीवासन्महात्मानःशुष्ककाष्ठाइवास्थिताः
॥ ४५ ॥ शरीरमात्रशेषास्तेनकिंचित्प्रतिभाषिरे ॥ ततोपांबिंदुभिश्चंद्रोधाराभूतैर्द्विजोत्तम ॥ ४६ ॥
प्लावयामासभगवानंतरिक्षगतःप्रभुः ॥ देवानांजीवभूतःसइंदुर्बिंदुभिरव्ययः ॥ ४७ ॥ जीवयामासभ
गवान्भ्रातॄन्सोमस्तथाशनैः ॥ ततोमृतस्यधाराभिर्जातास्तेदिव्यदेहिनः ॥ ४८ ॥ ततस्तेभ्रातरःस

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

वेंदृष्ट्वादेवमुमापतिम् ॥ समस्तदेवसहितमागतंतेववंदिरे ॥ ४९ ॥ साष्टांगंदंडवद्भूमौनत्वास्तुत्वा
जगद्गुरुम् ॥ कृतांजलिपुटाभूत्वाऊचुस्तेगद्गदस्वनाः ॥ ५० ॥ सिद्धिमिच्छामहेदेवास्त्वत्प्रसादादु
मापते ॥ ततस्तानाहदेवेशःसंमंत्र्यसहदैवतैः ॥ ५१ ॥ सिद्धायूयंमहाभागास्तपसाचदमेनच ॥ भू
योपिमत्प्रसादेनसिद्धिर्भवतुवोद्विजाः ॥ ५२ ॥ युष्माभिरस्मृतंपीतंतपसादग्धकिल्बिषैः ॥ अधिग
म्यपरंब्रह्मयथाकामंचरिष्यथ ॥ ५३ ॥ इत्युक्तेशंभुनाविप्राःप्रणिपत्यमहेश्वरम् ॥ प्रत्यूचुस्तपसा
सिद्धादेवदेवमुमापतिम्॥ ५४ ॥ तीर्थानिदेवदेवेशनाम्नास्माकंधरातले ॥ ख्यातिंगच्छंतुमर्त्यानांभ
वेयुर्भुक्तिदानिभो॥ ५५ ॥ तेषांतद्वचनंश्रुत्वापार्वतीवल्लभःशिवः ॥ अब्रवीत्तानिदंवाक्यंहर्षयन्भक्तव
त्सलः ॥ ५६ ॥ युष्मान्संजीवनार्थायचांद्राद्यमृतधारया ॥ जातान्येतानितीर्थानिपावनानिद्विजो
त्तमाः ॥५७॥ संहारंतानिपापानांकरिष्यंतिनसंशयः ॥ आस्वर्लोकाद्द्विजश्रेष्ठाःपातालावधिसत्तमाः
॥ ५८ ॥ धाराएतास्तुनित्यावैभविष्यंतिनसंशयः ॥ इतिदत्वावरंतेषांसहदेवैःपिनाकधृक् ॥ ५९ ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

यथाकामंजगामाशुभगवान्भूतभावनः ॥ सिद्धिंप्राप्यमहात्मानोयथाकामंययुर्द्विजाः ॥ ६० ॥ इति श्रीस्कांदेगोकर्णपुराणेपंचविंशोऽध्यायः ॥ २५ ॥ ॥ ॥ छ ॥ ॥ ॥ ॥

॥ नारदउवाच ॥ एकाबिंदौनरःस्नात्वाअश्वमेधफलंलभेत् ॥ दशाबिंदौनरस्नात्वाराजसूयफलंलभेत् ॥ १ ॥ शतबिंदौनरःस्नात्वावाजपेयफलंलभेत् ॥ सहस्रबिंदौयस्नातिसर्वयज्ञफलंलभेत् ॥ २ ॥ गवांदशसहस्रस्यदत्तस्यफलमश्नुते ॥ तेषुदत्तंकृतंवापिपितॄणामक्षयंभवेत् ॥ ३ ॥ एकंवाभोजयेत्तत्रब्राह्मणंश्रुतपारगम् ॥ समंत्रकंद्विजश्रेष्ठपितॄनुद्दिश्यभक्तितः ॥ ४ ॥ तदनंतफलंज्ञेयंपितॄणामक्षयंभवेत् ॥ नारदउवाच ॥ ततःकालेनमहतातीर्थंतद्दशाबिंदुकम् ॥ नामांतरंपुनःप्राप्तंगदातीर्थामिति द्विज ॥ ५ ॥ संवर्त्तकउवाच ॥ दशाबिंदुरितिख्यातंतीर्थंमुनिनिषेवितम् ॥ नामांतरंकथंप्राप्तंगदातीर्थमितिप्रभो ॥ ६ ॥ नारदउवाच ॥ शृणुविप्रप्रवक्ष्यामिगदातीर्थस्यसंभवम् ॥ पांडवाधर्मराजाद्याः कृत्वायुद्धंतुकौरवैः ॥७॥ निहत्यकौरवान्सर्वान्हस्तिनापुरमाविशन् ॥ धर्मेणपालयन्नास्तेधर्मपुत्रोमही

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

मिमाम् ॥ ८ ॥ एतेषांजननीकुंतीस्वपुत्रानिदमब्रवीत् ॥ कुंत्युवाच ॥ वनवासंहिकुर्वतोभवं
तःसर्वएवहि ॥ सस्नुःसर्वेषुतीर्थेषुमांनयंतुशुचिव्रताः ॥ ९ ॥ नक्तंहिमयास्नानंतेषुतीर्थेषुसत्तमाः ॥
इतिमातुर्वचःश्रुत्वाभीममाहयुधिष्ठिरः ॥ १० ॥ भीमास्मन्मातरंगृह्यभूप्रदाक्षिणपूर्वकम् ॥ तीर्था
निदर्शयस्वत्वंस्नापयस्वचतेषुवै ॥ ११ ॥ इतिभीमोभ्रातृवाक्यंश्रुत्वातंप्रणिपत्यच ॥ स्वमातरंगृही
त्वातुधौम्याद्यैर्मुनिभिर्युतः ॥ १२ ॥ बदर्याश्रममारभ्यसकुर्वन्भूप्रदाक्षिणम् ॥ ययौस्वमात्रेतीर्थानिद
र्शयन्स्नापयन्नपि ॥ १३ ॥ क्रमाद्द्रोकर्णमापेदेभीमःसर्वसुरार्चितम् ॥ तमागतंततःश्रुत्वामुनयःक्षेत्र
वासिनः ॥ १४ ॥ भीमसन्निधिमाजग्मुर्दृष्ट्वाभीमोपितान्मुनीन् ॥ पूजयित्वायथान्यायंधन्योहामि
तिचाब्रवीत् ॥ १५ ॥ कुशलंपरिपप्रच्छतपःस्वाध्यायकर्मसु ॥ एवंसंपूजितास्तेनऋषयस्तेतपोध
नाः ॥ १६ ॥ आशीर्भिरभिनंद्याथभीमसेनंतदाब्रुवन् ॥ सर्वेकुशलिनोभीमवसामोत्राकुतोभयाः ॥
॥ १७ ॥ पंचक्रोशपरिमाणमेतद्द्रोकर्णमुच्यते ॥ क्षेत्राणांप्रवरंपुण्यंसर्वलिंगमयंस्मृतम् ॥ १८ ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

यात्राकृतालयाभीमेमात्रासहयथाविधि ॥ दशबिंदुरितिख्यातंशतशृंगतटेशुभे ॥ १९ ॥ रत्नाकरस्य
सविधेतीर्थमस्तिमहोदयम् ॥ पाषाणेनावृतंताद्धित्वमस्माकंप्रदर्शय ॥ २० ॥ इतितेषांवचःश्रुत्वामु
नीनांभरतर्षभः ॥ तथेतिव्यासधौम्याद्यैर्मुनिभिःसहितोययौ ॥ २१ ॥ पाषाणेनावृतंदृष्ट्वातत्तीर्थपांडु
नंदनः ॥ गदामादायसतदाताडयामासतच्छिलाम् ॥ २२ ॥ गदापतनमात्रेणह्यभून्मार्गस्तुतत्क्ष
णात् ॥ ततःसर्वैर्मुनिवरैर्मात्रासहकुरूत्तमः ॥ २३ ॥ स्नात्वातत्तीर्थसलिलेयथावद्विजपुंगव ॥
कृतकृत्यस्तदाभीमःश्लाघ्यमानोमुनीश्वरान् ॥ २४ ॥ महाबलंपूजयित्वामात्रासहययौपुरम् ॥ ना
रदउवाच ॥ तस्माद्भीमगदातीर्थमितिख्यातमभूद्द्विज ॥ तस्मादुत्तरतःकिंचिच्छरपातेस्थितंशुभम् ॥
॥ २५ ॥ पांडवानामाश्रमंतुरामतीर्थस्यपूर्वतः ॥ तीर्थंकृत्वासुविमलंतत्रासिद्धिमुपागताः ॥ २६ ॥
युधिष्ठिरप्रभृतयःकिमन्यच्छ्रोतुमिच्छसि ॥ संवर्त्तकउवाच ॥ कदासिद्धिंगतास्तेपिपांडवाविमलाश
याः ॥ एतन्मेब्रूहिभगवन्पांडवाश्रमसंभवम् ॥२७॥ नारदउवाच ॥ यदाद्यूतजिताःपार्थाःकौरवेणदुरा

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

त्मना ॥ द्रौपद्याभार्यया सार्धंतदावनमुपागमन् ॥ २८ ॥ दुःखेनमहतायुक्ताःकाम्यकंवनमासत ॥
उषितंतत्रतैःसर्वैःकिंचित्कालंद्विजोत्तम ॥ २९ ॥ तीर्थयात्राप्रसंगेनततस्तस्माद्विनिर्गतः ॥ भ्रातृ
भिर्मुनिभिःसार्धंधर्मराजोयुधिष्ठिरः ॥ ३० ॥ भुवःप्रदक्षिणंकुर्वन्पूर्वाब्धितटवर्त्मना ॥ स्नात्वातत्र
त्यतीर्थेषुक्रमाद्द्रोकर्णमासदत् ॥ ३१ ॥ कृत्वाश्रमपदंतत्ररामतीर्थस्यसंनिधौ ॥ वार्षिकान्चतुरोमा
सानुषितोभ्रातृभिःसह ॥ ३२ ॥ तीर्थंकृत्वासुविमलंपूजयंश्चमहाबलम् ॥ ततःसर्वेषुतीर्थेषुस्नात्वा
चैवयथाक्रमम् ॥ ३३ ॥ ततोद्वैतवनंप्रायाद्भ्रातृभिःसहितोनघः ॥ तत्रोवासयथाकामंशृण्वन्पुण्य
कथांहरेः ॥ ३४ ॥ नारदउवाच ॥ तीर्थेवैपांडुपुत्राणाकार्तिकेशुक्लपक्षके ॥ पंचम्यामत्रयेस्नांतिते
षांपुण्यमनंतकम् ॥ ३५ ॥ रामतीर्थस्यचोत्पत्तिंशृणुष्वैकमनामुने ॥ रावणादीन्निहत्याजौरामोरा
जीवलोचनः ॥ ३६ ॥ ततःसीतासमेतःसन्नयोध्यापुरमाविशत् ॥ कृताभिषेकोविप्रर्षैर्भ्रातृभिः ॥ ७४ ॥
सहितस्तदा ॥ ३७ ॥ धर्मेणपालयन्नास्तेप्रजाःपुत्रानिवौरसान् ॥ एकदाऋषयःसर्वेवसिष्ठाग

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

स्त्यपूर्वकाः ॥ ३८ ॥ आजग्मूरामचंद्रस्यदर्शनार्थमुनीश्वराः ॥ आगतान्मुनिवर्यांस्तान्प्रत्युद्ग
म्यकृतांजलिः ॥ ३९ ॥ अर्घ्याद्यैःपूजयामासप्रणिपातपुरःसरम् ॥ ततोब्रवीद्वसिष्ठादीन्रामः
प्रवदतांवरः ॥ ४० ॥ अद्याहंकृतकृत्योस्मिभवतांदर्शनेनवै ॥ इत्युक्तेरामचंद्रेणअगस्त्यःप्राहतं
तदा ॥ ४१ ॥ त्वंरामपुरुषःसाक्षादादिनारायणोव्ययः ॥ त्वयानिरामयःसर्वेवयंस्वेषुतपःसुवै ॥४२॥
इदानींदर्शनार्थंतेवयंसर्वेसमागताः ॥ ततोरामस्तुशुश्रावअगस्त्यान्मुनिसत्तमात् ॥ ४३ ॥ रावण
प्रमुखानांचजन्मकर्मचरक्षसाम् ॥ श्रुत्वामनसिनिर्विण्णोरामःपप्रच्छतानृषीन् ॥४४॥ रामउवाच ॥
ब्रह्मवंशोद्भवास्तेहिरावणाद्यानिशाचराः ॥ तस्मात्संप्राप्तवानस्मिब्रह्महत्यांसुदुःसहाम् ॥ ४५ ॥ त
द्दोषपरिहारार्थंकिंकर्त्तव्यंमयाद्विजाः ॥ श्रद्दधानायमेब्रूतउपायंमुनिपुंगवाः ॥ ४६ ॥ अगस्त्यउवा
च ॥ गोकर्णाख्यंमहाक्षेत्रमास्तिवैदक्षिणापथे ॥ तत्रास्तिकोटितीर्थाख्यंसर्वपापप्रणाशनम् ॥ ४७ ॥
पश्चिमांबुधितीरस्थंगोकर्णक्षेत्रमुत्तमम् ॥ ब्रह्महत्यादिपापानिदहतीतिकिमद्भुतम् ॥ ४८ ॥ गोक

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

र्णत्वंसमागच्छसीतयालक्ष्मणेनच ॥ हनूमतासमंरामतपश्चरसमाहितः ॥ ४९ ॥ इत्युक्तेमुनिनारामो
अभिवाद्यमुनीश्वरान् ॥ सीतालक्ष्मणसंयुक्तोगोकर्णक्षेत्रमागमत् ॥ ५० ॥ पार्श्वेतुशतशृंगस्यपश्चि
मोत्तरतोमुन ॥ तीरेसरित्पतेरामोह्याश्रमंकृतवांस्ततः ॥ ५१ ॥ तपश्चचारसतदालक्ष्मणेनसमन्वि
तः ॥ एवंतपस्यतस्तस्यतुष्टोभूत्परमेश्वरः ॥ ५२ ॥ तुष्टःप्रोवाचसतदावरंब्रूहीतिसादरम् ॥ ततःप्रो
वाचसतदारामोराजीवलोचनः ॥ ५३ ॥ रावणादिवधाज्जातांब्रह्महत्यांव्यपोहय ॥ लक्ष्मणस्यचमे
देवह्येतदेववरंमम ॥ ५४ ॥ इत्युक्तेरामचंद्रेणततःप्रोवाचशंकरः ॥ तीर्थमेतद्रामचंद्रब्रह्महत्यादिना
शनम् ॥ ५५ ॥ रामतीर्थमितिख्यातंपुण्यंभवतुसर्वतः ॥ रावणादिवधाज्जताब्रह्महत्याविनाशिता
॥ ५६ ॥ इतःपरंकोटितीर्थेस्नात्वाचैवमहाबलम् ॥ अयोध्यामगमद्रामःसीतालक्ष्मणसंयुतः ॥५७॥
॥ नारदउवाच ॥ चैत्रमासेशुक्लपक्षेनवम्यांचैवयेजनाः ॥ स्नात्वाचरामतीर्थेतुपूजयित्वातुराघवम्
॥ ५८ ॥ मंत्रमष्टाक्षरंजप्त्वाब्रह्महत्यादिनश्यति ॥ सर्वान्कामानवाप्नोतिविष्णुलोकंसगच्छति

॥ ७५ ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

॥ ५१ ॥ ॥ इतिश्रीस्कांदेगोकर्णपुराणेषड्विंशोऽध्यायः ॥ २६ ॥ ॥ छ ॥ ॥
नारदउवाच ॥ भीमकुंडामितिख्यातंतीर्थमिष्टार्थसिद्धिदम् ॥ पुराभीमाव्हयोराजासिद्धिमापसुदुर्ल
भाम् ॥ १ ॥ पत्न्यासहनृपश्रेष्ठोह्याराध्यपरमेश्वरम् ॥ संवर्त्तकउवाच ॥ कोसौभीमोमहाबुद्धेकथं
सिद्धिमुपागतः ॥ गोकर्णेकुत्रनृपतिर्वदमेद्विजसांप्रतम् ॥ २ ॥ नारदउवाच ॥ पुराकृतयुगेतात
वैदर्भःपृथिवीपतिः ॥ भीमोनाममहातेजाःसाक्षाद्धर्मइवापरः ॥ ३ ॥ पुत्रसंक्रामितश्रीकोविरक्तःस
र्ववस्तुषु ॥ पत्न्यासहनृपश्रेष्ठोगोकर्णक्षेत्रमागमत् ॥ ४ ॥ तत्रगत्वामहातेजाःकृत्वाश्रमपदंशुभम्॥
तीर्थनिर्माणतत्रैवतपोवनसमीपतः ॥ ५ ॥ गंगाधारस्यसविधेनियतात्माजितेंद्रियः ॥ तपस्तेपेनिरा
हारोघोरमुद्दिश्यशंकरम् ॥६॥ वर्षाणांषट्शतंराजापरमेणसमाधिना ॥ ततःप्रीतोमहादेवस्तस्यप्रत्यक्ष
तांगतः ॥ ७ ॥ सदृष्ट्वापुरतःशंभुंभीमोवैदर्भभूपतिः ॥ ननामपत्न्यासहितःशंकरंदंडवद्भुवि ॥ ८ ॥
समुत्थाप्याब्रवीद्देवोवरंब्रूहीतिसादरम् ॥ दातास्मितेमहाराजयद्यपिस्यात्सुदुर्लभम् ॥ ९ ॥ इत्युक्तः

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

शंभुनाराजाकृतांजलिरभाषत ॥ राजोवाच ॥ स्वर्गवासोक्षयोमेस्तुपत्न्यायुक्तस्यशंकर ॥ प्रसादात्त
वदेवेशवरमेतद्वृणोम्यहम् ॥ १० ॥ तीर्थमेतत्सुरश्रेष्ठसर्वपापहरंभवेत् ॥ स्नातानामत्रदेवेशवांछिता
र्थप्रदंभवेत् ॥ ११॥ तथेत्युक्त्वामुनिश्रेष्ठशंकरःपृथिवीपतिम् ॥ ततोंतर्धानमगमत्सोपिस्वर्गमुपेयिवा
न् ॥१२॥ तास्मिन्तीर्थवरेपुण्येकार्तिकेमासियोनरः ॥ शुक्लपक्षेत्रयोदश्यांस्नात्वासंकल्पपूर्वकम् ॥१३॥
स्थंडिलेशंकरंपूज्यसोपिस्वर्गमवाप्नुयात् ॥ नारदउवाच ॥ तस्मात्पश्चिमदिग्भागेक्रोशार्धेचांभसांनि
धेः ॥ तीरेऽस्तिशुभदंतीर्थमौर्वस्यमुनिसत्तम ॥ १४ ॥ श्रूयतामभिधास्यामितस्यतीर्थस्यसंभवम्॥
भृगुवंशोद्भवःपूर्वमौर्वोनाममहामुनिः ॥ १५ ॥ क्रोधाविष्टस्तपस्तेपेदग्धुकामश्चराचरम् ॥ गोकर्णंस
मुपागम्यशतशृंगतटेशुभे ॥ १६ ॥ बिंदुतीर्थादुत्तरतःकृत्वाश्रमपदंशुभम् ॥ ब्रह्मचर्यव्रतेयुक्तोवा
य्वंबुकृतभोजनः ॥ १७ ॥ घोरेणतपसाचैवरुद्रमाराधयच्चिरम् ॥ पंचाग्निमध्यगोभूत्वादिव्यवर्षशा
तंद्विज ॥ १८ ॥ ततस्तत्तपसासर्वसंक्षुब्धंसचराचरम् ॥ सदेवासुरगंधर्वंसयक्षोरगराक्षसम् ॥१९॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

सर्वमुद्विग्नमभवत्तपसातस्यमोहितम् ॥ ततस्तस्याग्रतोदेवःसहदेवैःपिनाकधृक् ॥ २० ॥ आगत्य
भगवान्रुद्रोवरंब्रूहीत्यभाषत ॥ ततश्चोन्मील्यनयनेदृष्ट्वादेवंपुरास्थितम् ॥ २१ ॥ दंडवत्पतितोभूमौ
नत्वास्तुत्वाजगद्गुरुम् ॥ क्रोधाविष्टोप्युवाचासौऔर्वोदेवंमहायशाः ॥ २२ ॥ वरंददासिचेन्मह्यंव
राहोंयदिचाप्यहम् ॥ त्रैलोक्यदाहकोवह्निर्भवेयंत्वत्प्रसादतः ॥ २३ ॥ इतितस्यवचःश्रुत्वातथा
स्त्विवतिपिनाकधृक् ॥ वरंदत्वामहादेवःसहदेवैर्वृषध्वजः ॥ २४ ॥ तत्रैवादर्शनंयातःशंकरोभक्तवत्स
लः ॥ और्वश्चैवततोविप्रोवडवाग्निरजायत ॥ २५ ॥ लेलिहानोजगत्सर्वंज्वालामालीविभावसुः ॥
अवर्धतमहावह्निर्दग्धुकामश्चराचरम् ॥ २६ ॥ ततोब्रह्माजगत्स्रष्टादृष्ट्वाग्निंसहसोत्थितम् ॥ आ
धावमानान्विबुधान्सहरुद्रेणविश्वसृट् ॥ २७ ॥ तैःसमेत्यजगन्नाथोज्ञात्वाह्यौर्वकृतंत्विदम् ॥ सह
तैर्विबुधैर्विप्रक्षीराब्धेस्तटमभ्यगात् ॥ २८ ॥ तत्राराध्यहरिंतेहिशंखचक्रगदाधरम् ॥ तेनसंमंत्र्यविबु
धागोकर्णंपुनराययुः ॥ २९ ॥ चक्रंसुदर्शनंदेवःक्षिप्तवान्ताहृविभावसौ ॥ वेष्टयामासतंवह्निंविष्णुचक्रं

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

सुदर्शनम् ॥ ३० ॥ सचक्रातर्हितोभूत्वाऊर्ध्वाग्निःसमवर्धत ॥ ततस्तामिंदुधाराभिरुपरिन्यधमद्धरिः
॥ ३१ ॥ अथोपगम्यतंविप्रंशतशृंगनिवासिनम् ॥ और्वमाहजगन्नाथःशंखचक्रगदाधरः ॥ ३२ ॥
कोपःसंह्रियतांविप्ररक्षस्वभुवनत्रयम् ॥ निरागसमकालेतुनसंहर्तुंत्वमर्हसि ॥ ३३ ॥ त्वमेववाह्निंवि
प्रेंद्रसंस्तंभयितुमर्हसि ॥ कालेहिसर्वभूतानिसृष्टानिपरमेष्ठिना ॥ ३४ ॥ संह्रियंतेधुनातानिवाह्नि
नातेनसुव्रत ॥ इत्युक्तःसमहातेजाविष्णुनाप्रभविष्णुना ॥ ३५ ॥ कृतांजलिपुटोभूत्वाक्षम्यतामि
तिचाब्रवीत् ॥ यथेच्छसिजगन्नाथतथानत्कर्तुमर्हसि ॥ ३६ ॥ कालेप्राप्तेतिमेदेवसर्वंस्थावरजंगम
म् ॥ वह्निर्मदीयःप्रदहेत्तथाकर्तुंत्वमर्हसि ॥ ३७ ॥ मन्नाम्नाग्निरयंलोकेख्यातोभवतुकेशव ॥ तपोहा
निर्नचेदेवंत्वत्प्रसादाद्भवेन्मम ॥ ३८ ॥ तीर्थमेतत्सुरश्रेष्ठलोकेपूज्यतमंभवेत् ॥ इतिश्रुत्वावचस्त
स्यऔर्वस्यपुरुषोत्तमः ॥ ३९ ॥ तथास्त्वितिवरंदत्वासहदेवैर्जनार्दनः ॥ विधायरक्षांविधिवत्तत्रैवांत
र्धीयत ॥४०॥ संवर्तकउवाच ॥ कोसौरक्षतिविप्रेंद्रऔर्वाग्निंवरुणालये ॥ वडवास्यःकथमभूत्तत्कथां

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

कथयस्वमे ॥ ४१ ॥ नारदउवाच ॥ अधस्ताद्वरुणोदेवोऊर्ध्वंरक्षातिचंद्रमाः ॥ सुदर्शनंतदभितःसर्व
दायातितंमुने ॥ ४२ ॥ रुद्रवाह्निरसौविप्रक्षुद्रकुंडेभवत्पुरा ॥ पुरंदरपुरोगास्तुदेवाःसंमन्त्र्यचैकदा
॥ ४३ ॥ अश्वानादायचौर्वास्येमंत्रेणाथर्वणेनाहि ॥ क्षिप्तादेवैर्हिजश्रेष्ठतस्मात्सवडवामुखः ॥ ४४ ॥
यत्रोत्पन्नःपुरावह्निरौर्वस्यतपसाद्विज ॥ तदौर्वतीर्थंविख्यातंत्रिषुलोकेषुसत्तम ॥ ४५ ॥ तस्मिन्स्नातः
सर्वतीर्थेस्नातोभवतिमानवः ॥ अश्वमेधस्ययज्ञस्यफलंप्राप्नोत्यसंशयम् ॥ ४६ ॥ सूर्यतीर्थंचतत्रै
वचंद्रतीर्थंचसत्तम ॥ अनंततीर्थंचविभोकिमन्यच्छ्रोतुमिच्छसि ॥ ४७ ॥ ॥ इतिश्रीस्कांदेगो
कर्णपुराणेसप्तविंशोऽध्यायः ॥ २७ ॥ ॥ ॥ ॥ ॥ ॥ ॥
॥ संवर्तकउवाच ॥ चंद्रतीर्थस्यचोत्पत्तिंसूर्यतीर्थस्यचोभयोः ॥ प्रभावंचद्विजश्रेष्ठयथावद्वक्तुमर्हसि
॥ १ ॥ नारदउवाच ॥ शृणुष्वावहितोविप्रकथांपापापनोदिनीम् ॥ मातृदास्यविमोक्षार्थंगरुडःपत
तांवरः ॥ २ जित्वासुरासुरांस्तत्रसुधामाहृतवान्पुरा ॥ संकेतदः सुरेंद्रायकाद्रवेयांतिकंययौ ॥ ३ ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

अथसर्वांनुवाचेदंगरुडःपततांवरः ॥ इदमानीतममृतंनिक्षिपामिकुशोपरि ॥ ४ ॥ स्नातामंगलसंयु
क्ताःसुधांपिबतपन्नगाः ॥ अद्यप्रभृतिमेमातानदासीपन्नगोत्तमाः ॥ ५ ॥ इत्युक्त्वाप्रययौपक्षीमात्रास
हयथासुखम् ॥ ततःस्नातुंगताःसर्पाःशक्रोब्राह्मणवेषधृक् ॥ ६ ॥ आदायामृतपात्रंतुत्रिदिवंस्वयमा
गमत् ॥ ततःसर्पास्तुसुस्नाताःपातुकामाःसुधांतदा ॥ ७ ॥ अभिगम्यामृतस्थानंनदृष्ट्वातत्रचामृतम् ॥
सर्वमायाकृतंमत्वादर्भास्तेलिलिहुस्तदा ॥ ८ ॥ ततोद्विधाकृताजिव्हासर्पाणांतेनकर्मणा ॥ अभवं
श्चसुधास्पर्शाद्दर्भास्तेथपवित्रिणः ॥ ९ ॥ नारदउवाच ॥ निक्षिप्तंयत्रवैसोमंगरुडेनमहात्मना ॥ त
त्रचौषधजातानिजाज्ञिरेत्रीणिसत्तम ॥ १० ॥ सोममालीसुमालीचसमालीचैवसत्तम ॥ सुधोद्भवत्वा
द्ब्रह्मर्षेह्यमरत्वप्रदानिवै ॥ ११ ॥ महतातपसालभ्यान्यलभ्यानिचपापिनाम् ॥ तत्सोमतीर्थविख्या
तंसर्वतीर्थोत्तमोत्तमम् ॥ १२ ॥ सोमानिष्पंदजनितंऋषिदेवार्चितंसदा ॥ सर्वपापहरंन्दृणांतपोवर्ध
नमुत्तमम् ॥ १३ ॥ सोमकुंडमितिख्यातंतीर्थानांप्रवरंमहत् ॥ पुरासोमोदक्षशापात्क्षीणत्वंप्रा

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

प्यसत्तम ॥ १४ ॥ तस्मिन्सोमस्तपस्तेपेसिद्धिकामःपुराद्विज ॥ तत्राराध्यमहादेवंमहतातपसामुने ॥ १५ ॥ संसिद्धिंप्रापमहतीमन्यैरप्राप्यसंपदम् ॥ मूर्ध्निस्थानमवापाग्र्यंदेवदेवस्यशूलिनः ॥ १६ ॥ देवानांश्रैष्ठ्यमगमत्तत्रस्थश्चंद्रमाद्विज ॥ सोमतीर्थेनरःस्नात्वायोददातिसुवर्णकम् ॥ १७ ॥ सर्वपापैःप्रमुच्येतसप्तजन्मकृतैरपि ॥ नारदउवाच ॥ सोमतीर्थादुत्तरतःसूर्यतीर्थमितिस्थितम् ॥ त्वष्टुःप्रजापतेःकन्याभार्यासूर्यस्यसत्तम ॥ १८ ॥ सासहंतीभर्तृतेजःपितुर्वेश्मात्रजत्पुनः ॥ तज्ज्ञात्वासवितापश्चात्त्वष्टुर्गृहमुपागमत् ॥ १९ ॥ समाजस्तत्रदेवानांतदाह्यासीद्विजोत्तम ॥ ततस्त्वष्टामहातेजाःसंमंत्र्यसहदैवतैः ॥ २० ॥ तेजोनिशामयामासयंत्रमारोप्यतंशनैः ॥ सूर्याद्विनिर्गतंतेजःशातशृंगतटेपतत् ॥ २१ ॥ रत्नाकरस्यसविधेशिलानागस्यदक्षिणे ॥ तद्दृष्ट्वाभगवानीशःशर्वःसुरगणार्चितः ॥ ॥ २२ ॥ तपसामहताविप्रचक्रेचक्रंसुदर्शनम् ॥ सुदर्शनमितिख्यातंरुद्रतेजःसमावृतम् ॥ २३ ॥ तपसाराध्यघोरेणभगवंतंत्रिलोचनम् ॥ तद्गृहीतंभगवताविष्णुनाप्रभविष्णुना ॥२४ ॥ तत्सूर्यतीर्थं

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

विख्यातंयत्रकीर्णमहोरवेः ॥ तत्रस्नातःसर्वतीर्थैस्नातोभवतिमानवः ॥ २५ ॥ पापकंचुकमृत्सृज्यसू
र्यलोकंसगच्छति ॥ अग्निष्टोमस्ययज्ञस्यफलंप्राप्नोतिनिश्चितम् ॥२६॥ नारदउवाच ॥ अतःपरमनं
तस्यतीर्थविप्रमहामते ॥ पीत्वामृतमनंतस्तुतत्रपेतेमहत्तपः ॥२७॥ कृतेयुगेद्विजश्रेष्ठविष्णुमाराधयत्प्र
भुम् ॥ त्रेतायांविधिमुद्दिश्यद्वापरेतुमहेश्वरम् ॥ २८ ॥ तुरीयेतुयुगेप्राप्तेब्रह्मविष्णुमहेश्वराः ॥ त
स्यप्रत्यक्षमगमन्नूचुश्ववरयेत्युत ॥ २९ ॥ तान्दृष्ट्वाविबुधश्रेष्ठाननंतःपन्नगेश्वरः ॥ सहस्रसंख्यैर्विप्रेंद्र
शिरोभिःप्रणिपत्यतान् ॥ ३० ॥ कृतांजलिपुटोभूत्वास्तोतुंसमुपचक्रमे ॥ अनंतउवाच ॥ नमःक
र्त्रेचहर्त्रेचभर्त्रेचजगतांनमः ॥ कार्यकारणकर्तृत्वेपृथग्देहंसमाश्रिताः ॥३१॥ अज्ञानिनोमूर्त्तिभेदान्जा
नंतिपृथगेवहि ॥ जानंतिज्ञानिनोनित्यमेकमूर्तिंसुरेश्वराः ॥ ३२ ॥ वीशवीवृषवाहाश्चवीशावीवृषभध्व ॥ ७९ ॥
जाः ॥ ऋग्यजुःसामविदितापयोदधिनगौकसः ॥ ३३ ॥ विष्णवेब्रह्मणेचैवईश्वरायनमोनमः ॥ त्रि
भिर्व्याप्तमिदंविश्वंदृश्यादृश्यंसुरेश्वराः ॥ ३४ ॥ तथात्रिभिर्गुणैर्देवाःसर्वप्राणिषुसंस्थिताः ॥ भक्त्या

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

नुकंपयायूयंममप्रत्यक्षतांगताः ॥ ३५ ॥ इतिस्तुतातदादेवाअनंतेनमहात्मना ॥ ब्रह्मविष्णुमहादेवा
वरंब्रूहीतिचाब्रुवन् ॥ ३६ ॥ अनंतउवाच ॥ ज्ञानंदेहिमहाभागअमरत्वंचदेहिमे ॥ बलेधैर्येतथाधु
र्येसर्वेभ्योहंयथाधिकः ॥ ३७ ॥ तथादेहिवरान्मह्यंस्थानमेतत्सुरोत्तम ॥ उत्तमोत्तमतामेतुतीर्थमज्ञा
ननाशनम् ॥ ३८ ॥ भवेदेवंसुरश्रेष्ठयदितुष्टोसिशंकर ॥ तथाऽस्त्वितिवरंदत्वाअंतर्धानंगताःसुराः ॥
॥ ३९ ॥ ततोनंतःप्रविश्याब्धिजलमार्गेणवाह्निज ॥ संस्तूयमानोनागेंद्रैर्गंधर्वाप्सरसांगणैः ॥ ४० ॥
स्वस्थानमगमद्द्विप्रअनंतःपन्नगाधिपः ॥ तत्रानंतवृषंनामपाषाणंलोकविश्रुतम् ॥ ४१ ॥ शिलायांदृ
श्यतेमार्गःसमुद्रेचतथाविधः ॥ तन्मार्गंयेप्रपश्यंतिशिलायांवरुणालये ॥ ४२ ॥ आजन्मचरितं
पापंदर्शनादेवनश्यति ॥ तच्छिलायाश्चसविधेउत्तरेनागशासितुः ॥ ४३ ॥ सर्वपापहरंपुण्यंतीर्थम
स्तिमहोदयम् ॥ तस्मिन्स्नातःसर्वतीर्थेस्नातोभवतिमानवः ॥ राजसूयस्ययज्ञस्यफलंप्राप्नोत्यसंशय
म् ॥ ४४ ॥ इतिश्रीस्कांदेगोकर्णपुराणेअष्टाविंशोऽध्यायः ॥ २८ ॥ ॥ छ ॥ ॥ ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

शिशुमारमितिख्यातंतीर्थंत्रैलोक्यविश्रुतम् ॥ एकबिंदोर्दक्षिणतस्तीर्थमस्तिमहोदयम् ॥ १ ॥ सर्वदे
वमयःसाक्षाच्छिशुमारःप्रजापतिः ॥ तपस्तेपेनिराहारःसिद्धिमिच्छन्पुराद्विज ॥ २ ॥ घोरेणतपसा
तस्यतुतोषभगवान्हरः ॥ प्रत्यक्षमगमत्तस्यसाक्षाद्विश्वेश्वरःशिवः ॥३॥ प्रजापतिस्तुतंदृष्ट्वादेवदेवमुमा
पतिम् ॥ दंडवत्पतितोभूम्यांननामशिरसाविभुम् ॥ ४ ॥ उत्थापयामासतदाप्रणतंतंपिनाकधृक् ॥
उवाचचैनंगौरीशोवरंब्रूहीतिसादरम् ॥ ५ ॥ क्षेमंभवान्ममविभोदेवानांचप्रजापते ॥ मत्तःकिमिच्छ
सिविभोब्रूहितत्तेददाम्यहम् ॥ ६ ॥ तच्छ्रुत्वाभाषितंशंभोर्नत्वास्तुत्वाप्रजापतिः ॥ कृतांजलिपुटोभू
त्वावरंवव्रेप्रजेश्वरः ॥ ७ ॥ सिद्धिमिच्छामिभगवन्परांसिद्धिंचदेहिमे ॥ येचात्रागत्यभगवन्स्नां
तितीर्थेममप्रभो ॥ ८ ॥ तेपिसिद्धाभवंत्वत्रप्रसादाद्भक्तवत्सल ॥ मन्नाम्नापार्वतीकांततीर्थंख्यातिं
चगच्छतु ॥ ९ ॥ श्रीशंकरउवाच ॥ सिद्धोसिवैपूर्वमेवस्वभावात्त्वंसुरारणे ॥ त्वदंशभूताहिवयंस
र्वेचैवसुरासुराः ॥ १० ॥ चराचरमिदंप्राज्ञावदंतिवदतांवर ॥ त्वदधीनासिद्धिरियंतात्किंसिद्धिमभी

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

प्ससे ॥ ११ ॥ शिशुमारउवाच ॥ क्षेत्रंत्वहंहिदेवानांमदुत्पन्नाहिदेवताः ॥ तथापिसिद्धिमिच्छामि
क्षेत्रेस्मिन्नेवशंकर ॥ १२ ॥ सप्रभुःसर्वलोकानामस्माकंचसुरोत्तम ॥ त्वयाकृतानिचैतानिस्थिति
कल्पान्यनेकधा ॥ १३ ॥ त्वयाकृतमिदंविश्वंत्वय्येवाहंत्रिलोचन ॥ त्वदधीनापरासिद्धिर्मात्रकार्या
विचारणा ॥ १४ ॥ शंकरउवाच ॥ व्यक्तमुक्तंत्वयाब्रह्मनशिशुमारमहामते ॥ तस्मात्सिद्धिर्भवतु
तेमत्प्रसादात्सुरारणे ॥ १५ ॥ येद्रक्ष्यंत्याश्रमामिदंतेपिसिद्धाभवंतुवै ॥ त्वयाकृतमिदंतीर्थंत्वन्नाम्ना
ख्यातिमेष्यति ॥ १६ ॥ इतितस्मैवरंदत्वाभगवान्भूतभावनः ॥ तत्रैवादर्शनंयातःकिमन्यच्छ्रोतुमि
च्छसि ॥१७॥ संवर्तकउवाच ॥ कोसौदेवऋषेब्रूहिशिशुमारःप्रजापतिः ॥ प्रभावंतस्यमेशंसजन्म
कर्मचवैमुने ॥ १८ ॥ नारदउवाच ॥ एकादशेपुराविप्रकल्पादौभगवानजः ॥ स्रष्टुकामःप्रजाः
सर्वाजलादूर्ध्वसुपागतः ॥ १९ ॥ चित्ररूपंददर्शाथछायारूपमिवांबरे ॥ तंदृष्ट्वाचिंतयन्ब्रह्माकिमे
तदितिसुव्रत ॥ २० ॥ ततोदध्यौचिरंब्रह्माज्ञातुंतद्भूतभावनः ॥ ज्ञात्वाध्यानेनतद्भूतंब्रह्मालोकापिता

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

महः ॥ २१ ॥ ततोददर्शविश्वात्मार्यीयमानंपयोनिधिम् ॥ क्षणान्निस्तोयभूतंताद्धिष्ण्यानिदद्दशेप्र
भुः ॥ २२ ॥ ततःस्वक्षेत्रमितितंज्ञात्वाब्रह्मायुयोजच ॥ यादोरूपधरःसोथब्रह्माणमुपचक्रमे ॥ २३ ॥
तस्मादुद्धृत्यजीवांशंदेवादीनांपितामहः ॥ देवादितृणपर्यंतमसृजत्सचराचरम् ॥ २४ ॥ सृष्ट्वाहिस
र्वभूतानिब्रह्मालोकगुरुःस्वयम् ॥ पुनस्तास्मिन्शिंशुमारेअंशान्यादायसुव्रत ॥ २५ ॥ क्षिपेद्दैसर्वभूते
शश्चराचरकृतेच्छया ॥ यक्षाहिकषकःपुत्रसिद्धेर्व्रीहिषुबुद्धिमान् ॥ २६ ॥ बीजानुद्धृत्यनिदधेतदेवा
क्षयमिच्छता ॥ तथासौभूतकर्तृत्वंशिंशुमारेन्यधापयत् ॥ २७ ॥ तस्मान्नित्यशरीरोसौदेवानांचप्र
जापतिः ॥ सएवपूर्वाहिपृथकृततस्तस्मादजायत ॥ २८ ॥ तत्प्राप्तिमचलामाहुःपरांसिद्धिंद्विजोत्त
म ॥ सोप्यत्रागत्यभगवान्शिशुमारःप्रजापतिः ॥ २९ ॥ सिद्धिमापमहाक्षेत्रेगोकर्णेब्राह्मणोत्तम ॥ ॥ ८१ ॥
सर्वदेवमयंक्षेत्रंगोकर्णमाभिधीयते ॥ ३० ॥ भुक्तिंमुक्तिंपरांसिद्धिमिच्छंत्यत्रसुरासुराः ॥ गंधर्वाप्सरस
श्चवसुपर्णायक्षरक्षसः ॥ ३१ ॥ सिद्धविद्याधरगणाःपशुपक्षिसरीसृपाः ॥ नगानागामनुष्याश्चती

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

र्थानिचसरांसिच ॥ ३२ ॥ नद्योनदाश्चतरवःसर्वेचाद्विजसत्तम ॥ गोकर्णक्षेत्रमासाद्यासिद्धिंप्रा पुःप
रात्पराम् ॥३३॥ तस्मात्क्षेत्रवरंह्येतद्गोकर्णपावकात्मज ॥ नारदउवाच ॥ पुराकैलासशिखरेपार्वत्यै
प्राहशंकरः ॥ गोकर्णक्षेत्रमाहात्म्यंदेवीश्रुत्वामुदान्विता ॥ ३४ ॥ उवाचशंकरंप्रीत्यागोकर्णदर्शय
स्वभो ॥ सतीर्थसवनंदेवसर्वसिद्धिप्रदंनृणाम् ॥ ३५ ॥ तच्छ्रुत्वाशंकरःप्रीतोवृषारूढःप्रियान्वितः ॥
प्रययौप्रमथैःसार्धंगोकर्णंभरतर्षभ ॥ ३६ ॥ दर्शयामासतत्क्षेत्रंदेव्यैतेभ्यश्चशंकरः ॥ वनानिसरितश्चै
वतीर्थान्यायतनानिच ॥ ३७ ॥ गोकर्णस्थानिलिंगानिशतशृंगंमहागिरिम् ॥ दृष्ट्वासर्वमशेषेणगोक
र्णेविस्मयान्विता ॥ ३८ ॥ विश्वरूपधरादेवीशंकरंप्रत्यभाषत ॥ पार्वत्युवाच ॥ वस्तुमिच्छाम्यहं
चात्रतवक्षेत्रेमहेश्वर ॥ रमणीयंशिवंगुह्यंश्रेष्ठंस्थानंविधीयताम् ॥३९॥ तच्छ्रुत्वाहप्रियांदेवोस्मितपूर्वं
कुरूद्वह ॥ शुभानिसर्वस्थानानिगोकर्णेवरवर्णिनि ॥ ४० ॥ एवमुक्त्वाप्रियांशंभुःपार्वत्यासहि
तस्तदा ॥ शतशृंगगिरेस्तस्यपार्श्वेदक्षिणपश्चिमे ॥ ४१ ॥ उवासाप्रियया सार्धंपार्षदैःसहशंकरः ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

उमावनमितिख्यातमाश्रमंतदभून्महत् ॥ ४२ ॥ तत्रतौदंपतीराजन्सहभूतैरधिष्ठितौ ॥ तदाश्रमं
नपश्यंतिपापिष्ठानास्तिकाःप्रभो ॥४३॥ मालिन्यादाक्षिणेभागेगिरेरुपरिसंस्थितम् ॥ तदाश्रमंपालयं
तिप्रमथास्तत्रसंस्थिताः ॥ ४४ ॥ नानावर्णाशिलास्तत्रदृश्यंतेोद्विजपुंगव ॥ तत्रसंतिह्यसंख्यानितीर्था
निमुनिसत्तम ॥ ॥४५ ॥ शिलातुकुंडिकाकारासमुद्रोपरिवर्तते ॥ क्रीडार्थंतत्समानीतंकैलासाच्छृं
गमुत्तमम् ॥ ४६॥ पृथिव्यांयानितीर्थानियानिस्वर्गेवसंतिहि ॥ तानिसर्वाणितत्रैववसंतिभरतर्षभ
॥ ४७ ॥ शौचार्थंगिरिजादेव्यास्तद्वनस्यचदाक्षिणे ॥ तेषांद्रवमभूत्तीर्थमुमाह्रदमितिप्रभो ॥ ४८॥
तत्रस्नात्वानरोभक्त्याशिवाभ्यांस्थापितंशुभम् ॥ उमामहेश्वरंनामलिंगंत्रैलोक्यविश्रुतम् ॥४९॥ का
र्तिकेशुक्लद्वादश्यांयःपूजयतिभक्तितः ॥ पुत्रार्थीलभतेपुत्रंधनार्थीलभतेधनम् ॥५०॥कन्यार्थीलभतेक
न्यांमोक्षार्थीमोक्षमाप्नुयात् ॥ सप्तजन्मकृतात्पापात्स्नात्वातत्रप्रमुच्यते ॥५१॥ तस्मिन्वनेसुरतरुःस
र्वकामफलप्रदः ॥ तत्रछायाकरोह्यास्तेछायापादपउच्यते ॥ ५२ ॥ सदापुष्पफलोपेतःसप्तहस्तो

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

च्छ्रितश्वसः ॥ पत्रंपुष्पंफलंचास्ययेखादंतिनराध्रुवम् ॥५३ ॥ तेषांनमृत्युर्नजरायावन्मन्वंतरंद्विज ॥
तंनपश्यंतिविप्रेंद्रविषयाकृष्टचेतसः ॥ ५४ ॥ तस्मात्तीर्थादुत्तरतस्तीर्थंतत्कुंडिकाह्वयम् ॥ आस्तेपु
ण्यतमंविप्रदृष्टमात्राघनाशनम् ॥ ५५ ॥ संवर्त्तकउवाच ॥ मालिनीनामतत्तीर्थंकथमासीच्छ्रुतं
भुवि ॥ तस्यतीर्थस्यचोत्पत्तिंवदमेमुनिपुंगव ॥ ५६ ॥ नारदउवाच ॥ शृणुविप्रप्रवक्ष्यामिमालिनी
तीर्थसंभवम् ॥ क्रीडागिरेरधोभागेमालिनीनामनिम्नगा ॥ ५७ ॥ आस्तेपुण्योदकाराजन्नृणांपुण्य
विवर्धिनी ॥ स्वायंभुवांतरेविप्रराजासीत्पृथिवीपतिः ॥ ५८ ॥ चंद्रदेवइतिख्यातःसाक्षाच्चंद्रइवापरः॥
मालिनीनामतस्यासीद्भार्यापरमशोभना ॥ ५९ ॥ तयासार्धंनृपवरःसिद्धिमिच्छन्परांद्विज ॥ गो
कर्णक्षेत्रमासाद्यक्रीडाशैलादधस्तले ॥ ६० ॥ तपस्तेपेनिराहारःस्वपत्नीकंशिवंयजन् ॥ दिव्यवर्ष
सहस्रंतुब्रह्मचर्यपरायणः ॥ ६१ ॥ ततःप्रसन्नोभगवानुमयासहितःशिवः ॥ प्रत्यक्षमगमत्तस्यवरं
ब्रूहीत्युवाचतम् ॥ ६२ ॥ इतितद्वचनंश्रुत्वानत्वास्तुत्वाजगद्गुरुम् ॥ हर्षगद्गदयावाचाशंकरंवाक्यमब्रवी

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

त ॥ ६३ ॥ चंद्रदेवउवाच ॥ त्वयिसायुज्यमिच्छामितथास्त्वितिचसोऽब्रवीत् ॥ त्यक्त्वाकलेवरंतौतुत
त्क्षणाद्द्विजपुंगव ॥ ६४ ॥ वायुभूतौविविशतुर्देवंदेवींद्विजोत्तम ॥ चंद्रदेवाश्रमंनामख्यातंमुक्तिप्रदं
नृणाम् ॥ ६५ ॥ तयोस्तपःप्रभावेणकामार्तौतौबभूवतुः ॥ संगमंचक्रतुस्तत्रसुचिरंमुनिपुंगव ॥ ६६
तयोःसंभोगजनिताशुक्लभूतामहानदी ॥ शुद्धस्फटिकसंकाशानिर्मलापापहारिणी ॥६७॥ तयोःक
लेवरंगृह्यबभ्रामद्विजसत्तम ॥ मालाकारेवतच्छृंगंवेष्टयामासपाविनी ॥ ६८ ॥ मालिनीनामविख्या
तानदीसर्वरसाश्रया ॥ तदंभःपीतमात्रेणदिव्यदेहसमन्विताः ॥ ६९ ॥ देवतुल्याश्चरिष्यंतिप्राणिनः
सर्वएवहि ॥ द्वादशेद्वादशेवर्षेफाल्गुनेमासिसुव्रत ॥ ७० ॥ फल्गुनीषुद्विजश्रेष्ठतदादर्शनमेष्यति ॥
देवानांचऋषीणांचसिद्धानांचद्विजोत्तम ॥ ७१ ॥ नतांकृतघ्नाःपश्यंतिननृशंसानचनास्तिकाः ॥ तस्मि
न्कालेनरोयस्तुतास्मिन्स्नातिद्विजोत्तम ॥ ७२ ॥ सोमरत्वमवाप्नोतिसत्यंसत्यंमयोदितम् ॥ ७३ ॥
॥ इतिश्रीस्कांदेगोकर्णपुराणेएकोनत्रिंशोऽध्यायः ॥ २९ ॥ ॥ ॥ ॥ ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

॥ संवर्त्तकउवाच ॥ धर्मस्यचरितंब्रूहितस्यतीर्थस्यचप्रभो ॥ आश्रमस्यास्यपुण्यस्यानित्यस्यपरमे
ष्ठिनः ॥ १ ॥ नारदउवाच ॥ प्रजाःसिसृक्षतापूर्वंब्रह्मणापरमेष्ठिना ॥ सृष्टश्चभगवान्देवोमनसः
पद्मजन्मना ॥ २ ॥ चतुष्पादागवांधर्मोबभूवद्विजसत्तम ॥ शुद्धस्फटिकसंकाशःशुद्धबुद्धिसमुद्भवः
॥ ३ ॥ तस्मिन्जातेभगवतिब्रह्मालोकपितामहः ॥ भारार्त्तःपुरुषोयद्वदवरोप्यलघुर्भवेत् ॥ ४ ॥ तद्व
दासीज्जगत्स्रष्टासृष्ट्वाधर्मंसनातनम् ॥ सृष्टानिसर्वभूतानिब्रह्मणाब्राह्मणोत्तम ॥ ५ ॥ दधारधर्मोभग
वान्प्रजाःसर्वास्तदामुने ॥ प्रजयाधार्यतेधर्मःसततंसुखमिच्छता ॥ ६ ॥ धर्मोधातापिताचैवलोकानां
प्रभुरव्ययः ॥ तत्प्राप्तिमाहुर्धर्मज्ञाःसिद्धिंपावकनंदन ॥७॥ स्वर्गोनिर्वाणमपिचधर्माद्भवतिनान्यथा ॥
सृष्ट्वातंभगवान्ब्रह्माऋणमुक्तोबभूवह ॥ ८ ॥ सत्पुत्रेणपितायद्वदृणमुक्तोभविष्यति ॥ तथाधर्मेण
भगवान्ब्रह्मालोकपितामहः ॥ ९ ॥ प्रीत्यातमाहभगवन्मत्प्रजाःपरिपालय ॥ तथेत्युक्त्वाप्रण
म्याथधर्मोब्रह्माणमच्युत ॥ १० ॥ पितुराज्ञांपुरस्कृत्यपालयामासवैप्रजाः ॥ ततोविवादमभवद्देवा

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

न्तांत्रैपरस्परम् ॥ ११ ॥ अहंश्रेष्ठःशरीरेस्मिन्क्षेत्रज्ञोहमितिद्विज ॥ मयाविनाक्षेत्रमिदंमुहूर्तंनावतिष्ठते
॥ १२ ॥ एवंपरस्परंदेवास्तदूचुर्वन्हिनंदन ॥ तत्रसर्वेदेवगणास्त्यक्त्वास्वंस्वंकलेवरम् ॥ १३ ॥
वायुभूताश्चरंतिस्मतत्क्षेत्रंपूर्ववास्थितम् ॥ चंद्रमाधिष्ठितत्त्वाच्चनित्यत्वाच्चद्विजोत्तम ॥ १४ ॥ नना
शमगमत्सोपिशिशुमारःप्रजापतिः ॥ चंद्रमाःसर्वभूतानांश्रेष्ठइत्यवगम्यते ॥ १५ ॥ शरीरार्थंत
तःसर्वेस्वांस्वांयोनिमुपागमन् ॥ धर्मोपिभगवान्देवःस्वांयोनिंसमचिंतयत् ॥ १६ ॥ ज्ञात्वासूर्यं
विशेषाच्चवायुभूतःसनातनः ॥ तस्मिन्कालेसभगवान्विवस्वान्लोकभावनः ॥ १७ ॥ तपस्तेपेस
गोकर्णेसिद्धिकामःसुरोत्तमः ॥ संज्ञयासहविप्रेंद्रत्वष्टृपुत्र्यासमन्वितः ॥ १८ ॥ सौम्यमूर्त्तिधरोलिं
गंशांभवंस्थाप्यपूजयन् ॥ दिव्यवर्षसहस्रांतेभगवान्गोवृषध्वजः ॥ १९ ॥ प्रत्यक्षमगमत्तस्मिन्
लिंगेसूर्यस्यसत्तम ॥ तमाहदेवदेवेशोवरंब्रूहीतिसादरम् ॥ २० ॥ ततःप्रणम्यभगवानादित्यस्तप
तांवरः ॥ कृतांजलिपुटोभूत्वास्तोतुंसमुपचक्रमे ॥ २१ ॥ सूर्यउवाच ॥ विश्वमूर्त्तेनमस्तुभ्यंमूर्त्त

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

मूर्त्तिनमोस्तुते ॥ ज्ञानगम्यनमस्तेस्तुनमस्तेज्ञानदायिने ॥ २४ ॥ अध्यात्ममूर्त्तयेतुभ्यंलोकांतकन
मोस्तुते ॥ नमस्तेकालदहनविष्णुप्रियनमोस्तुते ॥ २५ ॥ पूष्णोदंतविनाशायभगनेत्रहरायच ॥
नमःकर्त्रेचभर्त्रेचहर्त्रेचहरयेनमः ॥ २६ ॥ नमःशिवायशांतायत्र्यंबकायनमोनमः ॥ त्रिशूलपाणये
तुभ्यंपूर्णानंदायतेनमः ॥२७ ॥ सामगम्यनमस्तेस्तुनमस्तेसर्वसाक्षिणे ॥ जयदेवजगन्नाथजयसर्वसु
रार्चित ॥२८॥ जयविष्णवादिनमितजयनित्यनिरंजन ॥शरणंभवभूतेशजन्ममृत्युभयापह ॥२९॥ परां
सिद्धिंप्रदिशमेनमस्तेसर्वरूपिणे ॥ इतिस्तुतःसभगवान्सूर्येणसुरनायकः ॥३०॥ प्रीतिमानाहसर्वज्ञः
शिवःसूर्यमिदंवचः ॥ सिद्धोसिवैस्वभावेनसिद्धिस्त्वय्येववर्त्तते ॥ ३१ ॥ तथापिमत्प्रसादेनसिद्धो
भवमहाद्युते ॥ त्वय्येवाहंसुरश्रेष्ठाविष्णुस्त्वय्येववर्त्तते ॥३२॥ त्वय्येवभगवान्ब्रह्मात्वयिसर्वंचराचरम्॥
येत्वांस्मरंतिद्युमणेतेपश्यंतिपरंपदम् ॥ ३३ ॥ तेजसासर्वभूतानांश्रेष्ठोभवसुरार्चित ॥ त्वयाकृत
मिदंतीर्थंलिंगंस्थानंग्रहाधिप ॥ ३४ ॥ श्रेष्ठंभवतुसर्वत्रमत्प्रसादाद्विभावसो ॥ इतितस्मैवरंदत्वा

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

लिंगेतस्मिन्व्यलीयत ॥ ३५ ॥ अदृश्यमानेदेवेशेसूर्यःसंज्ञामुपाविशत् ॥ धर्मस्तदासमुत्पन्नःसू
र्यात्तस्यांद्विजोत्तम ॥ ३६ ॥ तदेतद्दृश्यतेविप्रआश्रमंपुरतस्तव ॥ सूर्याश्रमामितिख्यातंक्षिप्रंसिद्धि
करंनृणाम् ॥ ३७॥ पुण्याश्रममितिख्यातंनृणांपुण्यविवर्धनम् ॥ उत्पाद्यधर्मंसूर्यश्चयथास्थानमगात्प्र
भुः ॥ ३८ ॥ धर्मोपितत्रभगवान्सूर्याश्रमसमीपतः ॥ कृत्वाश्रमपदंब्रह्मन्तपस्तेपेसुदुश्चरम् ॥३९॥
सिद्धिकामःपुराविप्रवर्षाणामयुतंप्रभुः ॥ तस्यतुष्टास्त्रयोदेवाब्रह्मविष्णुमहेश्वराः ॥ ४० ॥ प्रत्यक्षमग
मन्तस्यधर्मस्यमुनिपुंगव ॥ वरंब्रूहीतितंब्रह्माप्रथमंचाहपावके ॥ ४१ ॥ ततःप्रणम्यधर्मोपिपितामह
मुवाचह ॥ सिद्धिमिच्छामिभगवंस्तांमेदेहिजगद्गुरो ॥ ४२ ॥ परंज्ञानंचदेवेशवितरस्वपितामह ॥
तथास्त्वितिचतेनोक्तेविष्णुर्धर्ममुवाचह ॥ ४३ ॥ ग्रहाणमत्तोपिवरंमनसायद्यदिच्छसि ॥ ततःप्रणम्य
धर्मोपिवरंवव्रेद्विजोत्तम ॥४४॥ बलेनमत्तोदेवेशनकश्चिदधिकोभवेत् ॥ लोकपालत्वमपिचवरंदेहि
जनार्दन ॥४५॥ तथेतिविष्णुनाप्रोक्तेरुद्रोधर्ममुवाचह ॥ मत्तोपित्वंवरंदेवद्दणीष्वयदिमन्यसे ॥४६॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

इत्युक्तःशूलिनाधर्मःप्रणिपत्यमहेश्वरम् ॥ ममाश्रमेपुण्यतमेमच्छत्रुर्नभवेत्प्रभो ॥ ४७ ॥ अत्रस्थोय
स्त्यजेत्प्राणान्सोक्षयंस्वर्गमाप्नुयात् ॥ अत्रागत्यभजंतेत्वांतेषांपापंविनश्यतु ॥ ४८ ॥ सप्तजन्मा
र्जितंवापिवरमेतद्वृणोम्यहम् ॥ तथास्त्वितिचतंविप्रप्रोवाचभगवान्शिवः ॥४९॥ एवंलब्धवरःसोथ
कृतकृत्योबभूवह ॥ इतिदत्वावरंतस्मैब्रह्माविष्णुमहेश्वराः ॥ ५० ॥ तत्रैवांतर्दधुर्लिंगेधर्मस्यमुनिपुं
गव ॥ तत्रास्तेमुनिशार्दूलतीर्थंधर्मकृतंमहत् ॥ ५१ ॥ पापनाशनसंज्ञंतुपुण्यंदेवर्षिसेवितम् ॥ त
त्रस्नात्वानरोभक्त्याधर्मेशंपरिपूजयेत् ॥ ५२ ॥ जपेत्पंचाक्षरंमंत्रंसर्वपापैःप्रमुच्यते ॥ सूर्यतीर्थमिति
ख्यातमत्रैवद्विजसत्तम ॥ ५३ ॥ सर्वपापहरंपुण्यंसर्वकामफलप्रदम् ॥ तत्रस्नात्वानरोभक्त्याविराज
तियथारविः ॥ ५४ ॥ पापकंचुकमुत्सृज्यत्वचंजीर्णमिवोरगः ॥ गोसहस्रप्रदानस्यफलंचलभतेनरः॥
॥ ५५ ॥ एतत्पवित्रंपरमंद्विजोत्तमंसिद्धिप्रदंसर्वविपत्प्रमोचनम् ॥ सुरासुराद्यत्रमहानुभावाःस्ना
त्वाकृतार्थासुखिनोबभूवुः ॥ ५६ ॥ इतिश्रीस्कांदेगोकर्णपुराणेत्रिंशोऽध्यायः ॥ ३० ॥ नारदउ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

वाच ॥ सनत्कुमारोभगवान्तत्रसिद्धःसनातनः ॥ तपसामहताविप्रक्षेत्रेवैपावकात्मज ॥ १ ॥ संवर्तकउवाच ॥ कथंसभगवान्सितथःक्षेत्रेस्मिन्ब्रह्मनंदनः ॥ सनत्कुमारस्यकथांब्रूहिमेमुनिपुंगव ॥ ॥ २ ॥ नारदउवाच ॥ सनत्कुमारोभगवान्ब्रह्मणोमानसःसुतः ॥ कृत्वाश्रमंतपस्तेपेगोकर्णेमुनिपुंगवः ॥ ३ ॥ बद्धपद्मासनोमौनीनिराहारोवियद्व्रतः ॥ ध्यानमास्तेनिरालंबोवर्षाणामयुतंप्रभुः ॥ ४॥ अंतर्निरुध्यसर्वाणिनिरालंबोमहामनाः ॥ प्राणापानौचभगवान्व्यानोदानौचसत्तम ॥ ५ ॥ निरुध्यतान्समानेतुवायौवियतिसंस्थितः ॥ निरुध्यसर्वद्वाराणिविषयेभ्यःपरंतपः ॥ ६ ॥ परमार्थपरंब्रह्मशिवंशांतमकल्मषम् ॥ मध्येवेतिमहायोगीध्यात्वाब्रह्माद्वितीयकम् ॥ ७ ॥ योगैश्वर्यबलाद्ब्रह्मन्परंमनसिधिष्ठितम् ॥ तपतस्तस्यभगवान्नाविरासीत्सदाशिवः ॥ ८ ॥ पुरतोवृषभारूढोवरयेत्याहतंमुनिम् ॥ दृष्ट्वादेवमुमाकांतंशरण्यंभक्तवत्सलम् ॥ ९ ॥ प्रणम्यदंडवद्भूमौयोगीवाक्यमुवाचह ॥ यदितुष्टोसिदेवेशशाश्वतीसिद्धिरस्तुमे ॥ १० ॥ तमुवाचाथदेवेशःस्निग्धगंभीरयागिरा ॥ सिद्धोसिवैपूर्वमेवस्व

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

भावादेवसत्तम ॥ ११ ॥ तथापिमत्प्रसादेनसिद्धिस्तवभविष्यति ॥ ददामितवभूयोपिवरंवरयपुत्रक ॥ १२ ॥ तपसानियमेनाद्यतुष्टोस्मिनितरांमुने ॥ सनत्कुमारउवाच ॥ यदितुष्टोसिदेवेशवर मन्यद्ददासिचेत् ॥ इदंमयाकृतंलिंगंत्रैलोक्येतिलकंभवेत् ॥ १३ ॥ योगेश्वराभिधानेनस्पर्शना त्स्वर्गदंनृणाम् ॥ पापिनामपिसर्वेषांभवत्विहसुरेश्वर ॥१४॥ तच्छ्रुत्वावचनंशंभुर्योगींद्रस्याद्विजोत्तम ॥ तथास्त्वितिवरंदत्वालिंगेतस्मिन्व्यलीयत ॥ १५ ॥ नारदउवाच ॥ सनत्कुमारोभगवान्सिद्धिंप्रा प्यमहेश्वरात् ॥ ययौब्रह्मश्रियायुक्तोरोदसींदापयन्प्रभुः ॥ १६ ॥ सत्यलोकंप्रतितदायोगींद्रोत्दृष्टमान सः ॥ तदिदंदृश्यतेविप्रआश्रमंश्रमनाशनम् ॥ १७ ॥ आश्रमाच्चवराजेंद्रक्रोशमात्रेस्थितंमहत् ॥ लिं गंयोगेश्वरंनामस्पर्शनात्स्वर्गदंनृणाम् ॥ १८ ॥ स्पृश्यतत्सर्वभूतानिस्वर्गंगच्छंत्यहर्निशम् ॥ महा पातकयुक्ताश्चह्युपपातकिनस्तथा ॥ १९ ॥ तिर्यग्योनिगताश्चापिसर्वेचद्विजसत्तम ॥ पूर्णआसीद्देव लोकःप्राणिभिर्लोकवासिभिः ॥ २० ॥ नावकाशमभूद्विप्रद्देवानांभवनेतदा ॥ ततोदेवाःसमा

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

गम्यसर्वएवाद्विजोत्तम ॥ २१ ॥ ऊचुर्ब्रह्माणमागत्यऋषिभिःसहदेवताः ॥ भगवन्प्राणिनःसर्वे
दिवमायांत्यवारिताः ॥ २२ ॥ अधर्मज्ञाश्चपापिष्ठादिवंगत्वानिरामयाः ॥ अस्मानुच्चाटयंत्यस्मा
द्बहुत्वात्सुरसत्तम ॥ २३ ॥ अधर्मज्ञैर्बलोद्रिक्तैःसंपूर्णभवनंहिनः ॥ नविघ्नकारणंदेवविपरीतंप्रवर्त्त
ते ॥ २४ ॥ इत्युक्तस्तैरिदंब्रह्मातानाहाद्विजसत्तम ॥ लिंगंयोगेश्वरंनामगोकर्णेस्थापितंसुराः ॥
॥ २५ ॥ मत्पुत्रेणमहाभागास्तपसामहताबलात् ॥ तस्मिन्लिंगेशिवःसाक्षाद्रमतेप्रिययासदा
॥ २६ ॥ स्पर्शासिद्धिकरंनृणांतल्लिंगंसुरसत्तमाः ॥ स्पृष्ट्वायांतीहभूतानिसर्वाणिविबुधेश्वराः ॥ २७ ॥
तस्माद्गच्छतदेवेशंविष्णुंत्रिभुवनेश्वरम् ॥ प्रसादयध्वंविबुधाःसवःकार्यंकरिष्यति ॥ २८ ॥ तच्छ्रुत्वा
सहितास्तेनविष्णुंजग्मुर्दिवौकसः ॥ क्षीराब्धेरुत्तरंतीरंऋषिसंघैःसमावृतम् ॥ २९ ॥ तत्राराध्यजगन्ना
थंतपसामहतासुराः ॥ प्रत्यक्षीकृत्यविष्णुंतेइदंवचनमब्रुवन् ॥ ३० ॥ त्राह्यस्मान्देवदेवेशशंखच
क्रगदाधर ॥ येभूताभूतलगताजंगमाधरणीधर ॥ ३१ ॥ स्थावराश्चजगन्नाथदिवमायांत्यवारिताः ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

अहर्निशंदेवदेवस्पृष्ट्वायोगेश्वरंशिवम् ॥ ३२ ॥ सर्वदेवमयंलिंगंगोकर्णेतीर्थसत्तमे ॥ सनत्कुमारेण विभोस्थापितंकमलापते ॥ ३३ ॥ संस्पृष्ट्वाप्राणिनःसर्वेशशरीरादिवंगताः ॥ तैर्वयंभगवन्सर्वेबाधिताःस्मजगत्पते ॥ ३४ ॥ अमार्गगैर्दुराचारैर्हतानस्मान्समुद्धर ॥ ततस्तानाहभगवान्चक्रपाणिःसुरोत्तमः ॥ ३५ ॥ गच्छध्वंसहितादेवायथास्थानंयथासुखम् ॥ छेत्स्यियोगेश्वरंलिंगंचक्रेणसुरसत्तमाः ॥ ३६ ॥ इत्युक्त्वातान्जगन्नाथश्चक्रंसंतोद्यपाणिना ॥ मुमोचलिंगमुद्दिश्यदेवदेवःसुदर्शनम् ॥ ॥ ३७ ॥ सर्वायुधमहामात्रंविष्णुचक्रसुदर्शनम् ॥ द्वादशादित्यसदृशंजज्वलंस्वेनतेजसा ॥ ३८ ॥ गोकर्णप्रतिगच्छंतंदृष्ट्वाजर्हृषिरेसुराः ॥ समागत्याद्द्विधाचक्रेविष्णुचक्रंसुदर्शनम् ॥ ३९ ॥ अधोभागस्थितंभूमौचक्रोपरितथापरम् ॥ मग्नमासीद्द्विजश्रेष्ठभारेणमहतातदा ॥ ४० ॥ तद्भारपीडितंचक्रंममज्जतुरसातले ॥ ततोदेवाःसगंधर्वाऋषयश्चतपोधनाः ॥ ४१ ॥ विष्णुनासहिताःसर्वेगोकर्णसमुपागमन् ॥ रुद्रमाराधयामासुश्चक्रार्थंत्रिदिवौकसः ॥ ४२ ॥ तेषांप्रसन्नश्चैवासीद्भग

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

वान्वृषभध्वजः ॥ अवतारयामासविभुस्तद्भागंभवभंगकृत् ॥ ४३ ॥ ततोवतार्यतद्भागंपाताले
सन्यवेशयत् ॥ पूजितंनागकन्याभिर्नागैश्चापिद्विजोत्तम ॥ ४४ ॥ ततस्तस्मात्पुनश्चक्रमुत्ततारद्वि
जोत्तम ॥ तच्चक्रतीर्थंविख्यातंसर्वपापप्रणाशनम् ॥ ४५ ॥ स्नातानांतत्रविप्रेंद्रतीर्थेचक्रस्यपुण्य
दे ॥ राजसूयाश्वमेधाभ्यांफलंभवतिनिश्चितम् ॥ ४६ ॥ योगैश्वर्यमवाप्याशुब्रह्मज्ञानंसविंदति ॥
तदारभ्यतुतल्लिंगंपुण्यंयोगेश्वरंद्विज ॥ ४७ ॥ चक्रेणखंडितत्वाच्चचक्रखंडेश्वराभिधम् ॥ ख्यातंवभू
वंलोकेषुसर्वेषुद्विजसत्तम ॥ ४८ ॥ इतिश्रीस्कांदेगोकर्णपुराणेएकत्रिंशोऽध्यायः ॥ ३१ ॥ ॥
सूतउवाच ॥ इत्युक्त्वानारदोराजन्पुनःसंवर्त्तमब्रवीत् ॥ किमिच्छसिमहाभागतद्ब्रूहिवितरामिते ॥
॥ १ ॥ अमोघंदर्शनंविद्धिमदीयंब्राह्मणोत्तम ॥ अशक्यंनास्तिहिममदातुंदेवत्वमप्युत ॥ २ ॥ संवर्त
कउवाच ॥ सनत्कुमारोभगवान्यथासिद्धःसनातनः ॥ तथासिद्धिर्भवतुमेप्रसादात्तवसुव्रत ॥ ३ ॥
व्यापीयंममदेवर्षेतीर्थेषुप्रवराभवेत् ॥ आश्रमंचममब्रह्मन्लिंगंचेदंद्विजोत्तम ॥ ४ ॥ नारदउवा

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

॥ ॥ ॥ ॥ ॥ ॥ ॥

त्वारिंशोऽध्यायः ॥ ४५ ॥ ॥ छ ॥ पालयन्नपिभूलोकंनिर्वेदमगमद्वशी
॥ सूतउवाच ॥ भगीरथस्तदाराजन्पालयामासमेदिनीम् ॥ स्वर्गप्राप्तिंचभद्रंतेश्रुत्वादुःखमुपेयिवान् ॥२॥ अमा
॥१॥ श्रुत्वापितॄणांपतनंकपिलाग्नौनृपोत्तम ॥ तपसेकृतसंकल्पोहिमवच्छिखरंययौ ॥ ३ ॥ तत्रगत्वातपस्तेपे
त्यप्रवरेराज्यंनिधायेक्ष्वाकुनंदनः ॥ सहस्रवर्षपर्यंतंपितामहमपूजयत् ॥ ४ ॥ ततस्तुष्टोजगत्स्रष्टावरंब्रूहीत्यभा
निराहारोनृपोत्तम ॥ गंगामानीयदेवेशतर्पयित्वापितॄन्मम ॥ दश
षत ॥ सतच्छ्रुत्वावरंवव्रेयथातच्छृणुपार्थिव ॥ ५ ॥ ततोमरिष्येभगवन्देहिमह्यंवरंयथा ॥ तथास्त्वितिसमु
वर्षसहस्राणिराज्यंकृत्वापितामह ॥ ६ ॥ साधयस्वमहत्कार्यमित्युक्त्वांतरधीयत ॥ ततोवर्षसहस्राणि
क्त्वातुआयुर्दत्वापितामहः ॥ ७ ॥ पंचाग्निमध्यगोभूत्वावाय्वंबुकृतभोजनः ॥ ततस्तुष्टातदागंगाप्रत्य
गंगामाराधयत्प्रभुः ॥ ८ ॥ तदाभिवांछितंराजन्ब्रूहितत्तेददाम्यहम् ॥ ततोवव्रेवतरणंसतस्याराजसत्त
क्षीभूयचाब्रवीत् ॥ ९ ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

मः ॥ १० ॥ तथास्त्विति तमुक्त्वा सा पुनर्वचनमब्रवीत् ॥ पतंत्या मम राजेंद्र न वोढा वेगमास्ति वै ॥११॥
ऋते रुद्रान्महादेवान्मां वोढुं कोपि नास्ति हि ॥ यदा प्रसन्नो भवति रुद्रस्तव नृपोत्तम ॥ १२ ॥ तदास्मत्तं
ऽयमित्युक्त्वा तत्रैवांतर्दधे सती ॥ ततो भगीरथो राजा कैलासं गिरिमाश्रितः ॥ १३ ॥ पूजयामास च पु
नारुद्रं त्रिभुवनेश्वरम् ॥ सहस्रवर्षं राजेंद्र शतमन्यच्च कौरव ॥ १४ ॥ ततस्तुष्टो जगन्नाथः प्रत्यक्षीभूय
तं नृपम् ॥ वरं ब्रूहि महाराज दातास्मि तव शत्रुहन् ॥ १५ ॥ ततः प्रणम्य शिरसा सर्वलोकेश्वरं हरम् ॥
भगीरथो महाराज कृतांजलिरभाषत ॥ १६ ॥ गंगा त्रिपथगा देव त्रिदिवात्संपतिष्यति ॥ तां धारय म
हादेव शिरसा भूतभावन ॥ १७ ॥ त्वरते न हि सोढास्ति त्रिषु लोकेषु कश्चन ॥ तथास्त्विति स राजानमु
क्त्वा देवो महेश्वरः ॥१८॥ मेरुं गिरिवरं गत्वा स्थितः शैल इवापरः ॥ स्थितं दृष्ट्वा शूलपाणिं सस्मार आकाश
गां नृपः ॥ १९ ॥ तस्य सा चिंतितं ज्ञात्वा स्थितं दृष्ट्वा ह्युमापतिम् ॥ दिवः पपात राजेंद्र मूर्ध्नि शंभोर्महात्म
नः ॥ २० ॥ महावेगा पुण्यजला देवगंधर्वसेविता ॥ मीनग्राहवती देवी स्मृतमात्राघनाशिनी ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

सब्रह्मकाःसुराःसर्वेविस्मयाद्ददृशुर्नृप ॥ २२ ॥
॥ २१ ॥ मूर्ध्निदेवपतेर्गंगामालामुक्तामयीविहि ॥ पुनःप्रसादयामासनी
ललाटदेशंसंप्राप्यदेवदेवस्यभामिनी ॥ बभ्रामतत्रतत्रैवजटामुकुटमंडले॥ २३॥
लग्रीवंभगीरथः ॥ ततःपुनर्हैमवतीमेरुपृष्ठेपतन्नृप ॥ २४॥ ततोविभज्यचात्मानंचतुर्धाह्यौघहारिणी ॥
पूर्वेणगत्वाभद्राश्वंदक्षिणेनचभारतम् ॥ २५ ॥ पश्चिमेकेतुमालंचउत्तरेचोत्तरान्कुरून् ॥ गत्वाज
गामजलधिंपूरयामासतत्क्षणात् ॥ २६ ॥ मेरुपृष्ठंसमासाद्यगंगाराजानमब्रवीत् ॥ मार्गंदर्शयराजेंद्र
यत्कृतेनीयसेदिवः ॥ २७ ॥ ततस्तथेतितामुक्त्वादाक्षिणांप्रास्थितोनृप ॥ वर्षान्सीमाचलांश्चैवअ
तिक्रम्यसुरापगा ॥ २८ ॥ हिमवंतमनुप्राप्यतेनसार्धंमहानदी ॥ जह्नोराश्रममासाद्यराजातमृ
षिमब्रवीत् ॥ २९ ॥ उत्तिष्ठोत्तिष्ठविप्रर्षेअपगच्छइतःप्रभो ॥ गंगाचायातिवेगेनमार्गेणानेनसुव्र
त ॥ ३० ॥ वेगेनाकर्षतेदेवीमार्गेशैलशिलातलान् ॥ सवृक्षगुल्मांस्तस्मात्त्वंदूरंगच्छमहामते ॥३१॥
ततोतिवयसावृद्धोजन्हुराहनृपंतदा ॥ वृद्धोहंराजशार्दूलनशक्नोम्यपसर्पितुम् ॥ ३२ ॥ यद्यावि

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तद्भवेद्राजन्नित्युक्त्वाचासतत्रवै ॥ ततःससारतंदेशंगंगात्रिपथगाप्रभो ॥ ३३ ॥ तांदृष्ट्वासमुनिश्रे
ष्ठोगंडूषमकरोत्तदा ॥ तथाप्रभावंतत्तोयंतस्यगंडूषतांगतम् ॥ ३४ ॥ अदृश्यंतत्क्षणेनैवतदद्भुतामि
वाभवत् ॥ पीत्वातदंभःसमुनीराजानंप्रत्यभाषत ॥ ३५ ॥ क्वतेगंगामहाभागमहावेगप्रवाहिनी
॥ इतितद्वचनंश्रुत्वाराजाराजीवलोचनः ॥ ३६ ॥ विस्मयोत्फुल्लनयनःक्षमस्वेतिपपातह ॥ पाद
योस्तस्यराजेंद्रमहर्षेर्भावितात्मनः ॥ ३७ ॥ मौनव्रतधरःसोथवर्षाणामयुतंगतः ॥ तावच्छुश्रूषण
परस्तत्रैवास्तेभगीरथः ॥ ३८ ॥ अतीतेशतवर्षेतुजन्हूराजानमब्रवीत् ॥ गच्छराजन्यथाकामंगंग
याचानयासह ॥ ३९ ॥ दास्यामीतितमुक्त्वाथमोचयामासजान्हवीम् ॥ मुखतस्तस्यविप्रस्यनिष्क्र
म्यसुरनंदिनी ॥ ४० ॥ जन्हुकन्याजगन्नाथपुनस्तमनुपार्थिवम् ॥ यत्रतेसागरादग्धाकपिलाग्नौपु
रान्नृप ॥४१॥ तत्रगत्वामहाभागाप्लावयित्वातुसागरान् ॥ सम्यकसापूरयामाससमुद्रंभरतर्षभ ॥४२॥
पूर्यमाणेसमुद्रेतुतत्तोयांतर्हितंह्यभूत् ॥ गोकर्णकुरुशार्दूलसहस्रपरिवत्सरम् ॥ ४३ ॥ उदकस्थमभू

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

च ॥ सिद्धिर्भवतुतेविप्रमत्प्रसादान्महामते ॥ सनत्कुमारोभगवान्यथासिद्धिमुपागतः ॥ ५ ॥ सं
वर्त्तकमहाबुद्धेतथाभवतुतेध्रुवम् ॥ वापीत्त्वतवभद्रंतेत्वन्नाम्नाख्यातिमेतुवै ॥ ६ ॥ संवर्त्तकस्य
वापीतितीर्थेषुप्रवराभवेत् ॥ सप्तजन्मकृतंपापंअल्पंवायदिवाबहु ॥ ७ ॥ तत्सर्वंस्नानमात्रेणना
शंयातुनृणांमुने ॥ सहस्रकपिलानांचगवांदानेनयत्फलम् ॥ ८ ॥ तत्फलंकोटिगुणितंभवत्विहनृणां
मुने ॥ संवर्तकाश्रममितिआश्रमंख्यातिमेतुच ॥ ९ ॥ पुण्यंभवतुसर्वत्रत्रिषुलोकेषुसुव्रत ॥ अ
त्रदत्तंकृतंवापिएकंकोटिर्भविष्यति ॥ १० ॥ लिंगंचतवविप्रेंद्रसंवर्त्तेश्वरसंज्ञया ॥ ख्यातंभवतुत्रैलो
क्येक्षिप्रंसिद्धिप्रदंनृणाम् ॥ ११ ॥ फाल्गुनेमासिविप्रेंद्रसिद्धस्त्वंफल्गुनीषुच ॥ तस्मात्सएवादिवस
स्तवतीर्थस्यसेवने ॥ १२ ॥ श्रेष्ठोभवतुविप्रेंद्रस्नानदानादिकर्मणि ॥ अत्रागत्यनरोयस्तुतस्मिन्काले
द्विजोत्तम ॥ १३ ॥ स्नानंवापिजलंवापिदानंवायजनंतुवा ॥ करोतितत्कोटिगुणंमत्प्रसादाद्भवे
त्ध्रुवम् ॥ १४ ॥ सूतउवाच ॥ इत्युक्त्वानारदोराजन्देवलोकमगात्प्रभुः ॥ संवर्त्तकोपिभगवान्नासि

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

द्वस्तस्मिन्द्विजोत्तम ॥ १५ ॥ स्वर्गलोकमगात्क्षिप्रंयोगैश्वर्यसमन्वितः ॥ नारदोभगवान्गत्वा
समाजंत्रिदिवौकसाम् ॥ १६ ॥ कथामकथयत्तेषांगोकर्णाधिकृतांनृप ॥ अटित्वासर्वतीर्थानिपु
राहंराजसत्तम ॥ १७ ॥ गोकर्णमगमंपश्चात्तस्मिन्मासत्रयंस्थितः ॥ तत्रास्थितेषुतीर्थेषुस्नानंकृत्वा
विधानतः ॥ १८ ॥ संवर्त्तकंमुनिंदृष्ट्वासर्वांश्चमुनिसत्तमान् ॥ स्थित्वाक्षेत्रेनृपवरमाघांतेपुनराग
तः ॥ १९ ॥ मासमेकंनृपश्रेष्ठगोकर्णेयोवसेन्नरः ॥ तीर्थसेवीजितक्रोधोमौनव्रतपरायणः ॥ २० ॥
नियमेनविशेषेणतस्यपुण्यफलंशृणु ॥ जन्मायुतैःकृतंपापंनश्यत्येवनसंशयः ॥ २१ ॥ परत्रचपरां
सिद्धिंसप्राप्नोतिद्विजोत्तम ॥ तच्छ्रुत्वातत्रवसतिंकृतवान्नृषिभिःसह ॥ २२ ॥ तेषांकथाविचित्रार्थाः
श्रुताःश्रुतिमनोहराः ॥ व्यासपुत्रःशुकस्तत्रतपस्यतिमहामनाः ॥ २३ ॥ बहवस्तत्रमुनयःकृत्वाश्र
मपदंशुभम् ॥ तपोवनेपुण्यतमेतपःकुर्वंतिनित्यशः ॥ २४ ॥ आश्रमेषुचसर्वेषुमुनीनांभावितात्म
नाम् ॥ एकैकरात्रंराजेंद्रतत्रतत्रास्थितंमया ॥ २५ ॥ तत्रासन्यानिलिंगानितेषांपूजाकृतामया ॥ स

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

माप्यनियमंतास्मिन्त्रैमासिकमरिंदम ॥ २६ ॥ अभिनंद्यमुनीन्सर्वाननुज्ञाप्यचशंकरम् ॥ तस्मात्
क्षेत्रवराद्राजन्नागतोहंतवांतिकम् ॥ २७ ॥ भवंतंकृतसन्यासंद्रष्टुकामःस्मरन्प्रभो ॥ शौनकादीन्नृप
श्रेष्ठकिमन्यच्छ्रोतुमिच्छसि ॥ २८ ॥ शौनकउवाच ॥ केनपृष्टस्तुदेवर्षिर्कथामकथयाद्दिवि ॥ गो
कर्णाधिकृतांसूतकिंतद्वदममानघ ॥ २९ ॥ भूयोपिमेमहाप्राज्ञतत्क्षेत्रस्यमहामते ॥ माहात्म्यंक
थ्यतांसूतश्रोतुमिच्छाप्रवर्त्तते ॥ ३० ॥ तत्रस्थितानांतीर्थानामाश्रमाणांचकृत्स्नशः ॥ देवतायत
नानांचविस्तरेणवदस्वनः ॥ ३१ ॥ महिमानंऋषीणांचसंस्थानंभुवनस्यच ॥ पूर्वमुक्तंत्वयासूतअ
स्माकंक्षेत्रविस्तरम् ॥ ३२ ॥ सृष्टेराद्यमिदंक्षेत्रंतत्कथंसूतनंदन ॥ यथानिःसंशयंसूतभवेन्ममतथाव
द ॥ ३३ ॥ शौनकेनैवमुक्तस्तुसूतःपौराणिकोत्तमः ॥ कथामकथयद्दिव्यांगोकर्णाधिकृतांद्विज ॥
॥ ३४ ॥सूतउवाच ॥ शृणुशौनकवक्ष्यामिनृपेणऋषिभिःसह ॥ पुराब्जयोनिनासृष्टंगोकर्णंद्विजस
त्तम ॥ ३५ ॥ यत्रसाप्रकृतीराजन्रमतेपुरुषेणाहि ॥ क्षेत्रंतत्परमंप्रोक्तंनात्रकार्याविचारणा ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

॥ ३६ ॥ तत्रस्थितेशःक्षेत्रज्ञइतिवेदविदोविदुः ॥ यइदंपठतेनित्यंशृणोतिश्रद्धयानरः ॥ सर्वपाप
विनिर्मुक्तःशिवलोकेमहीयते ॥ ३७ ॥ इतिश्रीस्कांदेगोकर्णपुराणेद्वात्रिंशोऽध्यायः ॥ ३२ ॥ ॥
॥ सूतउवाच ॥ गोकर्णान्नारदोराजन्ययौकैलासपर्वतम् ॥ दृष्ट्वातत्रमहेशानंनत्वास्तुत्वाजगद्गुरुम् ॥
॥ १ ॥ स्थित्वातत्रमुहूर्त्तंतुशंभोराज्ञांप्रगृह्यच ॥ त्रिविष्टपंततोगंतुंप्रस्थितोभरतर्षभ ॥ २ ॥ एत
स्मिन्नंतरेसामगानंश्रुत्वाततोमुनिः ॥ दिशोविलोकयामासपरितःकुरुसत्तम ॥ ३ ॥ नृत्यंतंदृष्टवान्तत्र
दशास्यंनारदोसुरम् ॥ एवंलंकाधिपोराजन्धृत्वाकरतलेमुदा ॥ ४ ॥ वादयन्स्वकराग्रैस्तुगानैःसा
मसमुद्भवैः ॥ एतादृशंकुरुश्रेष्ठरावणंराक्षसाधिपम् ॥ ५ ॥ शिवस्यनिकटेदृष्ट्वाज्ञात्वातस्यमनोगतम् ॥
विस्मयंपरमंगत्वानारदोभरतर्षभ ॥ ६ ॥ ततःकैलासशिखराज्जगामत्रिदशालयम् ॥ सकाशंदेवरा
जस्यत्रैलोक्याटनतत्परः ॥ ७ ॥ दूरादायांतमालोक्यनारदंदेवराट्तदा ॥ अभ्युत्थायासनंदत्वानारदा
यमहात्मने ॥ ८ ॥ पूजयामासदेवेंद्रोअर्घ्यपाद्यादिभिर्नृप ॥ देवैःसमंमुनिश्रेष्ठंमुदापरमयायुतः ॥९॥

॥ ९० ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

नारदोपिकुरुश्रेष्ठआशीर्भिरभिनंद्यतम् ॥ उपविष्टस्ततस्तस्यांसभायांमुनिसत्तमः ॥ १० ॥ वासवो
थमुनिंदृष्ट्वाविश्रांतंभरतर्षभ ॥ तमुवाचततःशक्रःकुतआगम्यतेद्विज ॥ ११ ॥ अवारितागतिस्त्वं
हिसर्वलोकेषुसत्तम ॥ किमाश्चर्यत्वयादृष्टंतत्सर्वंवदमेमुने ॥ १२ ॥ सूतउवाच ॥ इत्युक्तोदेवराजे
ननारदःप्रत्युवाचह ॥ गोकर्णादागतंविद्धिइदानींसुरसत्तम ॥ १३ ॥ अटित्वासर्वलोकांश्चभवंतं
द्रष्टुमागतः ॥ आगच्छतामयादृष्टःपथिरक्षोगणाधिपः ॥ १४ ॥ कैलासशिखरेरम्येतपश्चरतिरावणः॥
मृगशृंगंनेतुकामःशृंगंयुष्माभिरर्चितम् ॥ १५ ॥ तपसामहतादेवसामगानेननर्तनैः ॥ वीणास्वने
नगिरिशंसंतोष्यात्रिदिवेश्वर ॥ १६ ॥ लब्ध्वाशंभोःसकाशात्तुलिंगंनेष्यतिरावणः ॥ लिंगेनीतेरा
वणेनलंकांप्रतिसुरेश्वर ॥ १७ ॥ नष्टैश्वर्याभविष्यंतिविबुधाःऋषिभिःसह ॥ तस्माद्यलंकुरुष्वाद्य
विघ्नार्थंरावणस्यहि ॥ १८ ॥ यथानदीयतेशंभुलिंगंयत्नंतथाकुरु ॥ इत्युक्त्वानारदस्तस्माद्ब्रह्मलोकम
गान्मुनिः ॥ १९ ॥ गतेतुनारदेशक्रोबृहस्पतिमुवाचह ॥ मृगशृंगमितिख्यातंकिंतद्वद बृहस्पते

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

॥ २० ॥ कथंतल्लिंगमभवद्देवैःसंपूजितंकुतः ॥ तमाहांगिरसोराजन्नजानेतस्यसंभवम् ॥ २१ ॥ का
श्यपोवेत्तितत्सर्वंपितातवसुरेश्वर ॥ तत्रगच्छावभद्रंतेसचसर्ववदिष्यति ॥ २२ ॥ इत्युक्तोगुरु
णाशक्रोजगामपितरंतदा ॥ काश्यपंमुनिशार्दूलंगुरुणासहभारत ॥ २३ ॥ पितरंसर्वदेवानांनना
मेदमुवाचतम् ॥ मृगशृंगस्यमेतातसंभवंवक्तुमर्हसि ॥ माहात्म्यंतस्यकथयलिंगस्यमुनिसत्तम ॥२४
कश्यपउवाच ॥ शृणुपुत्रपरंगुह्यंमृगशृंगस्यसंभवम् ॥ पातालस्थःपुरारुद्रस्तपस्तीव्रमतप्यत ॥ २५
स्रष्टुकामःप्रजाःशक्रसात्विकेनपिनाकधृक् ॥ तस्मिन्तथावर्तमानेसृष्टालोकाःस्वयंभुवा ॥ २६ ॥
त्रिभिर्गुणैःसुरश्रेष्ठप्रजाःसर्वाश्चतुर्विधाः ॥ ततश्चुकोपभगवान्तेषांदृष्ट्वासमुद्भवम् ॥ २७ ॥ सत्वमा
दायसर्वेषांभूतानांभुवनाधिपः ॥ पिंडीकृत्वातुतत्सत्वंदेवदेवोमहेश्वरः ॥ २८ ॥ अणुमात्रेषुभूते ॥ ९१ ॥
षुयत्सत्वंपरिवर्त्तते ॥ तदादायसुरश्रेष्ठोनिर्ममेमृगमुत्तमम् ॥ २९ ॥ तंनजानंतिदेवेंद्रब्रह्माद्यादेवताग
णाः ॥ ऋतेनारायणाद्देवात्सत्वभूताज्जनार्दनात् ॥ ३० ॥ तन्मृगेणजगत्स्वामीसहकैलासमास्थितः ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ततःप्रजाःप्रजापालोसर्वैसत्वाविवर्जिताः ॥ ३१ ॥ समाह्यासन्सुरश्रेष्ठनोत्तमाधममध्यमाः ॥ तत्का
रणमविज्ञायऋषयोदेवतागणाः ॥३२॥ गत्वासर्वेंब्रह्मलोकंतत्रदृष्ट्वाप्रजापतिम् ॥ नत्वास्तुत्वाजगन्नाथं
सद्वृत्तांतमथाब्रुवन् ॥ ३३ ॥ तच्छ्रुत्वावचनंतेषांब्रह्मालोकपितामहः ॥ सर्वेशृणुतमद्वाक्यंसत्वहीनो
स्म्यहंसुराः ॥ ३४ ॥ नारायणोजगद्योनिःपरात्परतरोव्ययः ॥ सवेत्तिसर्ववृत्तांतंतस्माद्यास्यामतं
सुराः ॥ ३५ ॥ इत्युक्त्वाजगतान्नाथःसर्वैर्देवर्षिभिःसह ॥ क्षीरोदशय्याशयनंशंखचक्रगदाधरम्
॥ ३६ ॥ गत्वाप्रणेमुःसहिताब्रह्माद्याश्चसुरासुराः ॥ प्रणम्यश्रीधरंभक्त्याइदमूचुस्तदाहरिम् ॥ ३७॥
हरेवयंसत्वहीनाःसर्वेस्थावरजंगमाः ॥ नविघ्नकारणंचात्रयथापूर्वंकुरुष्वनः ॥३८॥ लोकेपूज्याभविष्या
मःसत्वाद्यास्त्वदनुग्रहात् ॥ सतेषांवचनंश्रुत्वाजातकारुण्यमब्रवीत् ॥ ३९ ॥ ॥ विष्णुरुवाच ॥
सत्वंहृतंवोरुद्रेणकुपितेनादिवौकसः ॥ सत्वेनभगवान्रुद्रोम्हृगंदिव्यंविनिर्ममे ॥ ४० ॥ सम्हृगेण
महादेवःकैलासेवर्त्ततेधुना ॥ तंगत्वाविबुधश्रेष्ठागृह्णीध्वंसत्वमात्मनाम् ॥ ४१ ॥ तपसाशंकरंतो

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ष्यभविष्यध्वंनिरामयाः ॥ ददातिरुद्रःसंतुष्टोयुष्मत्सत्त्वंनचान्यथा ॥ ४२ ॥ इतितद्वचनंश्रुत्वादे
वाविष्णुसमान्विताः ॥ कैलासमगमन्सर्वेद्रष्टुंदेवंमहेश्वरम् ॥ ४३ ॥ गत्वातेतपसारुद्रंभक्त्याचाराध
यन्सदा ॥ तेषांतुष्टोमहादेवोभक्त्याचनियमेनच ॥ ४४ ॥ प्रत्यक्षत्वमगाच्छंभुर्देवान्प्राहशचीप
ते ॥ तुष्टोस्मितपसात्यंतंयुष्माकंदेवतागणाः ॥ ४५ यथाचित्तेभिलषितंवरंब्रूततथापरम् ॥ देवा
ऊचुः ॥ सत्वहीनावयंशंभोह्यस्मत्सत्वंचदेहिनः ॥ तच्छ्रुत्वावचनंशंभुस्तेषांसत्वमदात्तदा ॥ ४६ ॥
यत्कृतंसत्वरूपंतुतंमृगंचददौशिवः ॥ गृहीत्वाचात्मनोभागंसर्वतेभ्यःप्रदत्तवान् ॥ ४७ ॥ हिमाद्रौ
निर्मितःपूर्वसर्वसत्वमयोमृगः ॥ अत्यद्भुतोमहेशेनकुपितेनसुरेश्वर ॥ ४८ ॥ मृगःसकांचनोदि
व्योवज्रस्फटिकमौक्तिकैः ॥ समन्वितोदेवराजसर्वलक्षणलक्षितः ॥ ४९ चतुष्पादस्त्रिनेत्रश्चत्रि
शृंगश्चारुदर्शनः ॥ तस्यैकशृंगेभगवान्ब्रह्मालोकपितामहः ॥ ५० ॥ वामंचवैष्णवंप्राहुर्मध्यमंशै
वमुच्यते ॥ एतादृशंसत्वभूतंमृगंप्राप्यमहेश्वरात् ॥ ५१ देवासुरनराःसर्वेमुदिताश्चाभवन्तदा ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

खंडयित्वामृगंसर्वैर्गृहीतंसत्वमात्मनाम् ॥ ५२ ॥ स्वशृंगंब्रह्मणातातगृहीतंविष्णुनास्वकम् ॥ रुद्रे
णचस्वशृंगंतुपूजांचक्रुःसुरेश्वराः ॥ ५३ ॥ कैलासेपूजयन्नास्तेस्वशृंगंपरमेश्वरः ॥ यस्ययस्यय
दिष्टंस्यात्तत्तत्प्राप्नोतिपूजकः ॥ ५४ ॥ तस्यमांसंहृतमभूद्यदाविद्याधरैःप्रभो ॥ मेदस्तस्यगृही
तश्चअप्सरोभिःसुरेश्वर ॥ ५५ ॥ चर्मनागैर्गृहीतंचरक्षोभिश्चास्थिसंचयम् ॥ शक्षसैश्चतथारक्तंभूम्या
शुक्लंसमाहृतम् ॥ ५६ ॥ खगैःपित्तंकफंदेवैर्वातंवैयातुधानकैः ॥ पिशाचैश्चहृतंमूत्रंपुरीषंपशुभिर्हृ
तम् ॥ ५७ ॥ रोमाणिऋषयोगृह्णन्मज्जामर्त्यैर्हृताह्यभूत् ॥ एवंसर्वाणिचांगानिगृहीतानिसुरादिभिः
॥ ५८ ॥ उत्तमाधममध्यानिउत्तमाधममध्यमैः ॥ एवमंगानिचादायसत्ववंतोबभूविरे ॥ ५९ ॥
सूतउवाच ॥ पुराविवादोह्यभवत्त्रैलोक्यार्थंसुरासुरैः ॥ देवान्दैत्यापराजित्ययुद्धेतिबलिनःप्रभो
॥ ६० ॥ अपहृत्यसुरैश्वर्यंबुभुजुर्विषयान्प्रियान् ॥ तदादेवैःशिवंप्रार्थ्यलब्ध्वालिंगंमहेश्वरा
त् ॥ ६१ ॥ आराध्यचासुरान्जित्वाह्यैश्वर्यंचपुनःसुराः ॥ अवापुःपूजनात्तस्यलिंगंतस्मैपुनर्ददुः

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

॥ ६२ ॥ तस्मात्तदेवलिंगंतुदेवैःसंपूजितंपुरा ॥ यस्मिन्वसातिताल्लिंगंतास्मिन्वैविजयोध्रुवम् ॥ ए
वंभूतंतुताल्लिंगंयत्पृष्टंकथितंतुवाम् ॥ ६३ ॥ इतिश्रीस्कांदेगोकर्णपुराणेत्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥
॥ सूतउवाच तस्यतद्वचनंश्रुत्वादेवराजबृहस्पती ॥ शिरसाकाश्यपंनत्वाजग्मतुस्तौमुदान्वितौ ॥
॥ १ ॥ मेरुपृष्ठेसुरश्रेष्ठःसुरानाज्ञापयत्तदा ॥ इंद्रउवाच ॥ देवाःशृणुतमद्वाक्यंकैलासंगच्छताधुना ॥
मृगशृंगंनेतुकामोलंकेशस्तत्रतप्स्यति ॥ २ ॥ तद्विघ्नंकुरुतक्षिप्रंतच्छ्रुत्वात्रिदिवौकसः ॥ सगणाःसब
लाराजन्जग्मुःकैलासमंजसा ॥ ३ ॥ इंद्रेणसहराजेंद्रनापश्यन्तत्ररावणम् ॥ एतस्मिन्नंतरेपूर्वंरावणोराक्ष
साधिपः ॥ ४ ॥ महतासामगानेननृत्तेनविविधेनच ॥ तपसानियमैर्नैवघोरेणभरतर्षभ ॥ ५ ॥ तो
षयित्वामहेशानंस्तुत्वातांविविधैःस्तवैः ॥ इदमाहदशग्रीवोभक्तिनम्रात्मकंधरः ॥ ६ ॥ देहिप्राणसमं
लिंगंमृगशृंगमयंशिव ॥ तच्छ्रुत्वासमहादेवश्चिंतयित्वानृपोत्तम ॥ ७ ॥ मृगशृंगमयंलिंगंसमादाय
महेश्वरः ॥ सद्योजातादिमंत्रेणपूजयामासभक्तितः ॥ ८ ॥ ददौदशाननकरेभविष्यत्कार्यगौरवात् ॥

॥ १३ ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

दशाननमुवाचेदंप्रीत्यापरमयाशिवः ॥ ९ ॥ दशाननानिबोधेदंगंतव्यंपादचारतः ॥ लिंगंधृत्वापुरीं लंकांनानिधेयंचविश्वजित् ॥ १० ॥ यत्रैतत्क्षिपसेलिंगंतत्रैवास्तेनसंशयः ॥ इत्युक्त्वांतर्दधेशंभुर्द शास्योप्यापयौततः ॥ ११ ॥ कैलासादतिवेगेनपादचारेणरावणः ॥ दक्षिणांदिशमुद्दिश्यसप्तको टीश्वरंययौ ॥ १२ ॥ तत्रदृष्ट्वामहालिंगंसप्तकोटीश्वरंनृप ॥ माध्याह्निकंकर्मकुर्वन्तत्रोवासतदानृ प ॥ १३ ॥ सूतउवाच ॥ ततोदेवगणाःसर्वेकैलासेरावणंनृप ॥ मृगयित्वानदृष्ट्वातेशंभोरंतिक मागमन् ॥ १४ ॥ अपृच्छन्देवताःशंभुंप्रवृत्तिंरावणस्यतु ॥ तानुवाचमहादेवोरावणोराक्षसाधिपः ॥ ॥ १५ ॥ लिंगंगृहीत्वात्रिदशादाक्षिणाभिमुखोययौ ॥ पादचारेणवैयातिगृहीत्वालिंगमुत्तमम् ॥ ॥ १६ ॥ तद्यतध्वंसुरश्रेष्ठायथास्थास्यतिभूतले ॥ तल्लिंगरत्नंदुष्टात्मामाविलंबतदेवताः ॥ १७ ॥ इतिश्रुत्वाततोदेवानमस्कृत्वामहेश्वरम् ॥ कैलासान्निर्ययुर्वेगान्मार्गयंतोदशाननम् ॥ १८ ॥ नदृष्ट्वा रावणंक्वापिसम्लानमुखपंकजाः ॥ दुःखेनमहतायुक्ताःसागरंप्रतिपेदिरे ॥ १९ ॥ पश्चिमस्योदधेस्ती

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

रेविविशुस्तत्रदेवताः ॥ तदुपायंविचिन्वंतोदर्शनेरावणस्यहि ॥ २० ॥ एतस्मिन्नंतरेकालेनारदस्त
त्रचागतः ॥ दृष्ट्वामुनिर्देवगणान्पप्रच्छेदंतदानृप ॥ २१ ॥ पुरुहूतकिमर्थंत्वंस्थितवानत्रदुःखितः ॥
सर्वैर्देवगणैःसार्धंतवाचिंतांवदाधुना ॥ २२ ॥ इंद्रउवाच ॥ श्रूयतांमुनिशार्दूलममचिंतांवदामिते ॥
दशाननोलिंगरत्नंतपसातोष्यशंकरम् ॥ २३ ॥ लब्ध्वाशंभोःसकाशात्तुलंकांप्रतिगतोधुना ॥ तंमा
र्गयंतःकैलासाद्वयंसर्वेसमागताः ॥ २४ ॥ सर्वान्देशानतिक्रम्यनदृष्ट्वाक्वापिरावणम् ॥ दुःखेनमहता
युक्तावयंचात्रसमागताः ॥ २५ ॥ तस्यप्रवृत्तिंजानासिकथ्यतांयदिनोद्विज ॥ सूतउवाच ॥ तच्छ्रु
त्वानारदोवाक्यंइंद्रस्यभरतर्षभ ॥ पुरंदरंपुनःप्राहवाक्यंविनयपूर्वकम् ॥ २६ ॥ नारदउवाच ॥ राव
णस्यवदाम्यद्यप्रवृत्तिंशृणुवासव ॥ त्यजचिंतांमहाबाहोदृष्टोलंकाधिपोमया ॥ २७ ॥ सप्तकोटीश्वरं
नामलिंगंवैदक्षिणापथे ॥ आस्तेतमर्चयन्भक्त्यातत्रायंदशकंधरः ॥ २८ ॥ मध्याह्नसमयेदृष्टोम
यातत्रसुरेश्वर ॥ उपायंतस्यवक्ष्यामिशृणुविघ्नार्थमच्युत ॥ २९ ॥ लिंगप्रदानसमयेरावणंचेदमुक्तवा

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

न् ॥ ननिवेयंत्वयालिंगंभूमौपथिकथंचन ॥ ३० ॥ यत्रेमंक्षिपसेलिंगंतत्रैवास्तेनसंशयः ॥ इतिश्रु
तंमयापूर्वंतद्यतस्वसुरेश्वर ॥ ३१ ॥ यथाविनिक्षिपेद्भूमौमृगशृंगंदशाननः ॥ तथाकुरुष्वदेवेंद्रततो
दुःखाद्विमोक्ष्यसे ॥ ३२ ॥ नारदस्यवचःश्रुत्वासर्वेदेवाःसवासवाः ॥ हर्षेणमहतायुक्ताःसंभाष्यचपर
स्परम् ॥ ३३ ॥ ब्रह्मविष्ण्वादयःसर्वेसप्तकोटीश्वरंययुः ॥ तत्रदृष्ट्वादशग्रीवंत्वदृष्टाह्यासान्दिवौकसः ॥
॥३४॥ रावणोपिसुरान्दृष्ट्वाजगर्जजलदोयथा ॥ तान्तृणीकृत्यलंकेशोगोकर्णाभिमुखोययौ ॥३५॥ तम
न्वयुर्देवगणाब्रह्माद्यास्त्रिदिवौकसः ॥ चिंतयंतोत्युपायंतेलिंगस्यस्थापनेभुवि ॥ गोकर्णेराजशार्दूलगो
कर्णेपर्वतेविशत् ॥३६॥ ततोविष्णुःस्वमनसिध्यात्वातत्स्थापनेभुवि ॥ उपायंभरतश्रेष्ठज्ञातवानाचिरा
द्धरिः ॥ ३७ ॥ तस्यव्रतमिदंचास्तित्रैलोक्येविश्रुतंमहत् ॥ संध्यामुपास्तेतत्कालेनातिक्रमातिश
त्रुहा ॥ ३८ ॥ इत्येवंचिंतयित्वासौभास्करंदीप्ततेजसम् ॥ प्राच्छादयदमेयात्माचक्रेणगरुडध्वजः ॥
॥ ३९ ॥ ततोगजास्यमाहूयवचनंचेदमब्रवीत् ॥ गजाननमहाबाहोवचनान्ममसंप्रति ॥ ४० ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

बटुरूपधरस्त्वंहियाहिरावणसंनिधिम् ॥ रावणोराक्षसवरोमृगशृंगमयंशिवम् ॥ ४१ ॥ गृह्यसंध्याक्रि
यांकर्तुंपितृस्थालींसमेष्यति ॥ यदियास्यसिचेत्त्वंबैअधुनारावणांतिकम् ॥ ४२ ॥ सदास्यतिमहा
लिंगंत्वत्करेगणनायक ॥ लिंगंतस्माद्गृहीत्वात्वंतंब्रूहिवचनंत्विदम् ॥ ४३ ॥ दशाननमहाबाहो
त्वल्लिंगंचवहाम्यहम् ॥ मय्यस्तिशक्तिर्यावच्चतावत्कालंनसंशयः ॥ ४४ ॥ नोचेल्लिंगंक्षिपाम्येवत्रिःसमा
हूयवैभुवि ॥ कर्तुंनार्हसिकोपंत्वंमय्येवंब्रूहिविघ्नराट् ॥ ४५ ॥ तथेतिदत्वालिंगंतुत्वत्करेगणनायक ॥
संध्यार्घ्यनियमंकर्तुंततोयास्यतिरावणः ॥ ४६ ॥ तदात्वंत्रिःसमाहूयरावणंगणनायक ॥ मृगशृंगं
स्थापयस्वतत्रश्लेष्मातकेवने ॥ ४७ ॥ ततस्त्वंकीर्तिमतुलामवाप्स्यसिनसंशयः ॥ इत्युक्त्वागणना
थंतुसांत्वयित्वाजनार्दनः ॥ ४८ ॥ प्रेषयामासराजेंद्रविघ्नार्थंरावणस्यहि ॥ गजास्योपिबटो ॥ ९५ ॥
रूपंधृत्वाप्रायाद्धरेर्गिरा ॥ ४९ ॥ रावणस्यांतिकेराजन्शनैस्तत्रचचारह ॥ रावणोपिपितृस्थालीं
गत्वातत्रददर्शह ॥ ५० ॥ भास्करंकुरुशार्दूलपुष्करेल्पतररश्मिकम् ॥ अस्तंगतोर्कइत्येवंमन्यमानो

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

निशाचरः ॥ ५१ ॥ कथंसंध्यामुपासिष्येधृत्वालिंगंकरेधुना ॥ इत्येवंचिंतयानस्तुदिशोदशाविलोकय
न् ॥ ५२ ॥ ततोपश्यद्गणाध्यक्षंबटुरूपधरंनृप ॥ तंदृष्ट्वारावणोमोहाद्गजाननमुवाचह ॥ ५३ ॥ रा
वणउवाच ॥ मुनिपुत्रनमस्तेस्तुशृणुष्ववचनंमम ॥ लिंगमेतद्धिकैलासादानीतंरावणोस्म्यहम् ॥
॥ ५४ ॥ गृहाणत्वंमत्प्रसादाद्वांछितंलभसेफलम् ॥ यावत्संध्यार्घ्यनियमंकृत्वायास्यामितेंतिकम् ॥
॥ ५५ ॥ तावद्गृहाणमल्लिंगमादास्येहंपुनर्बटो ॥ इत्युक्तोगणनाथस्तुरावणेनतमब्रवीत् ॥ ५६ ॥
विनायकउवाच ॥ वोढुंममास्तिचेच्छक्तिःकरिष्येवचनंतव ॥ अशक्यंचेत्क्षिपाम्येनंभूमौमाकुधराव
ण ॥ ५७ ॥ त्रिःसमाहूयवचसालिंगमेतन्नसंशयः ॥ इत्युक्तोगणनाथेनतथेतिदशकंधरः ५८ ॥ द
त्वातस्यकरेलिंगंसंध्योपासनमारभत् ॥ कृत्वाजजापगायत्रींपापस्थाल्यांकुरूद्वह ॥ ५९ ॥ जपध्या
नविधानेनस्थितेतास्मिन्निशाचरे ॥ एतस्मिन्नंतरेकालेविष्ण्वाद्यादेवतागणाः ॥ ६० ॥ परस्परमथामं
त्र्यविलंबंनभवेदिति ॥ भारंसमस्तलोकस्यानिक्षिपुलिंगमूर्धनि ॥ ६१ ॥ धृत्वाराजन्गणाध्यक्षोह

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

स्तेलिंगंसमाव्हयत् ॥ दशाननंत्रिवारंतुशीघ्रमागम्यतामिति ॥ ६२ ॥ महद्भारमभूल्लिंगंनवोढास्मि
कथंचन ॥ इत्युक्त्वाभूतलेलिंगंस्थापयामासविघ्नराट् ॥ ६३ ॥ सूतउवाच ॥ वैवस्वतेंतरेराजन्त्रयो
विंशतिमेशुभे ॥ त्रेतायुगेत्वीश्वराब्देशरत्कालेनृपोत्तम ॥ ६४ ॥ ऊर्जशुक्लप्रतिपदिव्यतीपातेरवेर्दिने ॥
तुलामासेमीनलग्नेविशाखायांप्रतिष्ठितम् ॥ ६५ ॥ ततोहरिःस्वकंचक्रमुपसंहृतवान्रवेः ॥ ततोदेव
गणाःसर्वेहर्षेणमहतायुताः ॥ ६६ ॥ लिंगस्योपरिराजेंद्रपुष्पवृष्टिंत्ववर्षिरे ॥ वीणावेणुमृदंगांश्चवा
दयंतःसुरोत्तमाः ॥ ६७ ॥ गिरौताम्रतलेतास्मिन्ननृतुर्गीतानिःस्वनैः ॥ शंभोर्लिंगस्थापनंयेपठंतिशृ
ण्वंतिचानन्यधियोमनुष्याः ॥ ६८ ॥ चित्तेहभोगाननुभूयचेप्सितान्प्रयांतिचांतेपदमीश्वरस्य ॥ ६९ ॥
इतिश्रीस्कांदेगोकर्णपुराणेचतुस्त्रिंशोऽध्यायः ॥ ३४ ॥ ॥ छ ॥ ॥ ॥ ॥ ॥ ९६ ॥
॥ शतानीकउवाच ॥ ततःकिमकरोद्ब्रह्मन्रावणोराक्षसेश्वरः ॥ लिंगेप्रतिष्ठितेभूम्यांगजास्येनाशि
वात्मके ॥ १ ॥ तन्मेविस्तरतोब्रूहिसूतपौराणिकोत्तम॥ ॥ सूतउवाच ॥ यदाहरिःस्वयंचक्रमु

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

पसंल्लतवान्रवेः ॥ तदाददर्शचाकाशेभास्करंदीप्ततेजसम् ॥ २ ॥ भूम्यांप्रतिष्ठितांलिंगंगजास्येन
ददर्शच ॥ कोपेनमहताविष्टोलज्जयाचदशाननः ॥ ३ ॥ ज्ञात्वात्मवंचनंराजन्मन्वानोदैवतैःकृत
म् ॥ प्रतिकर्तास्मितेषांवैइतिमत्वापराक्रमी ॥ ४ ॥ दत्वार्घ्यंजपकर्मादिसमाप्यनियमंनृप ॥ पितृ
स्थाल्यांदशग्रीवस्ततोलिंगांतिकंययौ ॥ ५ ॥ गत्वाप्रतिष्ठितंलिंगंदृष्ट्वाराजन्निशाचरः ॥ लिंगंब
लादुद्धरिष्यइतिमत्वातदासुरः ॥ ६ ॥ दोर्भ्यांलिंगंप्रगृह्याशुजानुभ्यामवनींगतः ॥ चकर्षसर्वब
लतोरावणोराक्षसाधिपः ॥ ७ ॥ तदाचचालपृथिवीसशैलवनकानना ॥ यदाप्रतिष्ठितमभूद्गजा
स्येनभूविनृप ॥ ८ ॥ तदैवताल्लिंगरत्नंसप्तपातालमाक्रमत् ॥ कूर्मपृष्ठावधिगतंततोराक्षसपुंगवः
॥ ९ ॥ नशशाकोद्धर्तुमेनंजानुभ्यामपतद्भुवि ॥ वमन्रुधिरमत्यंतंत्रिदशाददृशुश्चतम् ॥ १० ॥
पतितंमूर्छितंदृष्ट्वाजहसुऋषिभिःसह ॥ ततःशब्दःकलकलस्तत्रात्यंतमभून्नृप ॥ ११ ॥ ततोव
वर्षपर्जन्यःपुष्पवृष्टिंगिरौतदा ॥ तत्रदेवैश्चऋषिभिःस्थापितंलिंगमुत्तमम् ॥ १२ ॥ कलंकलेश्व

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

रंनामसर्वलोकेषुविश्रुतम् ॥ देवर्षिभिःपूजितंतत्पुण्यंसाक्षाच्छिवात्मकम् ॥ १३ ॥ तस्यदर्शनमा
त्रेणनृणांभरतसत्तम ॥ ब्रह्महत्यादिपापानिनाशमायांतितत्क्षणात् ॥ १४ ॥ तस्यलिंगस्यसविधे
उदीच्यांदिशिसंस्थितः ॥ वैवाहिकोनामगिरिःसर्वसिद्धनिषेवितः ॥ १५ ॥ तस्यदर्शनमात्रेण
त्रिवर्गंलभतेनरः ॥ तत्रगत्वानरोराजन्दक्षिणाशांविलोकयन् ॥ १६ ॥ प्रदक्षिणीकृत्यतंचात्रिवारं
यस्तुभारत ॥ स्थित्वातस्यतलेलिंगंप्रणम्यप्रयतेंद्रियः ॥ १७ ॥ अष्टाक्षरंजपेन्मंत्रंऋषिच्छंदंसदै
वतम् ॥ उच्चैःशब्दंप्रकुर्वीतहरिरित्यथवाहरः ॥ १८ ॥ तच्छ्रुत्वाकाशगंगावैदेवीत्रिपथगामिनी ॥
अभिषिंचतिराजेंद्रसाद्यापिकुरुनंदन ॥ १९ ॥ कृतत्रेताद्वापरेषुविपरीतंकलौयुगे ॥ एवंकरोति
चेद्राजन्नमृतत्वंसगच्छति ॥ २० ॥ सूतउवाच ॥ लब्धसंज्ञोमुहूर्ताद्वैरावणोलोककंटकः ॥ दृ
ष्टान्दिवौकसोदृष्ट्वालज्जयोत्थायवेगवान् ॥ २१ ॥ गणेशनिकटंगत्वाकोपेनमहतायुतः ॥ मुष्टिंबध्वा
दृढंसोथताडयामासमस्तके ॥ २२ ॥ एवंसंताडितोमूर्ध्निरावणेनगजाननः ॥ आग्नेय्यांदिशिलिंग

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

स्यपृष्ठतस्तस्थिवान्नृप ॥ २३ ॥ पश्चिमाभिमुखोभूत्वाचत्वारिंशत्पदेनृप ॥ बटुरूपीगणाध्यक्षः
सर्वसिद्धिप्रदायकः ॥ २४ ॥ रावणोपिकुरुश्रेष्ठताडयित्वागजाननम् ॥ कोपेनमहताविष्टोलज्ज
याचसुरेश्वरः ॥ २५ ॥ किंचिन्म्लाननोभूत्वागोकर्णान्निर्ययौनृप ॥ लंकामुद्दिश्यतद्रक्षोशतशृंगस्य
मूर्धनि ॥ २६ ॥ गुहांप्रविश्यसतदाप्रविश्यलवणांबुधिम् ॥ विवेशस्वपुरींलंकांवंचितोदेवतागणैः
॥ २७ ॥ गत्वास्वभवनंराजन्यथापूर्वमातिष्ठत ॥ शतानीकउवाच ॥ रावणेतुगतेब्रह्मन्लंकांभग्न
मनोरथे ॥ किमकुर्वंस्तदादेवास्तन्मेविस्तरतोवद ॥ २८ ॥ सूतउवाच ॥ शृणुवक्ष्यामिवृत्तांतंरा
वणेतुगतेसति ॥ लिंगस्यसंनिधिंजग्मुःसर्वेदेवाःसवासवाः ॥ २९ ॥ उपविष्टाश्चपरितोलिंगंसर्वे
दिदृक्षवः ॥ विश्वकर्माणमाहूयदेवेंद्रोथादिवस्पतिः ॥ ३० ॥ गंडकींप्रेषयामासपीठमानेतुमुत्तमम्
॥ सगत्वातत्रमुदितःश्लक्ष्णंपीठमनुत्तमम् ॥ ३१ ॥ समानीयतदालिंगेयोजयामासतत्ववित् ॥
देवदुंदुभयोनेदुर्गंधर्वाललितंजगुः ॥ ३२ ॥ उर्वश्याद्यप्सरःसंघानन्नृतुस्तत्रभारत ॥ ततोब्रह्मादयोदे

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

वाभाविष्यत्कार्यंगौरवम् ॥ ३३ ॥ अन्योन्यालोच्यमनसिहर्षेणमहतायुताः ॥ नभस्वंतंसमाहूयालिं
गवृत्तांतमादितः ॥ ३४ ॥ वक्तुंसंप्रेषयामासुःकैलासंप्रतिचेश्वरम् ॥ ततोवायुर्देववाक्याद्गत्वाचे
श्वरसंनिधिम् ॥ ३५ ॥ कथयामासतत्सर्वंलिंगवृत्तांतमादितः ॥ ततःशिवेनचाज्ञातोगोकर्णंप्रययौ
क्षणात् ॥ ३६ ॥ सूतउवाच ॥ ततोमहेश्वरःप्रीतःपार्वत्याप्रमथैर्युतः ॥ वृषारूढोययौक्षिप्रंगोक
र्णंपार्थिवोत्तम ॥ ३७ ॥ शालूकिनींसमासाद्यपार्वतीमिदमब्रवीत् ॥ इयंशालूकिनीदेवीसर्वपाप
हराशुभा ॥ ३८ ॥ आद्यगंगापुण्यनदीस्नातानांभुक्तिमुक्तिदा ॥ नदानांसरितांचैवह्याद्यासेयंप्रकी
र्तिता ॥ ३९ ॥ सीम्न्यसौवर्त्ततेयस्मात्प्रथमांसरितंविदुः ॥ आश्वयुज्यसितेपक्षेह्यष्टम्यामरुणोद
ये ॥ ४० ॥ आविर्भवतिशाल्मल्यांगंगापूर्णकलान्विता ॥ ४१ ॥ तस्मिन्कालेत्रयःस्नातितस्य
पुण्यफलंप्रिये ॥ ४१ ॥ अशक्यंहिमयावक्तुंब्रह्मणापिनशक्यते ॥ गोकर्णक्षेत्रसीमेयंकौबेर्यांदिशि
पार्वति ॥ ४२ ॥ इत्युक्त्वागिरिजांदेवोतीर्त्वाशालूकिनींतदा ॥ लिंगस्यसंनिधिंगत्वादृष्ट्वातत्रसुरा ॥ ९८ ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

न्विभुः ॥ ४३ ॥ वृषभादवरुह्याशुतदागिरिजयासमम् ॥ प्रमथैःसहराजेंद्रलिंगरत्नंददर्शह ॥ ४४ ॥
भूम्यांप्रतिष्ठितंतत्ररुद्रयोन्याविदूरतः ॥ ननामदंडवद्भूमौपार्वत्यासहपार्षदैः ॥ ४५ ॥ स्तुवान्लिंगं
महासत्वंशंकरोभरतर्षभ ॥ नमस्तेराजलिंगायलिंगरत्नायतेनमः ॥ ४६ ॥ नमस्तेराजभुजगगर्वस
र्वस्वहारिणे ॥ नमोस्मद्भागधेयायनमस्तेत्रिगुणात्मने ॥ ४७ ॥ दंतावलाननकृतप्रतिष्ठायमहात्म
ने ॥ नमोवेदशिरोवेद्यजोतिरानंदमूर्त्तये ॥ ४८ ॥ नमस्त्रिशिरसेतुभ्यंभवरोगभयच्छिदे ॥ गोकर्ण
क्षेत्रवासायमहाबलनमोनमः ॥ ४९ ॥ इतिस्तुत्वामुदाशंभुर्लिंगस्यांतिकमाययौ ॥ रावणस्यांगु
लिहतिंदृष्ट्वाशंभुःशुशोचह ॥ ५० ॥ लिंगरत्नमहेशानक्षमस्वकरुणानिधे ॥ मयापराधोहिकृतोरावणस्य
करेर्पणात् ॥ ५१ ॥ इतिस्तुत्वामभगवान्लिंगरत्नंकुरूद्वह ॥ दृष्ट्वाविष्णुमुखान्देवान्जगादवचनंत
दा ॥ ५२ ॥ दिष्ट्यादेवोगजास्येनगोकर्णेस्थापितंभुवि ॥ तस्मात्करगतंमेद्यलिंगरत्नंनसंशयः ॥
५३ ॥ गोकर्णेजन्मभूमिर्मेतत्रस्थंमत्करेस्थितम् ॥ इत्युदीर्यसलिंगस्यह्यभिधानमथाकरोत् ॥ ५४ ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

त्रिदशारावणोनामराक्षसोबलवत्तरः ॥ सर्वंलोकंस्वयंजिग्येस्वबलेनपराक्रमी ॥ ५५ ॥ तंजि
त्वास्वबलेनादौलिंगरत्नमतिष्ठत ॥ आक्रांतसप्तपातालकुहरोयंचनःसुराः ॥ ५६ ॥ अपकृष्टमश
क्योभूद्रक्षसारावणेनाहि ॥ तस्मान्महाबलइतित्रैलोक्येविश्रुतंभवेत् ॥ ५७ ॥ इत्युक्त्वाशंकरःप्री
त्यागणनाथांतिकंययौ ॥ मूर्धानंतस्यचप्रापद्दष्ट्वातन्मस्तकेव्रणम् ॥ ५८ ॥ उवाचवचनंपुत्रंगजा
स्यंबटुरूपिणम् ॥ रावणस्यकराघातात्पुत्रखिन्नोसिसांप्रतम् ॥ ५९ ॥ माकुरुष्वपुनःखेदंशृणुमे
परमंवचः ॥ लिंगरत्नंप्रतिष्ठाप्यमहत्कार्यंकृतंत्वया ॥ ६० ॥ पूजांकृत्वाप्रथमतस्तवपुत्रगजानन ॥
ततोमहाबलस्यैवपूजनंयःसमाचरेत् ॥ ६१ ॥ वांछितार्थंसलभतांमत्प्रसादान्नसंशयः ॥ यःपूज
यतिमाल्लिंगमकृत्वातवपूजनम् ॥ ६२ ॥ वांछितार्थफलंतस्यनकदाचिद्भविष्यति ॥ इत्युक्त्वास्वा
त्मजंशंभुःसर्वदेवगणैःसह ॥ ६३ ॥ पूजयित्वास्वतनयंविघ्नेशंविधिपूर्वकम् ॥ ततोमहाबलंराज
न्पूजयामासशंकरः ॥ ६४ ॥ पुनर्देवानुवाचेदंशंकरोभक्तवत्सलः ॥ रुद्रउवाच ॥ कार्त्तिकेपुण्य

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

मासेतुलिंगरत्नंप्रतिष्ठितम् ॥ तस्मादहंकार्त्तिकेतुपार्वत्यासहपार्षदैः ॥ ६५ ॥ चराचरेणजगताविशे
षेणवसामिवै ॥ भवंतोत्रैवतिष्ठंतुआज्ञयाममवैसुराः ॥ ६६ ॥ तस्मिन्कालेनरोयस्तुअत्रागत्यस
माहितः ॥ प्रातःस्नात्वाकोटितीर्थेलिंगरत्नंसपूजयेत् ॥ ६७ ॥ ददातिकिंचित्सनरःकर्मबंधाद्विमु
च्यते ॥ यद्दत्तंयद्धुतंजप्तंकृतंकर्मसुरोत्तमाः ॥६८॥ तदनंतफलंचास्तुनराणांमत्प्रसादतः ॥ तस्मा
द्गोकर्णयात्रायांविषुयुक्कार्तिकोवरः ॥ ६९ ॥ माघेवाप्यासितेपक्षेयाभवेच्चचतुर्दशी ॥ तस्यांनिशी
थसमयेलिंगरत्नंमहाबलम् ॥ ७० ॥ एकेनाबिल्वपत्रेणअणुमात्रजलेनवा ॥ द्रोणपुष्पेणगंधेनयः
पूजतिनरोत्तमः ॥ ७१ ॥ तस्यपुण्यफलंवक्तुंब्रह्मणापिनशक्यते ॥ गोकर्णबिल्वपत्रंचलिंगरत्नंमहा
बलम् ॥ ७२ ॥ शिवरात्रिस्तथादेवादुर्लभंहिचतुष्टयम् ॥ तस्मिन्कालेचयद्दत्तंएकंकोटिर्भविष्य
ति ॥ ७३ ॥ इदंममप्रियंक्षेत्रंसर्वेषांह्यमेवहि ॥ अत्रागत्यनरोयस्तुलिंगस्थापनमाचरेत् ॥ ७४ ॥
वापीकूपतटाकंचप्रपांवाभक्तिभावतः ॥ तेषांमध्येववासःस्यान्नात्रकार्याविचारणा ॥ ७५ ॥ य

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

थाकैलासशिखरेयथामंदरमूर्धनि ॥ तथात्रनिश्चितंवासंकरोम्येवनसंशयः ॥ ७६ ॥ सूतउवाच ॥
इत्युक्त्वाभगवान्देवःपार्वत्याप्रमथैःसह ॥ ययौकैलासशिखरंसर्वदेवसमान्वितः ॥ ७७ ॥ ततोदेवा
सुरगणागंधर्वाःसिद्धचारणाः ॥ महाबलमितिप्राहुर्लिंगंत्रिभुवनेश्वरम् ॥ ७८ ॥तदाप्रभृतिगोक
र्णेवासंचक्रुर्दिवौकसः ॥ रुद्रेणमनसाध्यातःशतशृंगागमोनृप ॥ स्वक्षेत्रंतंदृढीकर्त्तुतत्तथैवह्यभूत्प्र
भो ॥ ७९ ॥ इतिश्रीस्कांदेगोकर्णपुराणेपंचत्रिंशोऽध्यायः ॥ ३५ ॥ ॥ ॥ ॥
सूतउवाच ॥ विष्णुनास्वस्यशृंगंतुसालग्रामेप्रतिष्ठितम् ॥ ब्रह्मणास्वस्यशृंगंतुपुष्करेस्थापितंह्यभूत् ॥
॥ १ ॥ स्वेस्वेस्वमेवमात्मानंदृढीकृत्यमहेश्वराः ॥ विज्वरावीतरागाश्चसुखेनासन्नृपोत्तम ॥ २ ॥
क्षिप्रंसिद्धिकरंराजन्गोकर्णनात्रसंशयः॥ सालग्रामेपुष्करेचचिरात्सिद्धिर्भविष्यति ॥३॥ तस्मात्तेषुश्रे
ष्ठमभूद्गोकर्णंकुरुपुंगव ॥ देवंमहाबलंराजन्पूजयंतिसुरासुराः ॥ ४ ॥ धर्मार्थकाममोक्षार्थंभक्त्या
पूतेनचेतसा ॥ पंचामृतेनगव्येनशुद्धतोयेनचैवहि ॥ ५ ॥ श्रीगंधैश्चंदनैर्दिव्यैस्तथावस्त्रैर्मनोहरैः ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

रत्नैर्माणिक्यमुख्यैश्चसुवर्णाभरणैरपि ॥ ६ ॥ गुग्गुलादिमहाधूपैर्माल्यैर्दिव्यैर्मनोहरैः ॥ प्रशस्तैरपिनै
वेद्यैर्ब्राह्मणानांचतर्पणैः ॥ ७ ॥ पुराणादिभिरन्यैश्चनृत्तवाद्यादिभिस्तथा ॥ संपूज्यवांछितार्थास्तेल
भंतेऽनिशमप्युत ॥ ८ ॥ तस्मात्पूज्यतमंलिंगमन्यन्नास्तिजगत्त्रये ॥ अवापुःपूजनात्सिद्धिंदे
वासुरमहोरगाः ॥ ९ ॥ मनुष्याश्चमहाभागनात्रकार्याविचारणा ॥ गोकर्णसदृशंक्षेत्रंनास्तिना
स्तिजगत्त्रये ॥ १० ॥ महाबलसमंलिंगंनभूतंनभविष्यति ॥ कृतेमहाबलःश्वेतस्त्रेतायामतिलोहि
तः ॥ ११ ॥ द्वापरेपीतवर्णश्चकलौश्यामोभविष्यति ॥ आक्रांतसप्तपातालकुहरोयंमहाबलः ॥१२॥
घोरेकलियुगेप्राप्तेमृदुतामुपयास्यति ॥ दृष्ट्वावादिव्यलिंगंचश्रुत्वावासागरध्वनिम् ॥ १३ ॥ कोटि
तीर्थेनरःस्नात्वापुनर्जन्मनविंदति ॥ पंचक्रोशपरीमाणगोकर्णक्षेत्रमंडले ॥ १४ ॥ सर्वाण्यश्मानि
लिंगानितीर्थान्यंभांसिसर्वशः ॥ सार्धयोजनविस्तीर्णमर्धयोजनमायतम् ॥ १५ ॥ क्षेत्ररूपेण
तिष्ठंतंशिवंपश्यंतिसूरयः ॥ नाग्निनानशशांकेननताराग्रहनायकैः ॥ १६ ॥ तमोविशीर्यतेसम्यग्यथा

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

सवितृदर्शनात् ॥ तथैवनेतरैस्तीर्थैर्नानाक्षेत्रैर्मनोरमैः ॥ १७ ॥ सद्यःपापविशुद्धःस्याद्यथागोकर्णद
र्शनात् ॥ अपिपापशतंकृत्वाब्रह्महत्यादिमानवः ॥ १८ ॥ सकृत्प्रविश्यगोकर्णंनरोमुच्येतपातकैः ॥
अत्रैकेनादिनेनापियत्कृतंकर्मचोत्तमम् ॥ १९ ॥ तदन्यत्राब्दलक्षेणतपोभवतिसंभृतम् ॥ यत्रेंद्रब्रह्म
विष्णवादिदेवानांप्रीतिकाम्यया ॥ २० ॥ महाबलाभिधानेनाशिवःसन्निहितःस्वयम् ॥ इंद्रोब्रह्मामुकुं
दश्चविश्वेदेवामरुद्गणाः ॥ २१ ॥ आदित्यावसवोरुद्राःशशांकश्चसतारकः ॥ एतेविमानगतयःसाहि
ताःपार्षदैःस्वकैः ॥ २२ ॥ पूर्वद्वारिनिषेवंतेदेवदेवंमहाबलम् ॥ कालोमृत्युर्यमःसाक्षाच्चित्रगुप्तश्च
पावकः ॥ २३ ॥ पितृभिःसहरुद्रैश्चदक्षिणद्वारमाश्रिताः ॥ सेवंतेनृपशार्दूलनित्यंदेवंमहाबलम् ॥
॥ २४ ॥ विभावसुश्चित्ररथश्चित्रसेनोमहाबलः ॥ सहगंधर्ववर्गेणगायंतिपरमेश्वरम् ॥ २५ ॥ रंभा
कृतस्थलीमेनापूर्वचित्तिस्तिलोत्तमा ॥ नृत्यंतिपुरतःशंभोरुर्वश्याद्याःसुरस्त्रियः ॥२६॥ वसिष्ठःकाश्य
पःकण्वोविश्वामित्रोमहातपाः ॥ जैमिनिश्चभरद्वाजोजाबालिःक्रतुरंगिराः ॥ २७ ॥ गौतमोजमद

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ग्निश्वभार्गवोत्रिःपराशरः ॥ व्यासःसत्यवतीपुत्रःशुकेनसहकौरव ॥ २८ ॥ एतेचान्येचराजेंद्रसर्वेब्र
ह्मर्षयोमलाः ॥ देवंमहाबलंभक्त्याउत्तरद्वारमाश्रिताः ॥ २९ ॥ सेवंतेह्यनिशंराजन्नात्रकार्याविचा
रणा ॥ नारदोवालखिल्याश्चमरीच्याद्याःप्रजेश्वराः ॥ ३० ॥ सनकाद्यामहात्मानउपरिष्टादुपा
सते ॥ तथान्येमुनयोसंख्याजाटिलावल्कलांबराः ॥ ३१ ॥ दंडिनोव्रतिनोमुंडाःस्नातकाब्रह्मचारि
णः ॥ सेवंतेपरयाभक्त्यादेवदेवंमहाबलम् ॥ ३२ ॥ एवंदेवाःसगंधर्वाःपितरःसिद्धचारणाः ॥
विद्याधराःकिंपुरुषाःकिंनरागुह्यकाःखगाः ॥ ३३ ॥ नागाःपिशाचावेतालादैतेयाश्चमहाबलाः ॥
नानाविभवसंपन्नानानावाहनभूषणाः ॥ ३४ ॥ विमानैःसूर्यसंकाशैरग्निवर्णैःशशिप्रभैः ॥ आगत्य
मृगशृंगस्यनिकटंभरतर्षभ ॥ ३५ ॥ प्रस्तुवंतिप्रगायंतिपठंतिप्रणमंतिच ॥ प्रनृत्यंतिप्रहृष्यंतिगोक
र्णेपृथिवीपते ॥ ३६ ॥ लभंतेभीप्सितान्कामान्रमंतेचयथासुखम् ॥ तत्रस्थानानिदेवानांसर्वेषांसंति
पार्थिव ॥ ३७ ॥ विष्णोश्चदेवदेवस्यब्रह्मणःपरमेष्ठिनः ॥ कार्त्तिकेयस्यदुर्गायागजवक्त्रस्यचानघ ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

॥ ३८ ॥ धर्मस्यक्षेत्रपालस्यऋषीणांचमहामते ॥ अन्यानिशिवलिंगानिविद्यंतेकोटिशःप्रभो ॥
॥ ३९ ॥ असंख्येयानितीर्थानिविद्यंतेतत्रभारत ॥ गोकर्णकोटितीर्थंचतीर्थानांमुख्यतांगते ॥४०॥
सर्वेषांशिवलिंगानांसार्वभोमोमहाबलः ॥ येमातृपितृहंहंतारोयेवाभूतद्रुहःशवाः ॥ ४१ ॥
गोघ्नाश्चैवकृतघ्नाश्चपरदाररताश्चये ॥ येदुर्वृत्तादुराचारादुःशीलास्तेयिनश्चये ॥ ४२ ॥ तेसर्वेप्राप्य
गोकर्णंस्नात्वाचैवजलेषुवै ॥ देवंमहाबलंपूज्यप्रयांतिशिवमंदिरम् ॥ ४३ ॥ तत्रपुण्यासुतिथिषुपु
ण्यर्क्षेपुण्यवासरे ॥ येर्चयंतिमहालिंगंतेरुद्राःस्युर्नसंशयः ॥ ४४ ॥ रवींदुसौम्यवारेषुयदादर्शोभवि
ष्यति ॥ तदाजलनिधौस्नासंदानंचापितृतर्पणम् ॥ ४५ ॥ शिवपूजाजपोहोमोव्रतचर्याद्विजार्चनम् ॥
यत्किंचिद्विहाकृतंकर्मतदनंतफलप्रदम् ॥४६॥ व्यतीपातादियोगेषुरविसंक्रमणेषुच ॥ महाप्रदोषवेला
सुशिवपूजाविमुक्तिदा ॥ ४७ ॥ सदाकृतयुगश्चात्रसदाचैवोत्तरायणम् ॥ महाबलालयेपुण्येपुण्यं
पुण्यसमृद्धिकृत् ॥४८॥ गोकर्णरामसेतुश्चकाशीतित्रिस्थलीस्मृता ॥ त्रिस्थलीषुकृतंकर्मशेषेणापिनग

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ण्यते ॥ ४९ ॥ पृथिव्यांयानितीर्थानिसागरंप्रविशंतिहि ॥ गंगादिसरितोयस्माद्गोकर्णंताद्विशिष्य
ते ॥ ५० ॥ गोकर्णसामहाकाशीविश्वनाथोमहाबलः ॥ कोटितीर्थमथोगंगासमुद्रोयंविशिष्यते
॥ ५१ ॥ गुंजामात्राधिकंकाश्यागोकर्णमभिधीयते ॥ अत्रदत्तंहुतंजप्तंतदनंतायकल्पते ॥ ५२ ॥
इतिश्रीगोकर्णपुराणेषट्त्रिंशोऽध्यायः ॥ ३६ ॥ ॥ ॥ ॥ ॥ ॥
॥ शौनकउवाच ॥ सर्वेषामपितीर्थानांकोटितीर्थंविशिष्यते ॥ ब्रह्महत्यादिपापानिनश्यंतिस्नानमा
त्रतः ॥ १ ॥ इतिप्रोक्तंत्वयासूततन्मेविस्तरतोवद ॥ सूतउवाच ॥ शृणुविप्रप्रवक्ष्यामिसम्यग्पृष्टं
त्वयानघ ॥ कोटितीर्थस्यमाहात्म्यंश्रुतमात्राघनाशनम् ॥ २ ॥ अपिपापशतंकृत्वाब्रह्महत्यादिमा
नवः ॥ कोटितीर्थेस्नानमात्रान्नरोमुच्येतपातकैः ॥ ३ ॥ कोटितीर्थनाममुनेकोटिद्रवसमान्वितम् ॥
तस्मिन्स्नातोमहापापैर्मुच्यतेनात्रसंशयः ॥ ४ ॥ अत्रैवोदाहरंतीमामितिहासंपुरातनम् ॥ तच्छ्रुत्वा
सर्वपापानिविलयंयांतितत्क्षणात् ॥ ५ ॥ अवंतिविषयेराजाविष्णुवर्मेतिचाभवत् ॥ पुराकृतयुगे

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

सोपिस्वराज्यंपर्यपालयत् ॥ ६ ॥ सदामद्यपशीलोवैगीतवाद्यानुमोदकः ॥ प्रत्यहंसुंदरींश्यामांसुके
शींसुस्तनींमुदा ॥ ७ ॥ रमयेच्चदिवारात्रंपरेद्युस्तांत्यजेदसौ ॥ सुकेशीसुंदरीस्निग्धानारीयत्रवसे
त्कचित् ॥ ८ ॥ तामानयित्वामौल्येनबलात्कारेणवान्नृप ॥ रमयेच्चयथासौख्यंप्रातस्तांप्रत्यहंत्य
जेत् ॥ ९ ॥ गुरुपत्नींभ्रातृपत्नींसखिपत्नींतथैवच ॥ शरणागतपत्नींचशूद्रपत्नींतथैवच ॥ १० ॥
वेश्यांवारमयेन्नित्यंविधवासंगमाचरेत् ॥ दासींवारमयेन्नित्यंरजकींवापिदोषकृत् ॥ ११ ॥ रजस्व
लांवादुष्टोसौरमयेच्चानिरंतरम् ॥ ब्रह्मद्वेषीकृतघ्नश्चदेवब्राह्मणनिंदकः ॥ १२ ॥ देवब्राह्मणद्रव्याणि
बलादपहरेदसौ ॥ ब्रह्मद्वेष्यैःकृतघ्नैश्चसखित्वंतस्यदुर्मतेः ॥ १३ ॥ प्रजाक्षोभकरोनित्यंसदादुर्मंत्रिसं
गतः ॥ सुमंत्रिणःपरित्यक्ताक्रुद्धाश्चैवपुराविदः ॥ १४ ॥ तेनचाकृतपापानिनसंतिधरणीतले ॥
एवंपातकिनस्तस्यबहुवर्षोत्यगान्नृप ॥ १५ ॥ अतीवपापसंदोहाद्राजयक्ष्माभवत्ततः ॥ अतीते
दशमेमासिव्याधिरुत्कृष्टतांगतः ॥ १६ ॥ नभिषङ्‌चवाबंधुर्नमाताजनकोपिवा ॥ नदैवंनचवारा

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ज्यंशक्तास्तेतंनिवारितुम् ॥ १७ ॥ तस्मिन्नेवंविधेराज्ञिराजयक्ष्मोव्यथातुरे ॥ दैवयोगात्तदाप्राप्तः
सनकोब्रह्मनंदनः ॥ १८ ॥ तत्पुरंप्रविवेशासौब्रह्मज्ञानपरायणः ॥ दांतोजितेंद्रियःशांतोह्यक्षमाला
धरोमुनिः ॥ १९ ॥ तत्पुरंसंप्रविष्टेतुसनकेयोगवित्तमे ॥ नृपभार्यापुण्यशीलातद्वृत्तांतंनिशम्यच
॥ २० ॥ सयोगीयत्रचास्तेवैतत्रागत्यपतिव्रता ॥ पादयोःपतितातस्यइदमूचेपतिव्रता ॥ २१ ॥
स्वामिन्ननाथांमांपाहिपतिदानप्रदानतः ॥ इत्युक्त्वासातदादेवीनिन्येतंराजमंदिरम् ॥ २२ ॥ त
मागतमभिप्रेक्ष्यविष्णुवर्मामहीपतिः ॥ अभ्युत्थायासनंदत्वामधुपर्कादिभिर्नृपः ॥ २३ ॥ पूज
यामासविधिवत्सुखासीनंमहामुनिम् ॥ तमूचेयोगिनंराजासनकंविनयान्वितः ॥ २४ ॥ कृता
र्थोस्मिमहाभागभवद्दर्शनमात्रतः ॥ अद्यमेसफलंजन्मजीवितंचसुजीवितम् ॥ २५ ॥ अद्यमेपितर
स्तुष्टाभवदागमनेनवै ॥ अनाथंपापकर्माणंविमुखंपुण्यकर्मणि ॥ २६ ॥ दुराचाररतंकामलोलु
पंत्राहिमांमुने ॥ जन्मांतरार्जितात्पुण्यलेशात्प्राप्तंमहात्मनः ॥ २७ ॥ भवतोदर्शनंजातंनलभ्यंपा

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

पकर्मिणाम् ॥ इत्युक्तस्तेनयोगींद्रश्चिरंदध्यौसमाहितः ॥ २८ ॥ मुहूर्त्तंध्यानमास्थायज्ञात्वातत्क
र्मपापिनः ॥ उवाचमधुरंवाक्यंराजानंव्यथिनंतदा ॥ २९ ॥ राजन्वक्ष्यामितेकर्मकृतंशृणुपुरात
नम् ॥ यत्रवृंदावनंनास्तिशालग्रामशिलार्चनम् ॥ ३० ॥ यत्रदेवध्वनिर्नास्तिपुराणपठनंतथा ॥
यत्रशास्त्रविवादोवानास्तिसज्जनसंगतिः ॥ ३१ ॥ तत्रस्युःसकलारोगादुर्भिक्षंभयमेवच ॥ यत्रनि
ष्ठूरवचनंसदाक्रोधोवसेन्नृप ॥ ३२ ॥ यत्राशुभतरावाणीमलिनांबरधारणम् ॥ स्वाचारस्यपरित्या
गःपरधर्मपरिग्रहः ॥ ३३ ॥ स्नानसंध्यादिकंनास्तितथादानक्रियानृप ॥ औपासनंवैश्वदेवंनास्ति
गोपूजनंतथा ॥ ३४ ॥ देवब्राह्मणपूजावानास्तिचाश्वत्थसेवनम् ॥ परोपकरणंनास्तितत्रस्युःस
कलारुजः ॥ ३५ ॥ गोषुविप्रेषुनारीषुदेवेषुपरवस्तुषु ॥ द्रोहंनकारयेद्विद्वान्कृत्वाचेन्नारकीभवेत ॥१०४॥
॥ ३६ ॥ विश्वासघातिनश्चापिकृतघ्नस्यापिमायिनः ॥ परस्त्रीसंगिनश्चापिनिष्कृतिर्नास्तिकुत्रचित
॥ ३७ ॥ पूर्वजन्मकृतंपापमिहजन्मनिवातथा ॥ तत्सर्वंव्याधिरूपेणपीड्यतेतंनराधमम् ॥ ३८ ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

संशयः ॥ संदेहोनात्रकर्तव्यःसत्यंसत्यंवदाम्यहम् ॥ २२ ॥ सूतउवाच ॥ इत्युक्त्वासनकोयोगीपूजितस्तेनभूभुजा ॥ यथाकामंजगामासौयोगीत्रैलोक्यपूजितः ॥ २३ ॥ ततःसराजामुदितोगते योगिनिभारत ॥ गोकर्णंचतदागंतुंसामात्यःसपुरोहितः ॥ २४ ॥ हस्त्यश्वरथयानादिचतुरंगबलान्वितः ॥ गोकर्णाभिमुखोराजाप्रतस्थेह्यतिलालसः ॥ २५ ॥ क्षिप्रंसंप्राप्यगोकर्णमाघादौक्षेत्रमुत्तमम् ॥ प्रातःस्नात्वाकोटितीर्थेपूजयित्वामहाबलम् ॥ २६ ॥ यथोक्तंयोगिनातेनतथैवकृतवान्नृपः ॥ अनिशंमाघमासंसगोकर्णेराजकुंजरः ॥ २७ ॥ सर्वतीर्थेषुचस्नात्वासर्वलिंगानिपूज्यच ॥ निष्कल्मषश्चनिरुजःस्वपुरंप्रापहृष्टधीः ॥ २८ ॥ यथाजीर्णत्वचंत्यक्त्वाराजतेवायुभोजनः ॥ शुक्लपक्षेयथाचंद्रोमेघमुक्तोयथारविः ॥ २९ ॥ तथाबभौनृपश्रेष्ठःसर्वरोगविवर्जितः ॥ प्रजाःशशासधर्मेण धर्मराजइवापरः ॥ ३० ॥ देवब्राह्मणपूजांचसदासौकृतवान्नृपः ॥ सत्पात्रेदानशीलश्चईजेसर्वान्महाक्रतून् ॥ ३१ ॥ पौराबभूवुःसंहृष्टाःपुत्रपौत्रसमन्विताः ॥ भोगान्भुक्त्वाबहुविधान्भार्ययासहपा

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

थिंवः ॥ ३२ ॥ पुत्रपौत्रैःपरिवृतोदेवब्राह्मणसेवकः ॥ अंतेविमानमारुह्यदिव्यस्त्रीगणसेवितः ॥
॥ ३३ ॥ गंधर्वैर्गीयमानस्तुदेवलोकंययौनृपः ॥ एतत्तेसर्वमाख्यातंभूपतेपर्यपृच्छते ॥ ३४ ॥ को
टितीर्थस्यमाहात्म्यंश्रुतमात्राघनाशनम् ॥ सर्वरोगहरंपुण्यंभूयःकिंश्रोतुमिच्छसि ॥ ३५॥ शौनक
उवाच ॥ आदौप्राप्तैस्तुगोकर्णेयात्रार्थंसूतनंदन ॥ किंकार्यंपुरुषैःस्त्रीभिरेतन्नोवक्तुमर्हसि ॥ ३६ ॥
सूतउवाच ॥ गोकर्णयात्राभिरतोनारीवापुरुषोपिवा ॥ ब्राह्मणःक्षत्रियोवैश्यःशूद्रोवापिनरोत्तम ॥३७॥
उपोषितोमुंडितश्चस्नात्वाश्राद्धंसमाचरेत् ॥ यदाप्राप्नोतिगोकर्णंयोवाकोवापिमानवः ॥ ३८ ॥ मुं
डनंचोपवासंचस्नात्वाकुर्वीतभक्तितः ॥ गंगायांभास्करक्षेत्रेचौलेचैवोपनायने ॥ ३९ ॥ श्रीशैलेय
ज्ञदीक्षायांप्रायश्चित्तव्रतेषुच ॥ महागुरुमृतेचैवमहास्वामिमृतौतथा ॥ ४० ॥ जीवत्पितापिकुर्वी
तवपनंश्राद्धमेवच ॥ संवत्सरेद्विमासोनेपुनःक्षेत्रंविशेद्यदि ॥ ४१ ॥ क्षौरोपोषणकादीनिकुर्यादेवनसं
शयः ॥ पश्चिमांबुधितीरस्थंगोकर्णक्षेत्रमुत्तमम् ॥ ४२ ॥ रुद्रेणाधिष्ठितंपुण्यंभास्करक्षेत्रमुच्यते ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

पर्वताग्रेनदीतीरेब्रह्मविष्णुशिवैःश्रिते ॥ ४३ ॥ दुर्गादिबाहुलेचाद्यैस्तद्भास्करमितीर्यते ॥ काशीपु
ष्पागिरिःकांचीनिवृत्ताख्याअलंपुरी ॥ ४४ ॥ श्रीशैलःश्रीविरूपाक्षःसेतुःकेदारएवच ॥ गोकर्ण
चदशैतानिभास्कराण्याहुरुत्तमाः ॥ ४५ ॥ आदौस्नात्वाकोटितीर्थेस्थापयेद्ब्रह्मदंडकम् ॥ क्षौरंकृत्वा
विधानेनस्नानंदशविधंचरेत् ॥ ४६ ॥ भस्मगोमयमृद्वारिपंचगव्यंतथैवच ॥ मलापकर्षणंचैवस्नानं
दशविधंस्मृतम् ॥ ४७ ॥ एवंस्नात्वाविधानेनश्राद्धंकृत्वाविधानतः ॥ ततःसमुद्रेविधिवत्स्नानंकु
र्याद्यथाविधि ॥ ४८ ॥ पृथिव्यांयानितीर्थानिसमुद्रंप्रविशंतिहि ॥ तस्मात्समुद्रोह्यधिकःस्नानमात्रा
द्धिमुक्तिदः ॥ ४९ ॥ सेतौसिंधौसरस्वत्यांगोकर्णेपुरुषोत्तमे ॥ उदन्वदंभसिस्नानंसार्वकालंविधीय
ते ॥ ५० ॥ अन्येषुसर्वक्षेत्रेषुपर्वणिस्नानमाचरेत् ॥ प्रातःकालेह्यन्यदिनेसागरंसस्पृशेत्क्वचित् ॥
॥ ५१ ॥ गोकर्णेनृपशार्दूलसिंधुस्नानंसमाचरेत् ॥ पिप्पलादंकविंकण्वंकृतांतंजीवितेश्वरम् ॥ ५२ ॥
मन्युंचकालरात्रिंचविद्यादुर्गागणाधिपम् ॥ देवान्ऋषीन्पितॄंश्चैवतर्पयित्वाविधानतः ॥ ५३ ॥पु

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

नःस्नानंचकृत्वैवब्राह्मणेभ्योयथाविधि ॥ गोभूतिलहिरण्यादिदानंदद्यात्सदक्षिणम् ॥ ५४ ॥ पितृ
स्थालींसमासाद्यपितॄणांपिंडदोभवेत् ॥ तत्रपिंडप्रदानेनपितरःसर्वएवहि ॥ ५५ ॥ सद्यःप्रयांतिवै
स्वर्गंकुलकोटिसमन्विताः ॥ स्नात्वारुद्रपदेसम्यगर्चयित्वामहाबलम् ॥ ५६ ॥ शृणुयात्तीर्थमाहा
त्म्यंकुर्याच्चनिशिजागरम् ॥ ब्राह्मणान्भोजयेत्पश्चात्स्वयंभुंजीतवाग्यतः ॥ ५७ ॥ ततःसर्वेषुतीर्थे
षुस्नात्वाताल्लिंगमर्चयेत् ॥ त्रयस्त्रिंशत्सुतीर्थेषुत्रयस्त्रिंशद्दिनेषुच ॥५८॥ एकैकंदिवसंस्थित्वाकुर्यादेवं
विधिःस्मृतः ॥ तीर्थानांचत्रयस्त्रिंशत्तेषांनामानिमेशृणु ॥ ५९ ॥ गोकर्णगुहतीर्थंचताम्रगौरीचानि
म्नगा ॥ गायत्रंचतथाब्राह्मंब्रह्मकुंडमतःपरम् ॥ ६० ॥ विश्वामित्रंसंगमंचचक्रंकापिलमेवच ॥
अरण्यमाग्नितीर्थंचवैतापकमतःपरम् ॥ ६१ ॥ कौबेरंनागतीर्थंचपश्चात्सांवर्तकंशुभम् ॥ आदित्य
तीर्थंचशुभंमार्कंडेयमघापहम् ॥ ६२ ॥ दुर्गाकुंडंनागतीर्थंकोटितीर्थमतःपरम् ॥ उन्मज्जनंमहा
तीर्थंनदीवैतरणीतथा ॥ ६३ ॥ अशोकपंचकंपश्चाद्गंगाधारमतःपरम् ॥ भीमाकुंडंतथागस्त्यंव

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

सिष्ठंगारूढंतथा ॥ ६४ ॥ मालिन्याख्यानदीशुक्लाशिंशुमारमिहोच्यते ॥ एकबिंद्वादिबिंदूनांचतु
ष्कंत्वेकमुच्यते ॥ ६५ ॥ एतान्येकैककोटीनांतीर्थानांनायकानितु ॥ ब्रह्मांडोदरतीर्थानिकरैःस्पृष्टा
नितेरवे ॥ ६६ ॥ तेनसत्येनगोकर्णेतीर्थेष्वावाहितोभव ॥ इमंमंत्रंसमुच्चार्यकोटितीर्थादिषुक्रमात्॥
॥ ६७ ॥ स्नानंकुर्याद्यथान्यायंसर्वतीर्थाचनिम्नगा ॥ गायत्रीकोटितीर्थंचब्रह्मकुंडमतःपरम् ॥६८॥
रामतीर्थंसंगमंचअष्टौतीर्थान्यनुक्रमात् ॥ एवंसर्वेषुतीर्थेषुगोकर्णस्थेषुपार्थिव ॥ ६९ ॥ स्नात्वाय
थाक्रमंमर्त्योतत्तल्लिंगंसमर्चयेत् ॥ एवंगोकर्णमासाद्यक्षेत्राविध्यादिकंनृप ॥ ७० ॥ यःकरोतिनरोभ
क्त्यातस्यपुण्यमनंतकम् ॥ इहभुक्त्वामहाभोगान्शिवलोकंव्रजेदसौ ॥७१॥ इतिश्रीस्कांदेगोकर्ण
पुराणेअष्टात्रिंशोऽध्यायः ॥ ३८ ॥ ॥ छ ॥ ॥ ॥ ॥ ॥ ॥
॥ शतानीकउवाच ॥ शंसमेकापिलंतीर्थमुत्पत्तिंचैवशंसमे ॥ अरण्यतीर्थंचविभोशंसनादेश्वरंतथा ॥
॥ १ ॥ अशोकस्याश्रमंब्रूहिलिंगंतीर्थंतथैवहि ॥ अन्येषांचैवसर्वेषांतीर्थानांसूतनंदन ॥ २ ॥ उ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

त्पत्तिंचैवमाहात्म्यंविस्तराद्वक्तुमर्हसि ॥ सूतउवाच ॥ शृणुराजन्प्रवक्ष्यामियत्पृष्टोहमिहत्वया ॥ ती
र्थानांचैवसर्वेषांस्वभावंजन्मभारत ॥ ३ ॥ कपिलायास्तुतीर्थस्यशृणुपूर्वमरिंदम ॥ पूर्वंकृतयुगेराज
न्ग्रहणेभास्करस्यच ॥ ४ ॥ राहुणाराजशार्दूलनक्षत्रेश्रवणाह्वये ॥ पुष्यमासस्यभद्रंतेह्यमायांचाभ
वन्नृप ॥ ५ ॥ यत्राग्गुःसर्वलोकास्तुगोकर्णंप्रतिसुव्रत ॥ इतस्ततोनुधावंतिप्रजाराजन्चतुर्विधाः ॥
॥ ६ ॥ देवासुरमनुष्याश्चगंधर्वाप्सरसस्तथा ॥ नागाःपिशाचायक्षाश्चपशुपक्षिसरीसृपाः ॥ ७ ॥
अगमन्तत्रभूतानिसर्वाणिभरतर्षभ ॥ ग्रहणंद्रष्टुकामानिगोकर्णेतीर्थसत्तमे ॥ ८ ॥ तस्मिन्कालेहरो
देव्यासहितःस्वमुपेयिवान् ॥ तांदृष्ट्वासमितिंराजन्गौरीशंकरमब्रवीत् ॥ ९ ॥ किमिदंदेवदेवेशभूता
नांसमितिःकृता ॥ किमर्थंवैमहादेवअत्रागच्छंतिवैप्रजाः ॥ १० ॥ तामुवाचमहादेवोविगतिस्थः
प्रियांशिवाम् ॥ अद्यापराह्णेग्रहणंभविष्यतिवरानने ॥ ११ ॥ सूर्यस्यदेवितंद्रष्टुंआगच्छंतिचवैप्रजाः ॥
स्नात्वात्रपूज्यमांभक्त्यायेपश्यंतिविभावसुम् ॥ १२ ॥ ग्रस्तंस्वर्भानुनादेविनतेषामस्तिदुर्गतिः ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

मत्प्रसादेनगच्छंतिम्रिताःस्वर्गंनसंशयः ॥ १३ ॥ तस्माद्दितस्ततोभद्रेप्रजादेविचतुर्विधाः ॥ आ
गच्छंत्यनिशंतेषांसमूहामिममत्रवै ॥ १४ ॥ ततोदेवीशिवंनत्वाविस्मितावाक्यमब्रवीत् ॥ एतेस्व
र्गंगमिष्यंतिसर्वेयदिमहेश्वर ॥ १५ ॥ नावकाशंततःस्वर्गेभवतीतिमातिर्मम ॥ ततःप्रहस्यभगवान्
शंकरोभरतर्षभ ॥ १६ ॥ अब्रवीद्गिरिजांदेवोमधुरंवचनंहरः ॥ सर्वेस्वर्गेगमिष्यंतिनात्रकार्याविचार
णा ॥ १७ ॥ पर्यायेणयथाकर्मतथाप्राप्स्यंतिसद्गतिम् ॥ निरयंवामहाभागेपुण्यपापप्रकर्षणात् ॥
॥ १८ ॥ मध्येतेषांगमिष्यंतित्रयोनिर्वाणमद्यहि ॥ नान्येगच्छंतिवैस्वर्गंतामसाभक्तिवर्जिताः ॥
॥ १९ ॥ तेषामल्पतरासिद्धिःकायक्लेशाद्भविष्यति ॥ तीर्थानिदेवताश्चापिभक्त्यातुष्यंतिनान्यथा ॥
॥ २० ॥ तस्मात्सिद्धिकराभक्तिर्भक्तिहीनस्तुपार्थिव ॥ फलंनलभतेदेविनात्रकार्याविचारणा ॥ २१ ॥
स्वर्गापवर्गफलदाभक्तिरेवशुभानने ॥ देवीकुतूहलेनाथह्यपृच्छच्छंकरंमुदा ॥ २२ ॥ तन्मेशंसजग
न्नाथमोक्षंगच्छंतियेप्रभो ॥ ततस्तामब्रवीद्देवोदृश्यतामितिसादरम् ॥ २३ ॥ वृषोभूत्वामहादेवोगौरी

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

मिदमुवाचह ॥ भवत्वंकपिलादेवीएहिभूमिंशुभानने ॥ २४ ॥ इत्युक्त्वातौनृपश्रेष्ठमिथुनंकर्दमां
भसि ॥ अर्धमग्नमभूद्राजन्मार्गेतेषांनृपोत्तम ॥ २५ ॥ तंदेशमगमत्कश्चित्पुरुकुत्सइतिद्विजः ॥
सार्धंजनैर्बहुविधैर्मिथुनंतद्ददर्शह ॥ २६ ॥ दृष्ट्वातत्प्राहतान्विप्रःकृपयातिपरिप्लुतः ॥ इदंगोमिथुनंल
ग्नंपंकेमहतिपश्यत ॥ २७ ॥ उद्धृत्येदंवयंसर्वेपश्चाद्यास्यामहेजनाः ॥ गतायथेच्छंराजेंद्रकालाति
क्रमशंकया ॥ २८ ॥ गतास्तेराजशार्दूलपुरुकुत्संविनाचवै ॥ पुरुकुत्सोपिमतिमान्कर्दमंतंविवेशह॥
॥ २९ ॥ प्रविश्योद्धर्तुकामस्तन्महद्यत्नंसमारभत् ॥ शक्तोनतस्माद्राजेंद्रयत्नवानापिसाद्विजः ॥३० ॥
उद्धर्तुंचालितुंवापिततोदुःखमुपागमत् ॥ तस्मिन्तथावर्त्तमानेआत्रेयोनामवैद्विजः ॥ ३१ ॥ सार्थेनम
हतासार्धंततस्तंदेशमागमत् ॥ तंदृष्ट्वापुरुकुत्सस्तुआहूयेदमभाषत ॥ ३२ ॥ इदंगोमिथुनंलग्नंपंकेमह
तिपश्यत ॥ इदमुत्धृत्यवेगेनयास्यामःसहितावयम् ॥ ३३ ॥ आत्रेयस्तुतथेत्युक्त्वेह्यन्येनैच्छंतितह
चः ॥ यथेच्छंवैगतास्तेहिआत्रेयःप्रविवेशह ॥३४॥ ततस्तौद्विजशार्दूलौयत्नवंतौबभूवतुः ॥ अशक्तवं ॥११०॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तौराजेंद्रततोदुःखमुपागतौ ॥३५॥ ततःपुनरमेयात्मासुहोत्रोनामवैद्विजः ॥ धर्मज्ञशीलवान्राजन्सतं
देशमुपागमत् ॥ ३६॥ महत्यात्वरयायुक्तोद्रष्टुंग्रस्तंविभावसुम् ॥ सैंहिकेयेनभद्रंतेराहुणाराजसत्तम
॥ ३७ ॥वृंदैःपरिवृतःसोथददर्शमहदद्भुतम् ॥ पंकलग्नंगोमिथुनंतदुद्धारौद्विजोत्तमौ ॥३८॥ कृपयापर
याविष्टस्तस्मिन्नेवपपातह ॥ सुहोत्रःपुरुकुत्सश्च आत्रेयश्चमहायशाः ॥ ३९ ॥ तेवैगोमिथुनंतस्मादुत्धृत्य
नृपपुंगव ॥ अपंकेदेशमानीयविससर्जुर्द्विजोत्तमाः ॥४०॥ संमृज्यतस्तेश्चांगानिसांत्वयंतश्चतेद्विजाः
॥ हेमातइतितेविप्राऊचुःपुनरितिद्विजाः ॥ ४१ ॥ तैःसांत्वमानोभगवान्नीलकंठउमापतिः ॥ प्र
त्यक्षमगमत्तेषांदेव्यासार्धमहामते ॥ ४२ ॥ उत्धृत्यतान्द्विजवरान्स्वीचकारतनौशिवः ॥ तेप्रवि
श्यमहादेवंमुक्तिस्थानमनुत्तमम् ॥ ४३ ॥ तस्मिन्निर्वाणमगमन्नीश्वरास्तेबभूविरे ॥ यत्रगोमिथुनं
लग्नंतीर्थंतत्कापिलंविदुः ॥ ४४ ॥ तत्रस्नात्वानरोभक्त्याअश्वमेधफलंलभेत् ॥ त्रिजन्मचरितंपाप
मल्पंवायदिवाबहु ॥ ४५ ॥ श्रवणेपुष्यमासस्यस्नातानांतत्रनश्यति ॥ मासिभाद्रपदेकृष्णेषष्ठीभौ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

मार्कसंयुता ॥ ४६ ॥ रोहिणीपातयुक्ताचेत्साषष्ठीकपिलास्मृता ॥ तस्मिन्कालेनृपश्रेष्ठतीर्थेकापिल
संज्ञके ॥ ४७ ॥ स्नानंकुर्वंतियेभक्त्यातेभवाब्धितरंतिवै ॥ इतिश्रीस्कांदेगोकर्णपुराणेएकोनचत्वा
रिंशोऽध्यायः ॥ ३९ ॥ ॥छ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥
॥ सूतउवाच ॥ अरण्यतीर्थस्यविभोप्रभावंशृणुपार्थिव ॥ अरण्योनामराजासीत्पुराकृतयुगेमहा
न् ॥ १ ॥ चिरंराज्यश्रियंभुक्त्वाविषयाननुभूयसः ॥ ततोविरक्तोभोगेषुतपसेकृतमानसः ॥ २ ॥
पुत्रेराज्यधुरंन्यस्यययौगोकर्णनामकम् ॥ क्षेत्रंभरतशार्दूलअरण्योनृपसत्तमः ॥ ३ ॥ तत्राश्रमपदंकृ
त्वातपस्तेपेसुदुश्चरम् ॥ तपसामहतातस्यतुतोषभगवान्हरः ॥ ४ ॥ प्रत्यक्षमगमत्तस्यवचनंचेदमब्र
वीत् ॥ प्रसन्नंविद्धिमांराजन्ददाम्यभिमतंतव ॥ ५ ॥ यत्त्वंनृपवरंब्रूहिवरंमत्तोभिकांक्षसि ॥ ततःप्र ॥१११॥
णम्यराजर्षिर्देवदेवमुमापतिम् ॥ ६ ॥ प्राहेदंतमदीनात्माप्रीतंदृष्ट्वामहेश्वरम् ॥ सिद्धिमिच्छामिदेवे
शदेहितन्मह्यमप्युत ॥ ७ ॥ तीर्थंचेदंनृपश्रेष्ठसर्वपापहरंभवेत् ॥ इत्युक्तस्तेनतंदेवस्तथास्त्वित्य

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ब्रवीद्वचः ॥ ८ ॥ इतिदत्त्वावरंतस्मैशंकरोंरतधीयत ॥ अरण्योराजशार्दूलस्तत्रासिद्धःसनातनः
॥ ९ ॥ तन्नाम्नाचाभवत्ख्यातंतीर्थंत्रैलोक्यपावनम् ॥ अरण्यतीर्थमारण्यमाश्रमंचमहोदयम् ॥१०॥
कापिलस्यतुतीर्थस्यदक्षिणेनकुरूद्वह ॥ अभवच्छरपातात्तुपवित्रंपापनाशनम् ॥ ११॥ तत्रस्नात्वान
रोराजन्नग्निष्टोमफलंलभेत् ॥ आजन्मचरितंपापंतत्रस्नानाद्विनश्यति ॥ १२ ॥ पितॄनुद्दिश्ययस्तत्र
ददातिचजुहोतिच ॥ तदक्षयंपितॄणांहिभविष्यतिनसंशयः ॥ १३ ॥ ततःपरंकुरुश्रेष्ठशृणुनादेश्वरंप
रम् ॥ सुनादोनामविप्रेंद्रःपूर्वंस्वारोचिषांतरे ॥ १४ ॥ आसीत्पातालमगमत्सुतलंनामभारत ॥
समहात्मामहाबुद्धिःकामचारीद्विजोत्तमः ॥ १५ ॥ सुतलेविचरन्सोथददर्शपरमेश्वरम् ॥ लिंगमु
त्तिधंसाक्षाज्ज्वलंतंस्वेनतेजसा ॥ १६ ॥ सूर्यानलसमंराजन्नमृतस्पंदनंसदा ॥ अंगुष्ठमात्रंतल्लिंगं
दृष्ट्वाविस्मयमागतः ॥ १७ ॥ मणिनागस्यभद्रंतेतस्यवेश्मनिभारत ॥ सुनादस्तंनागराजमभ्यगच्छ
न्महातपाः ॥ १८ ॥ मणिनागोपितंदृष्ट्वाअभ्युत्थायासनंददौ ॥ पूजयामासतंसम्यगर्घ्यपाद्यादिभि

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

नृप ॥ १९ ॥ उवाचतंद्विजश्रेष्ठंस्वागतंतेद्विजोत्तम ॥ किमागमनकृत्यंतेब्रूहिताद्दितराम्यहम् ॥
॥ २० ॥ सुनादस्तंनागराजमब्रवीत्प्रीतिसंयुतः ॥ किमिदंतेनागराजतेजसाज्वलतेमहान् ॥ २१॥
लिंगमूर्तिधरःसाक्षान्नीलकंठइवापरः॥ तच्छ्रुत्वानागराजस्तुवचनंब्राह्मणस्यहि ॥ २२ ॥ तंप्रणम्य
महाभागमिदंवचनमब्रवीत् ॥ श्रूयतांद्विजशार्दूलसर्वदेवमयंत्विदम् ॥२३॥ अमृतेमथ्यमानेतुसंभू
तंलिंगमुत्तमम् ॥ सार्धवस्तुभिरन्यैस्तुबहुभिर्द्विजसत्तम ॥ २४ ॥ एकैकंजगृहुस्तस्मात्सुरासिद्धा
दयस्तदा ॥ अश्वमप्सरसश्चैवनागराजमतःपरम् ॥ २५ ॥ अगृह्णदिंद्रोभगवान्ब्रह्मोंकारमगृह्णत ॥
लक्ष्मीश्चकौस्तुभंरत्नंगृहीतंविष्णुनाप्रभो ॥ २६ ॥ बालेंदुश्चत्रिषंचोग्रंगृहीतंचात्रशंभुना ॥ एवंस
मस्तरत्नानिस्वंस्वंभागमगृह्णत ॥ २७ ॥ ततःपितामेभगवान्काश्यपस्तपसांनिधिः ॥ जग्राहेदंतदा ॥११२॥
दिव्यंलिंगंमाणिमयंशुभम् ॥ २८ ॥ आराधयामासचिरंपितामममहातपाः ॥ अनन्यदुर्लभांविप्रासि
द्धिमापचकाश्यपः ॥ २९ ॥ तस्मिन्प्रत्यक्षमगमच्छिवःसाक्षात्सनातनः ॥ प्रीतःकाश्यपमाहेदं

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

भगवान्वृषभध्वजः ॥ ३० ॥ सिद्धिंप्राप्तोसिपरमांकिंभूयस्तेददाम्यहम् ॥ ततस्तुकाश्यपोराज
न्प्राणिप्रत्यकृतांजलिः ॥ ३१ ॥ उवाचवचनंश्लक्ष्णंप्रसन्नंगोवृषध्वजम् ॥ तस्मिन्लिंगेभवान्देवानि
त्यंभवितुमर्हसि ॥३२॥ सांनिध्यमेवतेदेववरमेतद्वृणोम्यहम् ॥ यदिप्रसन्नोभगवान्तन्मह्यंदातुमर्हसि
॥३३॥ तच्छ्रुत्वावचनंतस्यदेवदेवउमापतिः ॥ तथास्त्वितिवरंदत्वासान्निध्यमकरोत्प्रभुः ॥ ३४ ॥ त
स्मिन्मणिमयेलिंगेरमतेचमहेश्वरः ॥ तन्मह्यमददाद्दिप्रपिताप्रीतेनचेतसा ॥३५॥ उक्तंचददतातेनइदं
पित्रामहात्मना ॥ सुनादोनामवैविप्रोयदायातिगृहंतव ॥ ३६ ॥ तदाम्न्मान्यदातव्यमिदंमाणिमयंशिव
म् ॥ यावन्नयाचतेलिंगंतावत्तुभ्यंमहाद्युते॥३७॥ससिद्धिंदास्यतिविभोगृहीत्वालिंगमुत्तमम् ॥ एवमुक्तं
काश्यपेनपित्राममममहात्मना ॥३८॥ तस्माद्गृहाणविप्रेंद्रप्रसादसुमुखोभव ॥ सूतउवाच ॥ ततःसुनादो
भगवान्काश्यपस्यात्मसंभवात् ॥३९॥ तद्गृहीत्वामहालिंगंदिव्यंमाणिमयंशुभम् ॥ प्रीतःप्रसन्नमनसाअ
हीश्वरमभाषत ॥४०॥वरंब्रूहिमहाभागमनसायद्यदिच्छसि ॥ दातास्मतेनागराजयद्यपिस्यात्सुदुर्लभ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

म् ॥४१॥ ततःप्रणम्यतंनागइदंवचनमब्रवीत् ॥ वरंज्ञानंपरांसिद्धिंपरमार्थंचसत्तम ॥४२॥ इच्छामित्व
त्प्रसादेनतन्मह्यंदातुमर्हसि ॥ तच्छ्रुत्वाथसुनादोवैनागराजमभाषत॥४३॥याचितंयत्त्वयानागतत्सर्वंते
भविष्यति ॥ इत्युक्त्वातंसुनादोपिययौस्वैरगतिर्द्विजः ॥ ४४ ॥ सुतलान्निर्गतःसोथगोकर्णसमुपाग
मत् ॥ आगत्यतत्रविप्रेंद्रःकृत्वाश्रमपदंशुभम् ॥ ४५ ॥ आराधयामासविभोर्लिंगंतदमृतोद्भवम् ॥
आराध्यसुचिरंकालंतपसामहतानृप ॥ ४६ ॥ प्रत्यक्षीकृत्यलोकानामीशानंप्रत्यभाषत ॥ सुनाद
उवाच ॥ लयमिच्छामिदेवेशत्वय्येवेत्यब्रवीद्वचः ॥ ततोमहेश्वरस्तस्मैददौसायुज्यमात्मनि ॥ ४७ ॥
ततःसुनादोभगवान्स्वयमेवाशिवोभवत् ॥ नादेश्वरमितिख्यातंतल्लिंगंपार्थिवोत्तम ॥ ४८ ॥ अध
स्तादवनेराजन्निदानींतत्रवर्त्तते ॥ ताड्यमानेपदातत्रनादयत्यवनीतलम् ॥ ४९ ॥ असिद्धास्तं
नपश्यंतिसिद्धाःपश्यंतितंनृप ॥ तीर्थंचतत्रतस्यैवनादतीर्थमितिश्रुतम् ॥ ५० ॥ अस्तिपुण्यप्रदंराज
न्सर्वकामप्रदंनृणाम् ॥ कार्तिकेशुक्लपक्षेतुएकादश्यांनृपोत्तम ॥ ५१ ॥ तत्रस्नात्वाश्वमेधस्यफलंविंदति

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

मानवः ॥ आजन्मचरितंपापंतत्रस्नानाद्विनश्यति ॥ ५२ ॥ दृष्टमात्रेणतल्लिंगंस्वर्गंगच्छतिदेहिनः ॥
विधूयसर्वपापानिब्रह्महत्यादिकान्यपि ॥ ५३ ॥ नावकाशमभूत्स्वर्गेदेवानामत्रनीपते ॥ संचिंत्य
देवैर्मुनिभिर्गोपितंतदभूद्भुवि ॥ ५४ ॥ तदेतत्कोटितीर्थात्तुउदीच्यांदिशिविद्यते ॥ ५५ ॥ ॥ इति
श्रीस्कांदेगोकर्णपुराणेचत्वारिंशोऽध्यायः ॥ ४० ॥ ॥ ॥ ॥ ॥ ॥
॥ सूतउवाच ॥ अतःपरमशोकस्यतीर्थंशृणुकुरूद्वह ॥ अशोकोनामराजर्षिःप्लक्षद्वीपाधिपःपुरा ॥
॥ १ ॥ पौत्रोमेधातिथेश्चैवपुत्रःपारावतस्यच ॥ तस्यचासीत्पुत्रशतमशोकस्यमहात्मनः ॥ २ ॥
तेषामपिमहावीर्यापुत्रपौत्रादिसंततिः ॥ कन्याशतंचतस्यासीदशोकस्यमहात्मनः ॥ ३ ॥ तेषांपु
त्रैश्चपौत्रैश्चदेशःसर्वोपिपूर्यत ॥ सतैःसर्वैःपरिवृतोबुभुजेविषयान्प्रियान् ॥ ४ ॥ रंजनात्सर्वलोकानां
राजासीत्पृथिवीपतिः ॥ अक्षोहिण्योनृपस्यासन्बन्ध्यस्तस्यवशानुगाः ॥ ५ ॥ ततस्तस्माद्दशगु
णःसुमतिर्नामपार्थिवः ॥ अशोकस्यपुरींरुध्वातेनराज्ञामहत्तरम् ॥ ६ ॥ युद्धंचकारसुचिरमशो

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

केनमहात्मना ॥ अहिंसयित्वानृपतिमशोकंपार्थिवोत्तमम् ॥ ७ ॥ सेनांविदारयामासपुत्रपौत्रा
दिभिःसह ॥ ततःसंत्यज्यसर्वाणिवस्तूनिसनृपोत्तमः ॥ ८ ॥ सशोकःस्वपुरींराज्यंविहायैकोमहा
मनाः ॥ अश्वरत्नंसमारुह्यविवेद्धंभरतर्षभ ॥ ९ ॥ अग्नेःप्रसादाल्लब्धंतुरम्यंकामगमंपुरा ॥ वायु
वेगंमहासत्वंवायोस्तुल्यबलंमहत् ॥ १० ॥ तेनाश्वेनागतोराजाजंबूद्वीपंप्रतिप्रभो ॥ वर्षाण्यस्मि
न्नवविभोजंबुद्वीपेकुरूद्वह ॥ ११ ॥ विहायतानिवर्षाणिभारतंखंडमागमत् ॥ कर्मभूमिरियंराजन्त
दन्याभोगभूःस्मृता ॥ १२ ॥ श्रेष्ठंतत्रापिगोकर्णमितिमत्वातदागमत् ॥ शतशृंगगिरिंप्राप्यदेव
गंधर्वसेवितम् ॥ १३ ॥ पितामहानांराजेंद्रतत्रदृष्ट्वाश्रमंशुभम् ॥ चतुर्णामात्मतश्चैवतत्रदृष्ट्वापिताम
हान् ॥ १४ ॥ अग्निद्युतिंचाग्निबाहुंमेधाश्वंचतथापुरुम् ॥ अवरुह्यहयात्तूर्णंववंदेस्वपितामहान् ॥११४॥
॥ १५ ॥ प्रियव्रतस्यपुत्रास्तेअशोकस्यपितामहाः ॥ मुक्तिकामास्तपस्यंतोभ्रातरस्तेनृपोत्तम
॥ १६ ॥ दृष्ट्वातेभ्रातरःपौत्रमाशीर्भिरभिनंद्यतम् तैःपूजितःसराजार्षिःस्ववृत्तांतंन्यवेदयत् ॥ १७ ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तच्छ्रुत्वातेकृपाविष्टाःपौत्रस्यवचनंतदा ॥ तमूचुस्तपसापुत्र आराधयमहेश्वरम् ॥ १८ ॥ अत्रस्थस्त्वं
नृपश्रेष्ठसतेशोकंप्रहास्यति ॥ व्रतैर्बहुविधैराजन्रुद्रोक्तैःसर्वकामदैः ॥ १९ ॥ सतेमनोरथंराजन्प्र
दास्यतिनसंशयः ॥ अस्माकंतपसापुत्रक्षिप्रंद्रक्ष्यसिशंकरम् ॥ २० ॥ सूतउवाच ॥ अशोकस्तुतथेत्यु
क्त्वाकृत्वाश्रमपदंशुभम् ॥ व्रतोपवासनियतोयथोक्तंचपितामहैः ॥ २१ ॥ तथाचकारसतपःशिव
ध्यानपरायणः ॥ ततोद्वादशवर्षाणितैःसार्धंपृथिवीपतिः ॥ २२ ॥ तपोग्निनादह्यमानःशिवमाराधय
त्प्रभो ॥ तुतोषतपसातस्यतेषांचापेक्षयाहरः ॥ २३ ॥ प्रत्यक्षमगमत्तेषांसंनिधौतस्यपार्थिव ॥
तेदृष्ट्वादेवदेवेशंशूलपाणिमुमापतिम् ॥ २४ ॥ द्वादशादित्यसंकाशंज्वलंतंतेजसाविभुम् ॥ शिरोभि
रवनींगत्वाप्रणेमुस्तेमहर्षयः ॥ २५ शरणंभवदेवेशअशोकस्यातिसत्तम ॥ ततस्तेषांवचःश्रुत्वाता
नाहभगवान्शिवः ॥ २६ ॥ वरंब्रूतमहाभागास्तद्ददाम्यविलंबितम् ॥ इत्युक्तेशूलिनाराजाप्रणम्ये
नंवचोब्रवीत् ॥ २७ ॥ अशोकइतिमेनामप्रथितंवृषभध्वज ॥ पुत्रैःपौत्रैःपरिवृतोदौहित्रैरपिशंकर

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

॥ २८ ॥ मोदमानःस्थितोराज्येदुःखानामाविशारदः ॥ मृतास्तेयमहादेवह्रतंराज्यंपरैर्मम ॥ २९ ॥
स्फीतंसर्वधनंदेवविहायैकस्त्रिलोचन ॥ शोकेनमहतादेवआविष्टःपार्वतीपते ॥ ३० ॥ इहाग
तोस्मिदेवेशत्वामहंशरणंगतः ॥ पितामहैर्ममाविभोसंगत्यसुरसत्तम ॥ ३१ ॥ तेषामेवप्रभावेण
त्वामहंदृष्टवानज ॥ अतःपरंममविभोयत्कृत्यंतत्प्रयच्छनः ॥ ३२ ॥ ततस्तमाहराजानंशंकरःप्रणया
दिदम् ॥ जीवंतुसुहृदस्तेवैयेमृतानृपतेयुधि ॥ ३३ ॥ मत्प्रसादादरीन्सर्वान्त्वजेष्यसिनसंशयः ॥
शोकोनभवितातातअद्यप्रभृतिसुव्रत ॥ ३४ ॥ प्रसादान्ममराजेंद्रसिद्धिर्भवतुशाश्वती ॥ आश्र
मंतवराजेंद्रलोकेख्यातिंगमिष्यति ॥ ३५ ॥ तीर्थंचतवनाम्नेदंख्यातंभवतुपार्थिव ॥ पूर्वेषांतव
राजेंद्रआश्रमाणिमहांतिच ॥ ३६ ॥ तीर्थानितेषांराजेंद्रतत्तत्संज्ञाभिरप्युत ॥ भवंतुमत्प्रसादेनसर्व
पापहराणिवै ॥ ३७ ॥ वैशाखेतुविशाखायामेषुस्नात्वानरोत्तमाः ॥ अशोकेशंपूजयंतिगंधपुष्पाक्षता
दिभिः ॥ ३८ ॥ मत्प्रसादेनतेशोकंसप्तजन्मानिनाप्नुयुः ॥ सप्तजन्मकृतात्पापात्स्नात्वाशुध्यंतिते

॥११५॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

नराः ॥३९॥ गच्छत्वंपालयविभोराज्यंनिहतकंटकम् ॥ पुत्रैःपौत्रैःपरिवृतोदारैर्ज्ञातिबांधवैः॥४०॥
सहितःसर्वभूतैस्त्वंचिरंपालयमेदिनीम् ॥ इतिदत्वावरंशंभुरशोकायनृपोत्तम ॥ ४१ ॥ अनुमान्य
चराजर्षिन्तत्रैवांतरधीयत ॥ अग्नियुतेस्तथातीर्थमाग्निबाहोस्तथैवच ॥ ४२ अशोकतीर्थमन्यच्चसर्व
शोकविनाशनम् ॥ अशोकपंचकमितिसर्वलोकेषुविश्रुतम् ॥ ४३ ॥ अशोकपंचकेस्नात्वाअशो
केशंसमर्चयेत् ॥ सर्वेषामेवदुःखानांध्वंसोभवतिनिश्चयात् ॥ ४४ ॥ अशोकेशस्यमाहात्म्यंयेशृण्वं
तिनराभुवि ॥ तेषांनृपसुखध्वंसोजायतेनकदाचन ॥ ४५ ॥ इतिश्रीस्कांदेगोकर्णपुराणेएकच
त्वारिंशोऽध्यायः ॥ ४१ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥
॥ सूतउवाच ॥ तस्मादाग्नेयदिग्भागेक्रोशमध्येस्तिनिम्नगा ॥ कामाघनाशिनिनामासर्वपापहराशु
भा ॥ १ ॥ तस्यांस्नात्वापुराकामोगोकर्णक्षेत्रमागमत् ॥ हरेकृतमहद्द्रोहाद्विमुक्तोमन्मथोनृप ॥२॥
॥ शौनकउवाच ॥ ईश्वरेतुकथंद्रोहोमन्मथेनकृतोविभो ॥ कामाघनाशिनीनाम्नीकथंजातानदीशु

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

भा ॥ ३ ॥ कथंस्नानंसमकरोत्कथंक्षेत्रंगतःप्रभो ॥ सूतउवाच ॥ शृणुशौनकवक्ष्यामियत्पृष्टोहंत्वया
नघ ॥ हरकोपाग्निनादग्धःपूर्वंकामःशुचान्वितः ॥ ४ ॥ शिवेकृतस्वाघशांत्यैत्रिःपरीत्यधरामिमाम् ॥
क्षेत्रस्यास्यप्रवेशेतुह्यनार्होपिमनोभवः ॥ ५ ॥ तस्मात्क्षेत्राद्बहिःस्थित्वातपस्तीव्रमतप्यत ॥ दिव्य
वर्षसहस्रंतुलिंगंकृत्वाविधानतः ॥ ६ ॥ पूजयामाससमदनोशिवध्यानपरायणः ॥ ततस्तुष्टोमहादेवः
प्रत्यक्षमगमत्तदा ॥ ७ ॥ दृष्ट्वानेत्रपथेशंभुंहर्षोत्कर्षसमान्वितः ॥ तुष्टाववाग्भिरिष्टाभिःकृतांजलि
पुटःस्थितः ॥ ८ ॥ नमःशिवायशुद्धायशांतायहरयेनमः ॥ शंकरायशरण्यायत्रिनेत्रायनमोनमः
॥ ९ ॥ सृष्टिस्थितिविनाशानांहेतवेपरमात्मने ॥ देवदेवनमस्तेस्तुपशूनांपतयेनमः ॥ १० ॥
देवानांवचनात्पूर्वंत्वयिद्रोहमकारिषम् ॥ तद्दोषशांतिर्मेभूयाच्छरीरंचव्रणेप्रभो ॥ ११ ॥ क्षेत्रस्यांतःप्र
वेशंचस्थितिंपूज्यांचतत्रभो ॥ त्वत्पदांबुजभक्तिंचत्वद्भक्तानांचसंगमम् ॥ १२ ॥ तच्छ्रुत्वावचनं
शंभुःप्रीत्याहमकरध्वजम् ॥ वसुदेवगृहेसाक्षाद्भगवान्कमलापतिः ॥ १३ ॥ यदावतरणंकुर्यात्तस्य

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

पुत्रत्वमाप्नुहि ॥ गोकर्णांतःप्रवेशार्हप्रायश्चित्तंकरोम्यहम् ॥ १४ ॥ इत्युक्त्वाभगवान्शंभुःस्वकर
स्थरुजातदा ॥ खानितेभूतलेगंगापातालादूर्ध्वमागता ॥ १५ ॥ उवाचचपुनःकामंशंकरोवृषवा
हनः ॥ नमःशुद्धायशांतायहर्येपरमात्मने ॥ १६ ॥ सृष्टिस्थितिविनाशानांकारणायनमोनमः ॥
इमंमंत्रंसमुच्चार्यस्नात्वाकामाघनाशिनीम् ॥ १७ ॥ अस्मद्रोहोद्भवात्पापात्तत्क्षणान्मुच्यतेनरः ॥ त
स्मात्स्नानंकुरुष्वात्रसर्वपापाद्विमुच्यसे ॥१८॥ श्रुत्वेत्थंवचनंशंभोःस्नानंकृत्वायथाविधि ॥ निर्मलःशां
तहृदयःशिवभक्तिसमन्वितः ॥ १९ ॥ तत्क्षणादभवत्कामःशिवस्तुतिपरायणः ॥ हरशंभोमहादेव
विश्वेशामरवल्लभ ॥ २० ॥ शिवशंकरसर्वेशभक्तवत्सलपाहिमाम् ॥ इतिस्तुत्वाहरंभक्त्यावरमन्यम
याचत ॥ २१ ॥ लिंगमेतत्पूजकानांकामदंभवतुप्रभो ॥ कामेश्वराभिधानेनसर्वसिद्धिप्रदोस्तुवै
॥ २२ ॥ अवनाशननाम्नीयंनदीनांप्रवराभवेत् ॥ चैत्रमासिसितेपक्षेत्रयोदश्यांतुयोनरः ॥ २३ ॥
स्नात्वात्रपूज्यकामेशंसर्वान्कामानवाप्नुयात् ॥ इतिकामेरितंश्रुत्वाशंकरःप्रत्यभाषत ॥ २४ ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

यदुक्तंभवतासर्वंतद्ब्रवेन्मन्मथाधुना ॥ ब्रह्महागुरुतल्पीचस्वर्णस्तेयीचमानवः ॥ २५ ॥ सुरापान
रतोवापिसंयुक्तोप्युपपातकैः ॥ स्नात्वात्रपूज्यकामेशंसर्वान्कामानवाप्नुयात् ॥ २६ ॥ सर्वपाप
विनिर्मुक्तोयात्राहःसभवेद्ध्रुवम् ॥ गोकर्णस्यद्विजश्रेष्ठकिमुसन्मार्गवर्त्तिनः ॥ २७ ॥ इतिदत्वावरा
न्शंभुर्मन्मथंपुनरब्रवीत् ॥ मयासाकंप्रविशभोगोकर्णमामकंस्मर ॥ २८ ॥ श्रुत्वेत्थंदेवदेवेनसाक
मायात्तुमन्मथः ॥ क्षेत्रंप्रविश्यगोकर्णंदृष्ट्वासर्वंशिवात्मकम् ॥ २९ ॥ कोटितीर्थस्यसान्निध्येकिंचिद्द
रिहरालयात् ॥ उदीच्यांदिशिकामस्तुकृत्वाश्रमपदंशुभम् ॥ ३० ॥ लिंगंतत्रप्रतिष्ठाप्यपूजायि
त्वामहेश्वरम् ॥ सिद्धिंप्राप्यहरात्तत्रकृतकृत्योभवत्तदा ॥ ३१ ॥ कामेश्वराभिधंलिंगंदर्शनात्पूजना
दपि ॥ सर्वकामप्रदंराजन्सर्मापद्विनिमोचनम् ॥ ३२ ॥ सूतउवाच ॥ श्लेष्मातकमितिख्यातंवनं
सिद्धनिषेवितम् ॥ दक्षिणस्यांतुराजेंद्ररुद्रयोन्यास्थितंशुभम् ॥ ३३ ॥ पौलस्त्यास्तत्रतद्धवैबहवः
सिद्धिमागताः ॥ तत्रस्थोरावणोराजन्परांसिद्धिमुपागतः ॥ ३४ ॥ तन्माहात्म्यंवदाम्यद्यशृणुष्वनृप

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

पुंगव ॥ पुरापुलस्त्यनामाभूद्ब्रह्मणोमानसःसुतः ॥३५॥ तृणबिंद्वाभिधानस्यराजर्षेःकस्यचित्सुताम् ॥
उपयेमेविधानेनमुनिस्तांवरवर्णिनीम् ॥ ३६ ॥ तस्यांविश्रवसंनामतनयंसोऽभ्यजीजनत् ॥ सविश्रवास्त
पोनिष्ठोगुणैःसर्वैःपितुःसमः ॥ ३७ ॥ उपयेमेभरद्वाजतनयांवरवर्णिनीम् ॥ तस्यांवैश्रवणोनामपुत्रो
विश्रवसोह्यभूत् ॥ ३८ ॥ सचिरायतपस्तेपेब्रह्माणंप्रतिभारत ॥ तस्मात्समानमैश्वर्यंविमानंपुष्पका
भिधम् ॥ ३९ ॥ लब्ध्वालंकामब्धिमध्येनिवासायपुरीमपि ॥ लोकपालत्वमददात्तस्यतुष्टःपितामहः
॥ ४० ॥ धनानामीश्वरत्वंच अमरत्वंचदत्तवान् ॥ सुमालीराक्षसेंद्रोथदृष्ट्वावैश्रवणंनृप ॥ ४१ ॥ तत्सं
पदर्थीमतिमान्स्वसुतामिदमब्रवीत् ॥ पुत्रिकैकेशिभद्रंतेकुबेरोविश्रवःसुतः ॥ ४२ ॥ अस्मल्लंकापुरीं
लब्ध्वामहदैश्वर्यवान्खलु ॥ त्वंहिविश्रवसंपुत्रिपतित्वेवरयाधुना ॥ ४३ ॥ तवापितादृशःपुत्रोभाविष्य
तिनसंशयः ॥ सातथेतिप्रतिज्ञायगताविश्रवसोंतिकम् ॥ ४४ ॥ तांदृष्ट्वाविश्रवाराजन्सम्पृच्छन्महात
पाः ॥ कासिभद्रेकुतश्चासिकिमर्थंचागतावनम् ॥ ४५ ॥ सातमाहानवद्यांगीराक्षसेंद्रसुतास्म्यहम् ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

पित्रासुमालिनाविप्रप्रेषितात्वामिहागता ॥४६॥ कन्याहंकैकशीनामशेषंत्वंज्ञातुमर्हसि ॥ ततोमुनि
र्ज्ञानदृष्ट्याज्ञात्वातस्यामनोगतम् ॥ ४७ ॥ विश्रवास्तामुवाचेदंपुत्रकामासिभामिनि ॥ अतीवदारुणे
कालेयस्मान्मांप्रत्युपागता ॥४८॥ तस्मात्क्रूराभविष्यंतिपुत्रास्तवशुभानने॥ ततःकनीयान्धर्मज्ञःपुत्रो
वंशकरोभवेत् ॥ ४९ ॥ ततस्तेनैवमुक्ताचस्थिताभर्तृसमीपतः ॥ तस्यामभूत्क्रूरकर्माराक्षसोतिविदा
रुणः ॥ ५० ॥ दशास्योविंशतिभुजोनलिांजनचयोपमः ॥ ततश्चकुंभकर्णोभून्महाकायोमहाबलः
॥ ५१ ॥ ततःशूर्पनखाजज्ञेदारुणातिविभीषणा ॥ ततोबिभीषणोजज्ञेसाक्षाद्धर्मइवापरः ॥ ५२ ॥
एवंतेराक्षसाराजन्बभूवूरावणादयः ॥ गोकर्णक्षेत्रमासाद्यतपस्तेपुर्महाबलाः ॥ ५३ ॥ शिरांसिस्वा
निविच्छिद्यजुहावदशकंधरः ॥ कुंभकर्णोपिराजेंद्रधर्मबुद्धिर्बिभीषणः ॥ ५४ ॥ तेषांतपःप्रभावेण
ब्रह्माप्रत्यक्षतांगतः ॥ ददौतेषांवरंब्रह्मायथाभिलषितंनृप ॥ ५५ ॥ अणिमादिमहासिद्धिमायुर्यो
गंचरावणः ॥ अवध्यत्वंसर्वभूतैर्ऋतेमानुषजातितः ॥ ५६ ॥ कुंभकर्णोमहानिद्रांववेपापमतिस्त

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

दा ॥ बिभीषणोऽपिधर्मात्मावव्रेधर्ममतिंनृप ॥ ५७ ॥ अमरत्वंविष्णुभक्तिंलब्धवान्सबिभीषणः ॥
इतिदत्वावरंब्रह्मातत्रैवांतरधीयत ॥ ५८ ॥ सूतउवाच ॥ रावणेशादिलिंगानिसर्वसिद्धिकराणि
भो ॥ येपूजयंतिमनुजादीर्घायुष्याभवंतिते ॥ ५९ ॥ गोकर्णेतद्वनंश्लेष्मंसर्वसिद्धनिषेवितम् ॥
तत्रश्लेष्मातकेसिद्धान्निबोधकुरुनंदन ॥ ६० ॥ हेतिर्नाममहारक्षःप्रहेतिश्चमहारथः ॥ विद्युत्केशों
बरीषश्चपुलस्त्योविश्रवामुनिः ॥ ६१ ॥ राजराजश्चयक्षेंद्रोविश्वाचित्तिर्विदूरतः ॥ एतेचान्येचबह
वस्तत्रसिद्धिमुपागताः ॥ ६२ ॥ सूतउवाच ॥ एवंलब्ध्वावरंरक्षोऐश्वर्यबलदर्पितः ॥ रावणो
मातृवाक्येनबहुदैत्यसमन्वितः ॥ ६३ ॥ ससंगरेवैश्रवणंविजित्यसहसैनिकम् ॥ अपहृत्यपुरींलं
कांविमानमपिपुष्पकम् ॥ ६४ ॥ लंकायांवसतिंकृत्वाबुभुजेविषयान्प्रियान् ॥ निर्यासितोवैश्रवणो
रावणेनदुरात्मना ॥ ६५ ॥ गोकर्णेतुतपस्यंतंपितरंचागमत्ततः ॥ प्रणम्यपितरंसर्वंकृतंयत्तेनरक्षसा
॥ ६६ ॥ न्यवेदयदमेयात्माततस्तंप्राहविश्रवाः ॥ गोकर्णेत्रतपस्तप्त्वाप्रत्यक्षीकुरुशंकरम् ॥ ६७ ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

सददातितवाभीष्टंनात्रकार्याविचारणा ॥ इतिश्रुत्वापितृवाक्यंलिंगंस्थाप्यविधानतः ॥ ६८ ॥ तप
स्तप्त्वातुसुचिरंप्रत्यक्षीकृत्यशंकरम् ॥ अष्टौनिधीन्महापद्मप्रमुखान्महतींश्रियम् ॥ ६९ ॥ आसाद्य
चाधिकैलासंविभांतीमलकापुरीम् ॥ उदक्कुभईशित्वंशिबिकांचमनोहराम् ॥ ७० ॥ प्राप्यवैश्रव
णोराजन्नलकाख्यांमहापुरीम् ॥ संप्राप्यमोदमानस्तुतत्रोवासयथासुखम् ॥ ७१ ॥ सूतउवाच॥
तीर्थंवैश्रवणंनामसर्वपापविनाशनम् ॥ राजाधिराजमंत्रेणस्नात्वातीर्थेचतस्यवै ॥ ७२ ॥ कुबेरेशं
पूजयित्वासर्वैश्वर्यंसविंदति ॥ इतिश्रीस्कांदेगोकर्णपुराणेद्विचत्वारिंशोऽध्यायः ॥ ४२ ॥ ॥
॥ शतानीकउवाच ॥ वैनायकस्यतीर्थस्यसंभववंक्तुमर्हसि ॥ विनायकःकिमकरोदेतन्मेविस्तराद्वद
॥ १ ॥ सूतउवाच ॥ शृणुराजन्प्रवक्ष्यामितीर्थंवैनायकंमहत् ॥ गिरेःकलकलाख्यस्यआग्नेय्यांदि ॥११९॥
शिविद्यते ॥ २ ॥ वैनायकाश्रमंनामसर्वसिद्धनिषेवितम् ॥ तत्केतकीवनमितिप्रवदंतिविपश्चितः
॥ ३ ॥ पुरातुकेतकीयत्रपरांसिद्धिमुपागता ॥ तत्रतप्त्वागजास्यस्तुपरांसिद्धिमुपागमत् ॥ ४ ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

सूत उवाच ॥ कदाचित्पार्वतीवीक्ष्यमाणस्यपरमेशितुः ॥ उदगच्छन्महातेजाल्ललाटेनृपसत्तम ॥ ५ ॥
सद्यःशिवाकृतिःसोथकुमारःसमजायत ॥ दीपाद्दिपांतरमिवसर्वलोकमनोहरः ॥ ६ ॥ तमादाया
त्मनेत्रोत्थंकुमारंपरमेश्वरः ॥ गाढमालिंग्यतंशंभुर्गौर्याहस्तेददौतदा ॥ ७ ॥ तंदृष्ट्वादेवताःसर्वा
हृष्टाआसन्शिवात्मजम् ॥ विनायकाख्यांगमितोविजहारयथासुखम् ॥ ८ ॥ एकदापार्वतीदृ
ष्ट्वागजास्यंतनयंस्वकम् ॥ स्वभर्ताशंकरइतिह्यमन्यतगिरेःसुता ॥ ९ ॥ ततस्तमात्मजंज्ञात्वाकु
पितापार्वतीतदा ॥ आशाप्सीत्तनयंदेवीविकारांगोभवत्विति ॥ १० ॥ गजाननोदशभुजःखर्वपाणि
पादांबुजः ॥ लंबोदरःशूर्पकर्णःसोभून्मातुश्चशापतः ॥ ११ ॥ ततोदृष्टःशिवेनासौपृष्टःकइति
पार्वतीम् ॥ विनायकस्तवसुतइतिश ंजगादसा ॥१२॥ तच्छ्रुत्वाहाप्रियांशंभुर्नोचितंकृतवत्यासि ॥ त
तोविनायकंशंभुर्मूर्ध्न्युपाघ्रायचाब्रवीत् ॥ १३ ॥ गजास्यशृणुभद्रंतेमातरंप्रतिमाक्रुधः ॥ मातृशापा
त्तुवैरूप्यंतवप्राप्तंगजानन ॥ १४ ॥ इदमेवयथाभूयात्पुनःसौरूप्यमात्मनः ॥ गोकर्णमामकंक्षेत्रं

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

याहिसिर्षिसेवितम् ॥ १५ ॥ रुद्रयोनेरुत्तरस्यांक्रोशार्धेसंस्थितंशुभम् ॥ केतक्याःसिद्धिदंरम्यंकेत
क्याश्रममुत्तमम् ॥ १६ ॥ तत्रास्थितस्त्वंतनयतपोघोरंसमाचर ॥ इतिपित्रोदितंश्रुत्वातथास्त्वि
तिगजाननः ॥ १७ ॥ ततोगोकर्णमगमत्क्षेत्रंसिद्धर्षिसेवितम् ॥ तत्राश्रमपदंकृत्वाशुभेकेतकि
कानने ॥ १८ ॥ निश्चलेनैवमनसातपस्तेपेसुदुश्चरम् ॥ ततःकालेषुगच्छत्सुकदाचित्परमेश्वरः ॥
॥ १९ ॥ ब्रह्मविष्ण्वादिकैर्देवैःपार्वत्याप्रमथैःसह ॥ आविर्बभूवपुरतोगजास्यस्यनृपोत्तम ॥ २० ॥
प्रसन्नंपितरंज्ञात्वाआगतंत्रिदशैःसह ॥ कृतांजलिस्तदाराजन्प्रणनामगजाननः ॥ २१ ॥ प्रणमंतंस
मुत्थाप्यशंकरोगणनायकम् ॥ उवाचतनयंवाक्यंप्रसन्नोहंसुरैःसह ॥ २२ ॥ तपसातवसंतुष्टआग
तस्तवसंनिधिम् ॥ वरंवृणीष्वभद्रंतेयत्तेमनसिवर्त्तते ॥ २३ ॥ विनायकउवाच ॥ आज्ञयाभवतो ॥१२०॥
ताततपस्तप्तंमयाधुना ॥ यत्प्राप्तव्यंभवान्वेदतन्मह्यंदातुमर्हसि ॥ २४ ॥ मातृशापविमोक्षंवदेहि
मेपरमेश्वर ॥ शिवउवाच ॥ मातृशापोन्यथानस्यात्तथापिशृणुपुत्रक ॥ २५ ॥ इदंरूपंतवसुतरम

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

णीयंभविष्यति ॥ लोकेपूज्यतमंभूयान्मत्प्रसादाद्गजानन ॥ २६ ॥ अत्रागत्यनरोयस्तुपूजयेत्त्वांग
जानन ॥ निष्प्रत्यूहानिकार्याणितस्यसिध्यंतिसर्वदा ॥ २७ ॥ पूजामकृत्वायःकश्चिद्यत्किंचित्कुरु
तेयदि ॥ तस्यतत्फलेत्कर्मविघ्नानामधिपोभव ॥ २८ ॥ गणानामधिपश्चैवसंपदामधिपस्तथा ॥
इत्युक्त्वास्मैकरगतंशूलंप्रादान्निजायुधम् ॥ २९ ॥ बीजापूरंकमलभूर्विष्णुश्चक्रंसुदर्शनम् ॥ ऐक्षवं
कार्मुकंकामोगदांस्वामादिकेशवः ॥ ३० ॥ गौर्युत्पलंरमापद्मंरविःपाशंधरायवान् ॥ धनदोरत्नसंपू
र्णकलशंहेमनिर्मितम् ॥ ३१ ॥ वाहनंगजसंकाशंहिमवान्मूषकंशुभम् ॥ अन्येचदेवायोग्यानि
स्वानिस्वान्यायुधान्यदुः ॥ ३२ ॥ ततोविष्णुःप्रसन्नात्माशक्तिंनामस्वकन्यकाम् ॥ देवैर्ब्रह्मादिभिः
सार्धददौतस्मैशिवाज्ञया ॥ ३३ ॥ सूतउवाच ॥ इतिदत्वावरंतस्मैशिवोदेवैःसमन्वितः ॥ गजास्ये
नतुसंयुक्तस्तत्रैवादर्शनंगतः ॥ ३४ ॥ श्रावणेशुक्लपक्षेतुचतुर्थ्यांकुजवासरे ॥ तीर्थेवैनायकेस्नात्वा
गणानांत्वेतिमंत्रतः ॥ ३५ ॥ पूजयंतिगणाध्यक्षंशर्कराभिस्तिलैर्घृतैः ॥ नालिकेरैरिक्षुदंडैर्लाजैरंभा

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

फलैरपि ॥ ३६ ॥ अपूपैर्मोदकैःसक्तुफलपक्कादिभिर्नृप ॥ पूजयित्वागणाध्यक्षंलभंतेमनसेप्सि
तम् ॥ ३७ ॥ शतानीकउवाच ॥ किंकारणार्थंकेतक्यातपस्तत्तांद्विजोत्तम ॥ सूतउवाच ॥ अहंश्रे
यानहंश्रेयानित्यभूत्कलहोमिथः ॥ ३८ ॥ दंडचक्रधरौदेवौपरस्परमयुध्यताम् ॥ देवाःशमयितुंतत्रन
शेकुःकलहंतयोः ॥ ३९ ॥ एतस्मिन्नंतरेकालेमध्येह्याविर्भूत्तयोः ॥ सहस्रादित्यसदृशंलिंगंह्याद्यंत
वर्जितम् ॥ ४० ॥ ततःशंभुरगात्तत्रादिविविष्णुंविलोक्यच ॥ शिवोह्युवाचवचनंमाभूद्वांकलहोमि
थः ॥४१॥ अस्यलिंगस्यमूर्धानंपादंवायोभिपश्यति ॥ सश्रेष्ठइतिमन्येहंगच्छतंशीघ्रमेवहि ॥ ४२ ॥
तथास्त्वितिशिवेनोक्तमंगीकृत्यसुरर्षभौ ॥ हंसोभूत्वाविधिरगाच्छिरोद्रष्टुंविहायसम् ॥ ४३ ॥ वि
ष्णुर्वराहरूपोधःपादंद्रष्टुमगान्नृप ॥ गच्छन्नूर्ध्वमुखोब्रह्माद्रष्टुंलिंगस्यवैशिरः ॥ ४४ ॥ अत्यगात्सु
महान्कालस्ततोदृष्ट्वातुकेतकीम् ॥ लिंगोत्तमांगेविधृतांसुगंधांसुमनोहराम् ॥ ४५ ॥ दिशःप्रका
शयंतींतांदृष्ट्वाप्रोवाचपद्मभूः ॥ ब्रूहिमेत्वंयथार्थेनकुतआयासिकेतकि ॥ ४६ ॥ विष्णुनाहंपणंकृत्वालि

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

गांतंद्रष्टुमागतः ॥ बहुकालोगतोमेद्यगच्छतश्चोर्ध्ववर्त्मनि ॥ ४७ ॥ उत्तमांगंनपश्यामिलिंगस्या
स्यशुभानने ॥ यदिजानासिमेब्रूहिशिरोलिंगस्यकेतकि ॥ ४८ ॥ केतकीतमुवाचेदंमांमहेश्वरमस्त
कात् ॥ आगतांविद्धिदेवेशबहुकालोत्यगान्मम ॥ ४९ ॥ इदानींतस्यपादंतुनपश्येयंचतुर्मुख ॥
केतक्यावचनंश्रुत्वातांप्रत्याहाविधिःपुनः ॥५०॥ दृष्टोमूर्धाब्रह्मणोतित्वयावाच्यंशिवांतिके ॥ साहाय्यं
कुरुमेत्वंहिदास्येहंतववांछितम् ॥ ५१ ॥ तथास्त्वितितयाप्रोक्तेसार्धंब्रह्माह्यधोविशत् ॥ विष्णुःकू
र्मोवधिगतोह्यदृष्ट्वामूलमागमत् ॥ ५२ ॥ तावागतौसमालोक्यविधिविष्णूमहेश्वरः ॥ तावपृच्छत्तदा
शूलीभवद्भ्यांकिमुचास्यवै ॥ ५३ ॥ लिंगस्यादिस्तथाचांतंदृष्टंब्रूतममाग्रतः ॥ ततोब्रह्माप्युवाचे
दंशिरोदृष्टंमयेतिवै ॥ ५४ ॥ साक्षिणीकेतकीतत्रकेतक्यपितथाब्रवीत् ॥ तदाविष्णुरुवाचेदंनानृतं
वक्तुमुत्सहे ॥ ५५ ॥ मयानदृष्टौपादौतुलिंगस्यास्यमहेश्वर ॥ शिवोब्रह्मवचःश्रुत्वाह्यनृतंकोपमीयि
वान् ॥ ५६ ॥ अशपत्केतकींशंभुरयोग्याभवमेवने ॥ यतोवादीःकूटसाक्ष्यमद्यप्रभृतिकेतकि ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

॥ ५७ ॥ ततोशपद्विधिराजन्नपूज्योभवविष्टपे ॥ ततउत्पादयामासकोपेनोत्कटभैरवम् ॥५८ ॥ त
सुवाचमहादेवःस्त्रष्टुरूर्ध्वशिरोहन ॥ तच्छ्रुत्वाभैरवःशीघ्रंखड्गेनकशिरोहनत् ॥ ५९ ॥ सब्रह्मह
त्याग्रस्तःसन्बभ्रामजगतीतलम् ॥ ततःशंभुःप्रसन्नात्माविष्णुंप्राहहरेत्वया ॥ ६० ॥ सत्यमुक्तंह
रेयस्माल्लोकेपूज्यःसदाभव ॥ ततस्त्वदर्शनंयातौशिवाविष्णूनृपोत्तम ॥ ६१ ॥ केतकीचविधिश्चापि
विषण्णवदनौततः ॥ गोकर्णक्षेत्रमासाद्यशतशृंगोत्तरेतटे ॥ ६२ ॥ तीर्थंकृत्वातुविमलंलिंगंस्थाप्यतुप
र्वते ॥ तपस्तप्त्वातुसुचिरंप्रत्यक्षीकृत्यशंकरम् ॥ ६३ ॥ होमकर्मणिसप्रापपूजांब्रह्मापिनाकिनः ॥
दिव्यमूर्त्तिधरस्तत्रउवासचतुराननः ॥ ६४ ॥ तन्मूर्तिंयेपूजयंतितेषांस्युःसर्वसिद्धयः ॥ गोशृंगपर्व
ताद्राजन्नवाच्यांशरपाततः ॥ ६५ ॥ केतक्यपितपस्तप्त्वाशिवध्यानपरायणा ॥ प्रत्यक्षीकृत्यदेवे ॥१२२॥
शंवव्रेसान्नृपदोषतः ॥ ६६ ॥ परिहारंचशापस्यपूजायास्तस्ययोग्यताम् ॥ शिवरात्रौपुण्यदिनेस्वयमा
स्तेयथासुखम् ॥ ६७ ॥ भैरवोपितथाराजन्ब्रह्महत्याप्रपीडितः ॥ तीर्थयात्राप्रसंगेनबभ्रामजगती

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तलम् ॥ ६८ ॥ शंकरानुज्ञयापश्चाद्गोकर्णंप्राप्यसत्वरम् ॥ तत्राश्रमपदंकृत्वाघंटाकर्णसमन्वितः
॥ ६९ ॥ तपश्चचारसुचिरंततस्तुष्टोमहेश्वरः ॥ उवाचभैरवंप्रीत्यातुष्टोस्मितपसासुत ॥ ७० ॥ व
रंवरयभद्रंतेयद्यपिस्यात्सुदुर्लभम् ॥ भैरवउवाच ॥ ब्रह्महत्यात्वियंघोराबाधतेमांदिवानिशम् ॥ सामां
यथानबाधेततथाकुरुमहेश्वर ॥७१॥ शिवउवाच ॥ ब्रह्महत्यातवसुतानिःशेषंनाशिताभवत् ॥ अत्र
स्थित्वाभैरवत्वंपातासुकृतिनांभव ॥ ७२ ॥ पापिनांशिक्षकश्चैवइदानींगच्छशीघ्रतः ॥ कुरुक्षेत्रंतत्र
विष्णुःकपालंतेविमोक्ष्यति ॥ ७३ ॥ घंटाकर्णमहाबाहोमत्तस्तेवांछितंकिमु ॥ घंटाकर्णउवाच ॥
अस्मिन्क्षेत्रेमहादेवस्थित्वात्वामेवसेवितुम् ॥ ७४ ॥ इच्छामितद्ददस्वत्वंवरदोयदिमेप्रभो ॥ ईश्व
रउवाच ॥ स्थित्वात्रैवमहाबाहोमत्क्षेत्रंपरिपालय ॥ ततस्त्वंक्षेत्रपालाख्योलोकेख्यातोभविष्यसि ॥
॥ ७५ ॥ इतिदत्वावरंतस्मैतत्रैवांतर्दधेहरः ॥ सूतउवाच ॥ ततःसभैरवोराजन्कपालेनसमान्वितः॥
कुरुक्षेत्रंजगामाशुविषण्णवदनोनृप ॥ ७६ ॥ ततःसभैरवंदृष्ट्वासकपालंहरिस्तदा ॥ कपालतवकिं

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

कार्यंभैरवेणेतिचाब्रवीत् ॥ ७७ ॥ तत्राशांपूरयाम्यग्रमद्धस्तंयाहिसांप्रतम् ॥ इत्युक्त्वाभगवान्वि
ष्णुर्हस्तंप्रोत्सार्यतस्थिवान् ॥ ७८ ॥ यावत्कपालोराजेंद्रसंत्यक्त्वाकालभैरवम् ॥ विष्णुहस्तंन
यातस्तुतावद्दूरमतोहरिः ॥ ७९ ॥ पापातभूम्यांतत्रैवविष्णुंप्रोवाचदुःखितः ॥ कागतिर्ममदेवेशतत
स्तंविष्णुरब्रवीत् ॥ ८० ॥ अत्रैवतिष्ठसुचिरंतवाशांपूरयाम्यहम् ॥ कुरुपांडवयोर्युद्धेइत्युक्त्वांतर्दधेह
रिः ॥ ८१ ॥ भैरवोपिययौपश्चाद्गोकर्णक्षेत्रमाशुवै ॥ घंटाकर्णेनसहितस्तत्रोवासयथासुखम् ॥ ८२ ॥
शिक्षकःपापिनांनित्यंरक्षन्सुकृतशीलिनः ॥ सूतउवाच ॥ तदाश्रमंपुण्यतमंब्रह्महत्यादिनाशनम् ॥
तत्पूजकानांमर्त्यानांसर्वपापक्षयोभवेत् ॥ ८३ ॥ इतिश्रीस्कांदेगोकर्णपुराणेत्रिचत्वारिंशोऽध्यायः ॥
॥ शौनकउवाच ॥ किंकारणमगस्त्येनपीतोजलनिधिःपुरा ॥ अत्यद्भुतमहंमन्येऋषेस्तस्यतपोबल
म् ॥ १ ॥ कथंपुनःसमुद्रोवैपूरितोमकरालयः ॥ कथंससगरोराजाअश्वमेधमकारयत् ॥ २ ॥
याजनीयपशुंसोयंकथमापमहामते ॥ शंसैतत्सकलंत्वत्तःश्रोतुमिच्छामहेवयम् ॥ ३ ॥ सूतउवाच ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

श्रूयतांद्विजशार्दूलकथापौराणिकीत्वया ॥ कालेयाइतिविख्याताअसुरादेवशत्रवः ॥ ४ ॥ समुद्रंते
समाश्रित्यहतेवृत्रेमहासुराः ॥त्रैलोक्यस्यविनाशायदीक्षिताःकुरुसत्तम ॥५॥ रात्रौनिर्गत्यसहिताःका
लेयाःकालचोदिताः ॥ आश्रमाणिसमासाद्यमुनीनांभावितात्मनाम् ॥ ६ ॥ भक्षयामासुरव्यग्राःस
प्तर्षीकान्तपोधनान् ॥ ब्राह्मणान्क्षत्रियान्वैश्यान्शूद्रांश्चकुरुसत्तम ॥ ७ ॥ रात्रौरात्रौविनिर्गत्यभक्ष
यामासुरोजसा ॥ दिवासमुद्रेसंलीनानदृश्यंतेकथंचन ॥८॥ एवंवर्षसहस्रांतंनिर्घृणाःपापकर्मिणः ॥
क्षयंजग्मुःप्रजाःसर्वास्त्रैलोक्यपरिवर्त्तिनः ॥ ९ ॥ अस्थिसंघातसंकीर्णातत्रतत्राभवन्मही ॥ भूतैश्च
भूमिःसंकीर्णानिर्मनुष्याकुरूद्वह ॥ १० ॥ ततोदेवाःसगंधर्वाःसयक्षाःपांडुनंदन ॥ उद्वेगमगमन्सर्वे
भयविह्वलचेतसः ॥ ११ ॥ कुतउत्पद्यतइतिनविदुस्तद्व्रतिसुराः ॥ ततोमहेंद्रसहिताब्रह्माणंशरणं
ययुः ॥ १२ ॥ आर्तनादंप्रकुर्वाणारक्षस्वेतिपुनःपुनः ॥ तच्छ्रुत्वाभगवान्ब्रह्मादेवानिदमथाब्रवीत्
॥ १३ ॥ ब्रह्मोवाच ॥ हतेवृत्रेकालिकेयाःसमुद्रंनिधिमंभसाम् ॥ समासाद्यदुराधर्षालोकस्योत्सादनेर

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ताः ॥ १४ ॥ तस्माद्गच्छध्वममराःकुंभयोनिंतपोनिधिम् ॥ साहिशक्तोहिनान्योस्तिसमुद्रपरिशोष
णे ॥ १५॥ पीतेगस्त्येनसलिलेवाधिष्यध्वंसुरास्ततः ॥ कालिकेयान्दुराचारान्नान्यथाभवितासुखम्
॥ १६ ॥ इतितद्वचनंश्रुत्वासार्धंतेनमहात्मना ॥ अगस्त्यनिकटंगत्वासमासाद्यमहामुनिम् ॥ १७ ॥
अगस्त्यमब्रुवन्देवाःस्वेषांकार्यस्यसिद्धये ॥ सूतउवाच ॥ त्वंनोधाताविधाताचत्वंगतिर्द्विजसत्तम ॥
बहुत्वयामुनिश्रेष्ठरक्षितास्मोवयंभयात् ॥ १८ ॥ दयांकरुष्वदेवेषुलोकेषुद्विजसत्तम ॥ कालेयभय
विध्वस्तंत्रैलोक्यंसचराचरम् ॥ १९ ॥ तपसाधार्यतेविप्रत्वयासर्वमिदंजगत् ॥ समुद्रंदुर्गमाश्रि
त्यकालेयाःकालचोदिताः ॥ २० ॥ भक्षयंतिप्रजाःसर्वारात्रौरात्रौविनिर्गताः ॥ दिवासमुद्रमाश्रित्य
निर्भयानिवसंतिते ॥ २१ ॥ तैर्भक्ष्यमाणाविप्रेंद्रक्षयंजग्मुःप्रजाःप्रभो ॥ कालेयभयभीतानामस्माकं
शरणंभव ॥ २२ ॥ समुद्रसलिलान्याशुशोषयस्वाहितायनः ॥ त्वयैवशक्यंनान्येनकर्मैतद्द्विजसत्तम ॥१२४॥
॥ २३ ॥ तस्मान्नोनुग्रहार्थायसमुद्रंपातुमर्हसि ॥ पीतेसमुद्रेभवताबधिष्यामोवयंरिपून् ॥ २४ ॥ ना

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

न्यथास्माभिरसुराहंतुंशक्याद्विजोत्तम ॥ तस्मान्नोद्विजशार्दूलप्रसादंकुरुसुव्रत ॥ २५ ॥ विश्वोप
कारिणोविप्रभविष्यंतिभवादृशः ॥ इतितेषांवचःश्रुत्वाअगस्त्योभगवानृषिः ॥ २६ ॥ तथाकरिष्यइ
त्युक्त्वालोकानांहितकाम्यया ॥ तैःसार्धमगमाद्विप्रस्तपसाद्योतितप्रभः ॥ २७ ॥ ऋषिभिःसहितोविप्रः
ससारसरितांपतिम् ॥ त्रैलोक्यसहितःश्रीमानगस्त्योवरुणालयम् ॥ २८ ॥ पातुकामस्तदाराजन्निदंवच
नमब्रवीत् ॥ पिबाम्यहंक्षणात्सर्वंसमुद्रसलिलंसुराः ॥ २९ ॥ युष्माभिर्यदनुष्ठेयंतत्सर्वंसंप्रधार्यताम् ॥
इत्युक्त्वाकुरुशार्दूलयुगांताग्निसमप्रभः ॥ ३० ॥ विदार्यवक्त्रकुहरंस्वजिह्वांसलिलेक्षिपत् ॥ शुष्ककाष्ठा
ग्निवद्राजन्वारुणिर्वरुणालये ॥ ३१ ॥ तद्वक्त्रावर्षिताह्यापःक्षणेनभरतर्षभ ॥ क्षयंजग्मुस्तदाराजन्नगस्त्यं
तेजआश्रिताः ॥ ३२ ॥ यथावायुसहायोग्निःक्षिप्तंक्षिप्तंदहेत्क्षणात् ॥ तथैवसर्वार्णवंभांसिभक्षयामास
वारुणिः ॥ ३३ ॥ तंदृष्ट्वासर्वभूतानिविस्मयात्तुष्टुवुर्मुनिम् ॥ स्तूयमानःसतैःसर्वैरगस्त्योभगवानृषिः
॥ ३४ ॥ निस्तोयमर्णवंचक्रेगस्त्यःसर्वस्यपश्यतः ॥ ततःसुरास्तुप्राणिपत्यराजन्नगस्त्यमुत्सृज्यवरा

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

युधानि ॥३५॥ प्रविश्यतत्तोयनिधिंसुरास्तदाजघ्नुस्ततोदैत्यमहाबलौघम् ॥ तेहन्यमानाविबुधैःसुरा
रयोनिर्विण्णगात्राह्यपतन्पयोनिधौ ॥ ३६ ॥ निशुंभशुंभौसुरसःसुलोचनःप्रकोपनाद्याःसुरशत्रवो
नृप ॥ अशीतिसाहस्रमथोसुरारयोमृताःसुरेंद्रप्रमुखैःसुरैर्हताः ॥ ३७ ॥ हतेषुतेषुप्रमदासहायाःपा
तालमेवंविविशुश्चशिष्टाः ॥ ततोहत्वाकालकेयान्सुराःशक्रादयोनृप ॥ ३८ ॥ दृष्टाःसंपूजयामा
सुरगस्त्यमृषिसत्तमम् ॥ ऋषिभिःसहराजेंद्रसकिंनरमहोरगाः ॥ ३९ ॥ यक्षगंधर्वमनुजातुष्टुवुस्तंम
हामुनिम् ॥ ततोब्रुवन्पुनस्तंवैऋषिदेवगणाःप्रभो ॥ ४० ॥ त्वत्प्रसादाद्द्विजश्रेष्ठभविष्यामोनिरा
मयाः ॥ इमंसमुद्रंनिस्तोयंसर्वसत्वालयंमुने ॥ ४१ ॥ पूरयस्वमुनिश्रेष्ठअंभोभिर्वरुणालयम् ॥
इतितेषांवचःश्रुत्वाअगस्त्योभगवानृषिः ॥ ४२ ॥ प्रहस्यदेवान्राजेंद्रइदंवचनमब्रवीत् ॥ यन्मया
पीतमधुनातोयंत्रिदशसत्तमाः ॥ ४३ ॥ काष्ठस्यसंघवद्दग्धंचित्रभानौविसर्जितम् ॥ भस्मावशेषम
भवत्तद्द्विजीर्णमयासुराः ॥ ४४ ॥ ततोंबुनासावब्धिस्तुनशक्यःपूरितुंमया ॥ यूयंसमेत्यसंचिंत्यसमु

॥१२५॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

द्रस्यास्यपूरणे ॥ ४५ ॥ उपायमन्यंपश्यध्वंनमयाशक्यतेसुराः ॥ ततस्तद्वचनंश्रुत्वादेवासुरमहो
रगाः ॥ ४६ ॥ ऋषिभिःसहराजेंद्रब्रह्माणंसमुपागमन् ॥ ततःसमेत्यब्रह्माणमिदमूचुःसुरान्नृप ॥
॥ ४७ ॥ कथंसमुद्रोभगवन्पुनःपूर्णोभविष्यति ॥ तत्पूरणार्थंदेवेशउपायंनोब्रवीहिभो ॥ ४८ ॥ त
तोब्रह्माजगद्धाताज्ञात्वातत्पूरणंनृप ॥ तानाहगच्छध्वमितिकालेनपरिपूर्यते ॥ ४९ ॥ भगीरथप्रसा
दार्थंगंगासुरनदीदिवः ॥ भूमिंप्राप्स्यतितत्तोयैःपूर्णोभवतिसागरः ॥ ५० ॥ इतितद्वचनंश्रुत्वादेवासु
रमहोरगाः ॥ प्रीताःस्वस्थानमगमन्प्रणिपत्यपितामहम् ॥ ५१ ॥ कालेनसागरास्तद्धिभारतंखंड
मप्युत ॥ नवधाव्यभजन्राजन्खनाद्भिःपृथिवीमिमाम् ॥ ५२ ॥ वर्धितस्तैरुदन्वान्वैसागरःप्रोच्यतेबु
धैः ॥ तदाप्रभृतिराजेंद्रसागराख्यांगतोबुधैः ॥ ५३ ॥ खन्यमानेतदातैस्तुभूतलेकुरुसत्तम ॥ गोक
र्णंसहदेवेनसतीर्थंसतपोवनम् ॥ ५४ ॥ पपातपातालमुखेअभेद्यंचनृपोत्तम ॥ पुनश्चसृष्टंरामेणभा
र्गवेणमहात्मना ॥ ५५ ॥ विष्णोरंशःसविज्ञेयोरामप्रहरतांवरः ॥ तेनसृष्टःसभूद्राजन्पूर्ववत्ससकोक

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

णम् ॥ ५६ ॥ सह्यस्यपादेराजेंद्रसप्तकोंकणमुच्यते ॥ अतःशृणुनृपश्रेष्ठपुराणंसागरस्यहि ॥ ५७ ॥

इतिश्रीस्कांदेगोकर्णमाहात्म्येचतुश्चत्वारिंशोध्यायः ॥ ४४ ॥ ॥ ॥ ॥ ॥

॥ सूतउवाच ॥ तद्दृष्ट्वासागराणांचनिधनंकुरुसत्तम ॥ नारदोभगवान्क्षिप्रंसगरालयमागमत् ॥१॥
दीक्षितःसतुराजेंद्रोदृष्ट्वादेवर्षिमागतम् ॥ ॥ प्रत्युद्गम्याभिवाद्याथआसनंचोपपादयत् ॥ २ ॥ पाद्या
र्घ्यादिभिरासीनंपूजयित्वातपोनिधिम् ॥ अनामयंसपप्रच्छलोकेकुशलमेवच ॥ ३ ॥ ततस्तुनारदः
सर्वंकथयामासकौरव ॥ निधनंसागराणांचपयोरप्राप्तिमेवच ॥ ४ ॥ कापिलंतेजआसाद्यविनष्टाःसा
गरान्नृप ॥ साग्निधूमाभस्मशेषाबभूवुःक्षणकालतः ॥५॥ अज्ञानिनस्तुपापिष्ठालोकोपद्रवकारिणः ॥
क्षयंगतास्तेराजेंद्रनाचिंतांकर्तुमर्हसि ॥ ६ ॥ नष्टास्तेपिदुराचारायज्ञाविनतदन्यथा ॥ उक्तंरुद्रेणदद ॥१२६॥
तावरंतवतदानघ ॥ ७ ॥ उत्पत्तिश्चैवनाशश्चतेषांहिसमकालतः ॥ तस्मात्तेषांविनाशेननाचिंतांकर्तुम
र्हसि ॥ ८ ॥ इत्युक्त्वाप्रययौराजन्नारदोभगवानृषिः ॥ ततःसराजाधर्मात्माश्रुत्वामुनिमुखोद्गत

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

म् ॥ ९॥ संस्मृत्य रुद्रवचनमल्पशोकोबभूवह ॥ अंशुमंतमथाहूयपौत्रमिक्ष्वाकुनंदनः ॥१०॥ इदमाहा
र्थिसहितःसभामध्येतिलालयन् ॥ पिताहितवैवत्समयात्यक्तःपुरानघ ॥ ११ ॥ अन्येचबहवःशूरा
मत्पुत्राश्चमहाबलाः ॥ नष्टास्तेयुगपत्सर्वेकपिलाग्नौपतंगवत् ॥ १२ ॥ त्वयादायादवानस्मिनान्यो
स्तिममसंततेः ॥ तत्सांप्रतंभवान्पुत्रगत्वाश्वंसमुपानय ॥ १३ ॥ समाप्यैतक्रतुवरंराज्यंदास्यामिते
नघ ॥ तपश्चर्तुमिहेच्छामितच्छीघ्रंसंप्रधार्यताम् ॥ १४ ॥ शतानीकउवाच ॥ किमर्थमात्मनःपुत्रं
त्यक्तवान्सगरोनृपः ॥ दुस्त्यजंकेनदोषेणएतन्मेवक्तुमर्हसि ॥ १५ ॥ सूतउवाच ॥ असमंजइति
ख्यातःपुत्रःशैब्यामजायत ॥ तंविवेशासुरःकश्चित्पूर्ववैरमनुस्मरन् ॥१६ ॥ जन्मांतरेसवैश्योभूत्बहु
व्यापारकारकः ॥ स्वधर्मनिरतःसोथशांतोदाक्षण्यवान्शुचिः ॥ १७ ॥ सकदाचिन्स्वनन्भूमिंशौचा
र्थंजान्हवीतटे ॥ तत्रापश्यन्निधिंस्फीतंयक्षरक्षासमान्वितम् ॥ १८ ॥ तंदृष्ट्वाविस्मयपरोगृहीतुंचोपच
क्रमे ॥ ततस्तत्पालकोयक्षोलुब्धकोनामपापकृत् ॥ १९ ॥ भक्षार्थलंपशुंदेहिक्षुधार्त्तस्यममानघ ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ततोगृहाणमद्दत्तंनिधानमितिसोब्रवीत् ॥ २० ॥ दास्यामीतितमुक्त्वातुतद्गृहीतंकुरूत्तम ॥ नदत्तस्ते
नविस्मृत्यपशुस्तेनदुरात्मना ॥ २१ ॥ ततोसौक्षुधयाविष्टःपंचत्वमगमद्वने ॥ वैश्यःसपापीराजेंद्रमृ
तःकालेनसत्तम ॥ २२ ॥ व्यजायतपुनःसोथशैब्यांसगरभूपतेः ॥ असमंजइतिख्यातइक्ष्वाकुकुलव
र्धनः ॥२३॥ तमाविवेशभूतःसन्बाल्येक्रीडंतमप्युत ॥ तेनाविष्टोमहातेजानिर्घृणःसमपद्यत ॥२४॥
ततोगृहीत्वापृथुकान्नागराणांबलाद्बली ॥ नद्यांचिक्षेपबहुशस्तत्रतत्रचभारत ॥ २५ ॥ राज्ञोनिवेद
यामासुःसर्वेनगरवासिनः ॥ तत्याजपुत्रंतच्छ्रुत्वाविषयांतेमहीपतिः ॥ २६ ॥ त्यक्तःसचापिपापेन
अभिभूतोर्दितस्तदा ॥ श्वानिमांसानिचोत्कृत्यभक्षयामासकौरव ॥ २७ ॥ वनेतस्मिन्महाभीमे
मृतःसोप्यसमंजसः ॥ तस्यपुत्रोमहातेजाअंशुमानितिविश्रुतः ॥ २८ ॥ सोंशुमानेवमुक्तस्तुपि
तुःपितरमब्रवीत् ॥ अश्वंहिचानयिष्यामिविज्वरोभवपार्थिव ॥ २९ ॥ इत्युक्त्वाप्रययौशीघ्रंसमु
द्रंवरुणालयम् ॥ येनमार्गेणतेगच्छन्विदार्यचवसुंधराम् ॥ ३० ॥ तेनगत्वासमंजस्यपुत्रःपुत्रवतांव

॥१२७॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

रः ॥ ददर्शकपिलंविप्रंप्रज्वलंतंकृशानुवत् ॥ ३१ ॥ तमश्वंचनरव्याघ्रतस्यपार्श्वेस्थितंशुभम् ॥ भ
स्मीभूतान्पितॄंश्चैवयथावत्कुरुनंदन॥ ३२ ॥ ततःप्रीतःसभगवान्वरंब्रूहीत्यभाषत ॥ दातास्मितेव
रंप्राज्ञयद्यत्प्रार्थयसेनघ ॥ ३३ ॥ ततोंशुर्वरयामासस्वपितॄणांगतिंशुभाम् ॥ तच्छ्रुत्वाकपिलोयोगी
अंशुमंतमभाषत ॥ ३४ ॥ गंगामानीयत्रिदिवाद्यःकश्चित्पुरुषःकुले ॥ प्लावयिष्यातितत्तोयैस्तदा
पिंडोदकक्रियाः ॥ ३५ ॥ संप्राप्स्यंतिदिवंसर्वेनान्यथेतितमब्रवीत् ॥ तस्माद्गच्छगृहंपुत्रअश्वंगृह्य
नरोत्तम ॥३६॥ समापयमखंतस्यसगरस्यमहात्मनः॥ अचिरेणमहाभागपौत्रस्तवभविष्यथ ॥३७॥
तेनैवतारिताह्येतेस्वर्गंगच्छंतिसागराः ॥ इतितद्वचनंश्रुत्वाअंशुमानापिभारत ॥ ३८॥ प्रणम्यतंतथे
त्युक्त्वाजगामस्वनिवेशनम्॥ अश्वद्वितीयोराजेंद्रसगरंसमुपागमत्॥ ३९॥ पितामहंमहातेजाववंदे
शिरसांशुमान्॥ अश्वंनिवेदयामासतेषांवृत्तांतमप्युत॥ ४०॥ दृष्ट्वातमश्वंसगरःप्रीतिमानभवन्नृप॥ मू
र्ध्निचैवमुदाघ्रायप्रीतोस्मीत्याहतंगुरुः ॥ ४१ ॥ ततोयज्ञंमहातेजायथान्यायंसमापयत् ॥ स्नात्वा

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

चावभृथस्नानंसऋत्विक्सपुरोहितः ॥४२॥ राज्येभिषिच्यांशुमंतंतपसेधृतमानसः ॥ वनंजगामराजा सौसगरःसाधुसत्तमः ॥४३॥ अंशुमानपितेजस्वीपालयामासमेदिनीम् ॥ ससमुद्रवनद्वीपांसाम्राज्यम करोद्दशी ॥४४॥ तस्यपुत्रोभवद्राजन्दिलीपोनामाविश्रुतः ॥ गुणैःसंदीपयामासरोदसीभास्करोयथा॥ ॥ ४५ ॥ अभिषिच्यांशुमान्राज्येपुत्रंसर्वगुणान्वितम् ॥ तस्याप्यभून्महातेजाःपुत्रःपुत्रवतांवरः ॥ ॥४६॥ भगीरथइतिख्यातःसर्वत्रकुरुनंदन ॥ सत्यवान्शीलसंपन्नोगुणवान्ब्राह्मणप्रियः ॥ ४७ ॥ तेजसादित्यसंकाशःक्षमयापृथिवीसमः ॥ पराक्रमेविष्णुसमःकोपेंतकसमप्रभः ॥ ४८ ॥ श्रियावैश्र वणःसाक्षात्कंदर्पइवमूर्तिमान् ॥ सर्वैर्गुणैरुपेतंतुदृष्ट्वापुत्रंमहोदयम् ॥ ४९ ॥ आहूयपुत्रंराजेंद्रइदंवचन मब्रवीत् ॥ शृणुमद्वचनंपुत्रअलंघ्यंगुरुभाषितम् ॥५०॥ अभिषेक्ष्यामित्वांराज्येरमेहामितिपुत्रक ॥ तप श्चर्तुमिहेच्छामिनविघ्नंकर्तुमर्हसि ॥५१॥ पितॄणांतारणायैवआत्मनःश्रेयसेतथा ॥ इत्युक्त्वासनृपःपुत्र माभिषिच्यवनंययौ ॥५२॥ गंगावतरणेयत्नंकृतवान्समहीपतिः ॥ इतिश्रीस्कांदेगोकर्णपुराणेपंचच

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

त्वंतुपूर्वभवेजातोवैश्यायांशूद्रपूरुषात् ॥ धर्मध्वजइतिख्यातोलुब्धकःप्राणिहिंसकः ॥ ३९ ॥ पा
पकर्मरतोनित्यंदेवब्रह्मस्वहारकः ॥ देशाद्देशमनुप्राप्तःकामपीडारतःसदा ॥ ४० ॥ चौर्यबुद्धिरतः
क्रूरःसरस्तीरमुपस्थितः ॥ स्थितेत्वायिनृपश्रेष्ठकस्याचिद्द्विजवल्लभा ॥ ४१ ॥ भर्त्रासहैवशनकैर्गं
गास्नानार्थमागता ॥ विलोकयंतीभर्त्तारंनपश्यंतीदिशश्चसा ॥ ४२ ॥ साक्षात्कंदर्पदर्पोयमथ
वाजन्हुनंदना ॥ तांविलोक्यतदात्वंतुस्नातेगंगाजलेशुभे ॥ ४३ ॥ स्नानदानादिकंकर्मचक्रेविप्र
स्तयासह ॥ तत्सर्वंदृष्ट्वान्त्वंतुमदविह्वालितोभृशम् ॥ ४४ ॥ ततःस्वभवनंयातःसविप्रोभार्यया
सह ॥ गतेतस्मिन्द्विजाग्र्येतुत्वयातत्पदमीक्षितम् ॥ ४५ ॥ अनुसृत्यततःपश्चाद्रात्रौवेलांचदृष्टवान्
॥ अर्धरात्रौव्यतीतायांकुड्येमलविकारिच ॥ ४६ ॥ तद्बिलद्वारमार्गेणगतस्त्वंविप्रभामिनीम् ॥ नि
द्रालुःस्वामिनासार्धंपृष्टवान्करमूलतः ॥ ४७ ॥ त्वत्करस्पर्शमात्रेणबुबोधद्विजवल्लभा ॥ कुड्ये
द्वारंतदालोक्यचोरोयमितिचाब्रवीत् ॥ ४८ ॥ बिलद्वारंपुनर्गत्वानिर्गतस्त्वंपुनर्बहिः ॥ पुरचारा

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

स्तदागत्यबध्वात्वांराजसांनिधिम्॥ ४९ ॥ निन्युर्विशंकिताःसर्वैराज्ञेचोरंव्यजिज्ञपन् ॥ राजासौधर्म
शास्त्रज्ञश्छित्वाहस्तपदंनृप ॥ ५० निर्यापयामासपुराद्बाहिर्गिरौन्यपातयत् ॥ तेनदुःखेनमहताम्रु
तस्त्वंपर्वतोपरि ॥ ५१ ॥ पूर्वजन्मार्जितेनैवदोषेणमहतानृप ॥ जातेयंचेदृशीबुद्धिर्बहुपापरतास
दा ॥ ५२ ॥ प्रातस्नानान्माघमासेपार्थिवत्वमवाप्तवान् ॥ द्विजस्यस्नानसंध्यादिदर्शनान्नृपसत्त
म ॥५३॥ ममेहदर्शनंजातमलभ्यंपापकार्मिणाम्॥ तस्मात्पूर्वार्जितंपापमिहजन्मार्जितंतथा ॥ ५४ ॥
रोगपीडाकरंनित्यंभवत्येवनसंशयः ॥ पापंनिरयभोगायपुण्यंस्वर्गायपार्थिव ॥ ५५ ॥ पापेनाक्कि
श्यतेजंतुर्यमदूतैर्भयंकरैः ॥ कुंभीपाकादिषुनृपनरकेषुबहुष्वपि॥ ५६ ॥ ताड्यमानोयमभटैर्यातनाम
नुभूयच ॥ मृगादियोनिमासाद्यअंतेगोयोनिमाश्रितः ॥ ५७ ॥ पश्चान्मनुष्ययोनौतुजायतेपापकृ
न्नरः ॥ एतत्तेकथितंसर्वंपूर्वजन्मार्जितंतथा ॥ ५८ ॥ इतःपरंत्वंभूपालकिमन्यच्छ्रोतुमिच्छसि॥
इतिश्रीस्कांदेगोकर्णपुराणेसप्तत्रिंशोऽध्यायः ॥ ३७ ॥ ॥ ॥ ॥ ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

॥ सूतउवाच ॥ सनकेनेरितंश्रुत्वाविष्णुवर्मातिह्रष्टवान् ॥ पुनःप्रोवाचतमृषिंकृतांजलिपुटस्तदा ॥
॥ १ ॥ विष्णुवर्मोवाच ॥ स्वामिन्ननुगृहीतोस्मिभवताकरुणानिधे ॥ त्वन्मुखाब्धिःसृतांवाक्यसुधांपी
त्वाविह्रष्टवान् ॥२॥ मयाकृतानिपापानिनविद्यंतेहिकुत्रचित् ॥ तेषांमत्कृतपापानांनिष्कृतिश्चकथंभ
वेत् ॥ ३ ॥ मच्छरीरेस्थितोरोगःकथंनश्येततद्वद ॥ भवत्प्रसादाद्योगींद्रनिरोगश्चभवाम्यहम् ॥४॥
दानंहोमोथवायात्रापूजावातद्वदस्वमे ॥ इतितद्भाषितंश्रुत्वायोगीवचनमब्रवीत् ॥५॥ सनकउवाच ॥
श्रूयतांभोनृपश्रेष्ठयेनत्वंनिरुजोभवेः ॥ भवताकृतपापानामसंख्यानांनृपोत्तम ॥ ६ ॥ एतत्पापवि
शुध्यर्थंतवरोगनिवारणे ॥ नहिदानंनहोमश्चनपूजाविद्यतेक्वचित् ॥ ७ ॥ पश्चिमांबुधितीरस्थेगोक
र्णेक्षेत्रसत्तमे ॥ कोटितीर्थमितिख्यातंविद्यतेविमलंसरः ॥ ८ ॥ कोटिद्रवयुतंपुण्यंमुनिवृंदनिषेवित
म् ॥ स्नानमात्रेणतत्तीर्थेमहापातककोटयः ॥ ९ ॥ नश्यंत्येवनसंदेहोनात्रकार्याविचारणा ॥ दिनमे
कंकोटितीर्थेस्नात्वाभक्तियुतोनरः ॥ १० ॥ प्रभातसमयेराजन्पूजयेच्चमहाबलम् ॥ ब्रह्महत्यादियु

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

क्तोवासंयुक्तोप्युपपातकैः ॥ ११ ॥ सर्वपापविनिर्मुक्तोनरकान्नैवपश्यति ॥ पश्चिमांबुधितीरस्थंगो
कर्णक्षेत्रमुत्तमम् ॥ १२ ॥ ब्रह्महत्यादिपापानिदहत्येवनसंशयः ॥ महाबलाभिधानेनआस्तेतत्रवृष
ध्वजः ॥ १३ ॥ पुरातुविद्यतेनामब्राह्मणोमध्यदेशजः ॥ ब्रह्महत्यादिपापानिकृतवान्बहुशोनृप ॥
॥ १४ ॥ तेनचाकृतपापानिनसंतिधरणीतले ॥ भ्रांतोबभ्रामजगतींभृगुवाक्यात्ततोद्विजः ॥ १५ ॥
गोकर्णक्षेत्रमासाद्यमाघमासेनृपोत्तम ॥ प्रातःस्नात्वाकोटितीर्थेपूजयित्वामहाबलम् ॥ १६ ॥ ब्राह्म
णान्भोजयामासानिराहारोद्विजोत्तमः ॥ सर्वपापविनिर्मुक्तोअंतेस्वर्गमवाप्नुयात् ॥ १७ ॥ राजन्भो
तवदेहस्ययदित्वंसुखमिच्छसि ॥ गोकर्णक्षेत्रमासाद्यमाघमेकंनरोत्तम ॥ १८ ॥ प्रातःस्नात्वाकोटि
तीर्थेपूजयस्वमहाबलम् ॥ तवरोगोविनश्येतसर्वपापंविनश्यति ॥ १९ ॥ स्वस्थःस्वराज्यमासाद्यरं
जयस्वस्वकाःप्रजाः ॥ धर्मेणमेदिनींरक्षवेदशास्त्ररतोभव ॥ २० ॥ देवान्द्विजान्समभ्यर्च्यस्वस्थो
भवनृपोत्तम ॥ पुत्रैःपौत्रैश्चसहितोभुक्त्वाभोगाननेकशः ॥ २१ ॥ देहांतेसुरलोकंत्वंप्राप्स्यसेनात्र

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

द्राजत्रामेणपुनरुद्धृतम् ॥ भार्गवेणमहाभागाविष्णोरंशेनसत्तम ॥ ४४ ॥ ऋषिदेवमनुष्याणांहित
कामेनमत्तम ॥ पुनःसृष्टमभूत्तेनपूर्ववत्कुरुनंदन ॥ ४५ ॥ भगीरथोपिनृपतिस्तर्पयित्वापितॄन्स्व
कान् ॥ कल्पयामासतैगंगांदुहितृत्वेनृपोत्तमः ॥ ४६ ॥ तदाप्रभृतिराजेंद्रगंगाभागीरथीह्यभूत्
॥ पुनर्दशसहस्राणिवर्षाणिसभगीरथः ॥ ४७ ॥ राज्यंजुगोपधर्मेणादिविदेवपतिर्यथा ॥ सूतउवाच ॥
यइदंपठतेनित्यंशृणोतिसुसमाहितः ॥ सर्वपापविनिर्मुक्तःस्वर्गलोकंसगच्छति ॥ ४८ ॥ इति
श्रीस्कांदेगोकर्णपुराणेभगीरथगंगानयनंनामषट्चत्वारिंशोऽध्यायः ॥ ४६ ॥ ॥ ५
॥ सूतउवाच ॥अतःपरंशृणुविभोगोकर्णस्यपुनर्भवम् ॥ समुद्रमध्येराजेंद्रमध्यतोयोजनद्वयम् ॥१॥ स
ह्याच्चतुर्योजनतःपश्चिमेनकुरूद्वह ॥ ततःसंमंत्र्यऋषयोगोकर्णक्षेत्रवासिनः ॥ २॥ ब्रह्माणंशरणंगत्वाइ
दमूचुस्तपास्विनः ॥ ऋषयउचुः॥ ब्रह्मन्निरामयाःसर्वेगोकर्णेनिवसामहे ॥३॥ इदानींतन्महाक्षेत्रंमग्नमा
सीन्महार्णवे ॥ शतशृंगस्यशिखरंदृश्यतेलवणार्णवे ॥ ४ ॥ तदुद्धारेणभगवन्प्रसादंकर्तुमर्हसि ॥ तत

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

स्तेषांवचःश्रुत्वाब्रह्मालोकपितामहः ॥५॥ ध्यानेनालोक्यतत्सर्वंज्ञात्वातानिदमब्रवीत् ॥ सह्यांशिखरि
णांश्रेष्ठंगच्छध्वमविलंबितम् ॥ ६ ॥ तत्रकृत्वानिवासानिनिवसध्वंतपोधनाः ॥ जामदग्न्यस्यरामस्य
दीक्षामुपगतस्यच ॥ क्रतुःसमाप्यतेयावत्तावत्तत्रप्रतीक्षत ॥७॥ विश्वजिन्नामभद्रंवःक्रतुस्त्वद्यप्रवर्त्त
ते ॥ तदंतेदास्यतिविभुःसशैलवनकाननाम् ॥ ८ ॥ महींसर्वस्वमपिचऋतेतंशैलमुत्तमम् ॥ आत्मनःस
न्निवासार्थमहेंद्रंनामविश्रुतम् ॥९॥ यत्किंचिद्दियतेन्यत्रकाश्यपायसदास्यति ॥ तदायूयंकाश्यपेनस
हसंमंत्र्यसत्तमाः॥१०॥वरंयाचध्वममरागोकर्णोद्धारणायवै ॥ युष्माभिरर्थितःसोथकरिष्यतिहितंवचः
॥११॥ नशक्यमन्येनततस्रष्टुंचिंतितुमेववा ॥ प्रचेतसःपुनःप्राप्तुंशक्यंनान्येनकेनचित् ॥१२॥ सहि
शक्तोजगद्धातुर्विष्णोरंशःप्रतापवान् ॥ ब्रह्मेरितंतदाश्रुत्वादेवगंधर्वदानवाः ॥ १३ ॥ ऋषयश्चमहा
भागाःसकिंनरमहोरगाः ॥ मनुष्याःपक्षिणःसर्वेसह्याद्रिंप्रतिपेदिरे ॥ १४ ॥ कालप्रतीक्षयाराजन्गो
कर्णनिलयाःप्रभो ॥ ततःसमापयामासजामदग्न्योमहाक्रतुम् ॥ १५ ॥ सर्वस्वंराज्यमपिचब्राह्मणे

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

भ्योमहामतिः ॥ भूमिमाहूयराजेंद्रकन्यारूपधरांप्रभुः ॥१६॥ अलंकृत्ययथान्यायंकाश्यपायन्यवेदय
त् ॥ ततोगृहीत्वातांविप्रोदुहितृत्वेत्यकल्पयत् ॥१७॥ ततःप्रभृतिराजेंद्रकाश्यपीभूमिरुच्यते ॥ एतस्मि
न्नेवकालेतुतृणाग्निप्रमुखाद्विजाः ॥१८॥ गोकर्णनिलयाराजन्रामम्भ्याययुस्तदा ॥ कृताभिषेकंप्रवरं
कृतकौतुकमंगलम् ॥१९॥ ऋत्विग्भिःसहिताराजन्सदस्यैरभिसंवृतम् ॥ आशीर्भिर्वर्धयामासुर्मुनयो
भृगुनंदनम् ॥२०॥ ततस्तान्पूजयामासभार्गवोर्घ्यादिभिर्नृप ॥ पूजितास्तेनतोविप्राऊचुर्वाक्यंसुखासि
ताः ॥ २१ ॥ रामंशस्त्रभृतांश्रेष्ठंकाश्यपस्यमतेतदा ॥ अर्थिनस्त्वांवयंविप्रानिबोधभृगुनंदन ॥ २२ ॥
दातासित्वंमहाभागयोयदिच्छतितत्तथा ॥ अस्मन्मनोगतंतस्मात्प्रयच्छभृगुनंदन ॥२३॥ तच्छ्रुत्वा
भार्गवोरामस्तान्प्रणम्येदमब्रवीत् ॥ किमिच्छथमहाभागाब्रूहिकिंकरवाणिवः ॥ २४ ॥ सर्वस्वंचाद्वि
जश्रेष्ठाःशरीरमथवार्थितम् ॥ इतिरामवचःश्रुत्वाप्रहृष्टामुनयोब्रुवन् ॥२५॥ प्रतिपूज्यमहाभा[illegible]वास्ति
तोस्त्वितिकौरव ॥ श्रूयतांमुनिशार्दूलसर्वेषामर्थमच्युत ॥ २६ ॥ गोकर्णमितिविख्यातंसिद्धेःक्षेत्रंहि

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

जोत्तम ॥ तत्सागरैःक्रूरतरैःखनद्भिर्भूतलंनृप ॥ २७ ॥ समुद्रेपश्चिमेक्षिप्तंअधस्ताद्योजनद्वयम् ॥
तदुद्धारमिहेच्छामस्त्वत्तोवयमरिंदम ॥ २८ ॥ नशक्यमन्येनविभोप्राप्तुंतद्यादसांपतेः ॥ तस्मादु
द्धृत्यगोकर्णंतपसाचदमेनच ॥ २९ ॥ देहिरामभृगुश्रेष्ठमुनीनांभावितात्मनाम् ॥ तच्छ्रुत्वामुनिशार्दू
लःकाश्यपस्यप्रभाषितम् ॥ ३० ॥ प्रणम्यतान्मुनीन्रामःप्रतिज्ञामकरोत्प्रभुः ॥ दास्याम्युद्धृत्यगोक
र्णंयुष्माकंमुनिसत्तमाः ॥ ३१ ॥ प्रतिज्ञाययौरामःसमुद्रंसरितांपतिम् ॥ सहाविप्रैःसदस्यैश्चकाश्य
पेनचकौरव ॥ ३२ ॥ आसाद्यांभोनिधिंवीरइदंवचनमब्रवीत् ॥ प्रणम्यवरुणंरामोदर्शयस्वेत्य
भाषत ॥ ३३ ॥ त्वद्दर्शनमिहेच्छामिसहैभिर्मुनिपुंगवैः ॥ इत्युक्तस्तेनवरुणोनकिंचित्प्रत्यभाषत ॥
॥ ३४ ॥ ततश्चुकोपभगवान्रामःशस्त्रभृतांवरः ॥ क्रोधाग्निनाप्रजज्वालदिधक्षुर्वरुणालयम् ॥ ३५ ॥ ॥१३२॥
आग्नेयमस्त्रंधनुषिसंधायाकर्षयद्बलात् ॥ ततस्तमाहवरुणःप्रत्यक्षीभूयभार्गवम् ॥ ३६ ॥ रक्षस्वमांम
हाभागनिरागसमरिंदम ॥ किमर्थंमांप्रतिविभोक्रुद्धस्त्वंभृगुनंदन ॥ ३७ ॥ सतस्यवचनंश्रुत्वारामो

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

वचनमब्रवीत् ॥ गोकर्णनामभद्रंतेसिद्धानांक्षेत्रमुत्तमम् ॥ ३८ ॥ क्षिप्तंतत्त्वयिदेवेशपापिष्ठैःसगरात्म
जैः ॥ पुनस्तत्प्राप्तुमिच्छंतिलत्तोस्मान्निलयाद्द्विजाः ॥ ३९ ॥ तदेषांपूर्ववद्देवदोहिकौर्यत्यजाम्यह
म् ॥ तंतथेत्यब्रवीद्राजन्वरुणोयादसांपतिः ॥ ४० ॥ यावदिच्छसिवैप्राप्तुंतावद्देशंददाम्यहम् ॥ संह
रास्त्रंमहाभागआग्नेयंभृगुनंदन ॥ ४१ ॥ ततःसंहारमकरोद्रामःशस्त्रभृतांवरः ॥ संह्रतास्त्रंतदारामंव
रुणोवाक्यमब्रवीत् ॥ ४२ ॥ यावदिच्छसिवैप्राप्तुंभूमिमत्तोभृगूद्वह ॥ सीमैतदेवभवतुममरामा
ज्ञयातव ॥ ४३ ॥ सीमांकुरुमहाभागमर्यादामनुचिंतय ॥ इत्युक्तोभृगुशार्दूलोवरुणेनमहात्मना ॥
॥ ४४ ॥ स्त्रुवंगृहीत्वाचिक्षेपसीमार्थीवरुणालये ॥ ततस्तद्विशतंगत्वायोजनानांपपातह ॥ ४५ ॥
दक्षिणादुत्तरंगत्वासुरशूर्पाकृतिवतु ॥ तत्याजतावद्वरुणोस्त्रुवक्षेपान्महाबलः ॥ ४६ ॥ भीत्यारामं
स्यभगवान्भुवंत्यक्त्वांभसांनिधिः ॥ उद्धृत्यतन्महाक्षेत्रंसह्यशृंगेमहत्तरे॥४७॥गोकर्णपूर्ववद्राजन्ब्राह्म
णेभ्यःप्रदत्तवान् ॥ स्वयंगोकर्णमागत्यदृष्ट्वातत्क्षेत्रवैभवम् ॥ ४८ ॥ लिंगंतत्रप्रतिष्ठाप्यरुद्रयोन्यां

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

कुरूद्वह ॥ पूजयित्वायथान्यायंस्वस्थानमगमत्प्रभुः ॥ ४९ ॥ सूतउवाच ॥ शतशृंगस्यद्वौभागौस
मुद्रंपतितौनृप ॥ दुर्गाशृंगमितिख्यातंगोकर्णस्योत्तरेपतत् ॥ ५० ॥ नागशृंगमितिख्यातमपतद्दक्षि
णेपुरा ॥ तत्रमायोद्भवादुर्गाहत्वामाहिषमोजसा ॥ ५१ ॥ सिद्धिकामातपस्तेपेसाद्यापिकुरुनंदन ॥
आगत्यनागशृंगात्तुनागराजोमहाबलः ॥ ५२ ॥ संपूज्यशंकरंभक्त्यापुनर्गच्छेद्यथागतम् ॥ नाग
तीर्थमितिख्यातंसर्वपापप्रणाशनम् ॥ ५३ ॥ तीर्थमस्तिमहत्पुण्यंसर्वकामफलप्रदम् ॥ ५४ ॥ इति
श्रीस्कांदेगोकर्णपुराणेपुनरुद्धारोनामसप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥ ॥ छ ॥ ॥ ॥
॥ शतानीकउवाच ॥ नागशृंगंकथंतातअपतद्वरुणालये ॥ कोवानागपतिस्तत्रस्थितोवैसूतनंदन
॥ १ ॥ सूतउवाच ॥ शृणुराजन्कथांदिव्यांदुर्मुखस्यमहात्मनः ॥ शेषवंशोद्भवःश्रीमान्सुनंदोनामना
गराट् ॥ २ ॥ तस्यपुत्रोमहातेजादुर्मुखोनामनामतः ॥ सतपस्वीतपस्तेपेशतशृंगगतोवशी ॥ ३ ॥
तंदृष्ट्वादायगरुडउत्पपातविहायसा ॥ तपसातस्यनागस्यरुद्रभक्त्याचकौरव ॥ ४ ॥ पुनःपपातत्रै

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

वयत्र पूर्वमवास्थितः ॥ बिलंकृत्वाविवेशाथपुनःपक्षिपतेर्भयात् ॥ ५ ॥ ततःसमुत्पाट्य गिरिंशतशृंगैः
सहप्रभुः ॥ गोकर्णमभ्यगाद्राजन्भाविकर्मप्रचोदितः ॥ ६ ॥ भारार्त्तःपतगेंद्रात्तुपपातवरुणालये ॥
दक्षिणस्यांदिशिविभोगोकर्णस्याद्वियोजने ॥ ७ ॥ त्रियोजनोत्तरेतस्माद्गौरीशृंगंपपातह ॥ दक्षिणोत्त
रतस्तौहिगरुडात्पततांप्रभो ॥८॥ तत्रस्थोदुर्मुखोराजन्सस्माखृषभध्वजम् ॥ शरणंभवमेदेवमृत्योर्भी
ततरस्यवै ॥९॥ भक्तोयामितिमत्वामांक्षरस्वेतिपुनःपुनः ॥ तच्छ्रुत्वानागराजस्यभाषितंभवभंगकृत् ॥
॥ १० ॥ दर्शयामासतंदेवोवचनंचेदमब्रवीत् ॥ नागमाभैर्नतेमृत्युर्मत्प्रसादाद्भविष्यति ॥ ११ ॥
इत्युक्त्वानागराजस्यत्रिशूलेनोल्लिखत्प्रभुः॥ तंदृष्ट्वागरुडोराजन्त्रिशूलांकंशिरस्यथ ॥ १२ ॥ रुद्रदत्त
वरंराजन्वर्जयामासपक्षिराट् ॥ ततःप्रभृतितन्नाम्नाख्यातोभवदरिंदमः ॥ १३ ॥ त्रिशूलांकइतिप्राहुः
स्तंनागंदेवदानवाः ॥ सोद्यापिवर्त्ततेतत्रत्रिशूलांकोवृषायुधः ॥ १४ ॥ तस्मिन्नागबिलंनामविविक्तं
सेव्यमुत्तमम् ॥ अर्धयोजनविस्तारंसार्धयोजनमायतम् ॥ १५ ॥ नानारत्नमयंराजन्सुराकिंनरसेवित

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

म् ॥ नागराजस्यभवनेत्रिशूलांकस्यसत्तम ॥ १६ ॥ अर्धयोजनविस्तारेसार्धयोजनमायते ॥ ना
गस्त्रियोवसंत्यद्धादिव्यरूपामनोहराः ॥ १७ ॥ चतुःषष्टिमहाभागनागकन्यावसंतिहि ॥ नसंतिप
तयस्तासांसिद्धभोग्यासुरांगनाः ॥ १८ ॥ नमृत्युर्नजरातासांनव्याधिर्नेंद्रियक्षयः ॥ पातालात्सिद्धि
मिच्छंतःप्रविशंत्यत्रकेचन ॥ १९ ॥ तपसामहताराजन्मंत्रौषधिसमन्विताः ॥ ताभिःसहप्रमोदंते
बिलसिद्धिर्हिसास्मृता ॥ २० ॥ रुद्रेणशुक्रमुत्सृष्टंनिहितंतद्बिलेपुरा ॥ तद्रक्षायांनियुक्तास्तुत्रिशू
लांकास्त्रिशूलिना ॥ २१ ॥ तत्प्राश्यरुद्रोभवतिनात्रकार्याविचारणा ॥ औषध्योबहवस्तत्रजरामृत्यु
प्रबाधकाः ॥ २२ ॥ रुद्रप्रसादाल्लभ्यंतेनान्यथाकुरुसत्तम ॥ वसंतिपंचतीर्थानितस्मिन्गिरिवरेनघ
॥ २३ ॥ रुद्रकुंडंनागतीर्थंवसोर्धारमितिप्रभो ॥ अपरंविद्यतेतत्रसर्वतीर्थमयंशुभम् ॥ २४ ॥ शं
खतीर्थमितिख्यातंसर्वकिल्बिषनाशनम् ॥ सिद्धकुंडंचतत्रैवतीर्थान्येतानिपंचतु ॥ २५ ॥ तीर्थेषु
तेषुयःस्नातिसोनंतफलमश्नुते ॥ तस्माद्बिलाद्विनिष्क्रम्यत्रिशूलांकोविषायुधः ॥ २६ ॥ आगच्छति

॥१३४॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

सगोकर्णमासेपूर्णेतदानृप ॥ पूर्वपक्षस्यपंचम्यांसभृत्यसुतबांधवः ॥ २७ ॥ इदानीमपिकौरव्यमार्ग
स्तस्यमहात्मनः ॥ दृश्यतेभरतश्रेष्ठआगोकर्णात्तुसागरे ॥ २८ ॥ शिलायांदृश्यतेमार्गस्तस्यनागस्य
सत्तम ॥ गोकर्णक्षेत्रमागत्यसंपूज्यवृषभध्वजम् ॥ २९ ॥ स्नात्वासर्वेषुतीर्थेषुसर्वलिंगान्यनुक्र
मात् ॥ संपूज्यनागराजासौपुनर्गच्छतिकौरव ॥ ३० ॥ तस्मिन्शैलेकुरुश्रेष्ठषण्मासात्सिद्धिमा
प्नुते ॥ सर्वेद्रियाणिसंयम्यरागद्वेषविवर्जितः ॥ ३१ ॥ मौनव्रतधरस्तूष्णींकंदमूलफलाशनः ॥ सं
पूजयेज्जगन्नाथमीश्वरंपरमेश्वरम् ॥ ३२ ॥ नागराजंचराजेंद्रसावित्रीव्रततत्परः ॥ समहासिद्धि
माप्नोतिअणिमादीन्नसंशयः ॥ ३३ ॥ कर्णधारइतिख्यातःक्षेत्रपालःप्रतापवान् ॥ तच्छृंगपालना
र्थंहिनियुक्तःशूलपाणिना ॥ ३४ ॥ सोद्यापिवर्ततेतस्मिन्नागशृंगेनृपोत्तम ॥ कृष्णपक्षेचतुर्दश्यांब
लिंदद्यान्महात्मने ॥ ३५ ॥ नमस्तेकर्णधारायकामपालायतेनमः ॥ सर्वभूतपतेतुभ्यंनमस्तेक्षेत्रपा
लक ॥ ३६ ॥ इतिसंप्रार्थ्यतंपश्चाद्बलिंदद्याद्दिशोदश ॥ तस्याशुसिद्धिर्भवतिसोपिप्रत्यक्षतांव्रजे

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

त् ॥ ३७ ॥ स्त्रप्रभावंदर्शयेदस्यतदेवज्ञापनंनृप ॥ सिद्धोक्तंयद्वचःस्वप्नेतत्कुर्यात्सिद्धिमाप्नुयात् ॥३८॥
पिंगलोनामराजासीत्पुराकृतयुगेनघ ॥ सतस्मात्सिद्धिमापन्नःप्रसादात्परमेष्ठिनः ॥ ३९ ॥ अणि
मादिंमहाराजऐश्वर्यंराजसत्तमः ॥ सर्वेषांप्रददौराजातत्सिद्धिमविशंकितः ॥४०॥ ततःक्रुद्धःकर्णधार
स्तंगृहीत्वामहाबलः ॥ पाषाणोभवपापेतिप्राक्षिपद्वरुणालये ॥ ४१ ॥ क्षिप्तस्तेनमहाराजानिश्चेष्टः
समपद्यत ॥ शिलामयंतनूराजास्थितोसौमकरालये ॥ ४२ ॥ येनगच्छतिमांगोसौत्रिशूलांकोम
हावलः ॥ निक्षिप्यतंक्षेत्रपालइदंवचनमब्रवीत् ॥ ४३ ॥ अनेनैवप्रसादेनगोकर्णंगच्छपार्थिव ॥
यदागंतासितत्क्षेत्रंतदामुक्तोभाविष्यसि ॥ ४४ ॥ मासेनगच्छतिविभुःसराजाचतुरंगुलम् ॥ आ
गच्छन्सचगोकर्णाद्येनमार्गेणनागराट् ॥ ४५ ॥ तन्मार्गस्थोनृपश्रेष्ठऊह्यतेचतुरंगुलम् ॥ सो
द्यापिदृश्यतेमार्गेश्वाब्धिमध्येशिलामयः ॥ ४६ ॥ अच्छेदमात्मनःसिद्धिंसमयोस्तुसमाचरेत् ॥ नाग
शृंगस्यमाहात्म्यमुक्तंसंक्षेपतोमया ॥४७॥ इतिश्रीस्कांदेगोकर्णपुराणेअष्टचत्वारिंशोऽध्यायः॥४८॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

॥ शतानीकउवाच ॥ कथंगौरीसमुत्पन्नादुर्गाकात्यायिनीशुभा ॥ किमर्थंसातपस्तेपेशतशृंगग
तानघ ॥१ ॥ सूतउवाच ॥ प्रकृतिःपुरुषश्चैवनित्यौतौदंपतीनृप ॥ ताभ्यांजज्ञेचाखिलंतुत्रैलोक्यंस
चराचरम् ॥ २ ॥ नविनापुरुषेणासौप्रकृतिःस्थीयतेनघ ॥ तयाविनानपुरुषःकदाचिदपितिष्ठति
॥ ३ ॥ अपिनाभाविनौतौहिपरस्परमरिंदम ॥ तयाप्रकृत्यात्रैलोक्यंव्याप्यमासीन्निरामयम् ॥ ४ ॥
सायोगनिद्रादेवस्यविष्णोरमिततेजसः ॥ तदुद्भवंप्रवक्ष्यामिशृणुस्वस्त्ययनंमहत् ॥ ५ ॥ नाम्नावेत्रा
सुरोनामवेत्रवत्यांबभूवह ॥ सिंधुद्वीपेमहावीर्योसर्वदैत्यगणान्वितः ॥ ६ ॥ प्राग्ज्योतिषाधिपःसो
थबलवानरिमर्दनः ॥ भूलोकमसृजत्पूर्वंसशैलवनकाननम् ॥ ७ ॥ जित्वाभूलोकमगमन्मेरुपृष्ठंम
हासुरः ॥ तत्रेंद्रंप्रथमंजित्वाअग्निमभ्यगमद्बली ॥ ८ ॥ अग्निनासहदेवेंद्रःपलायनपरोभवत् ॥ प्रा
द्रवंतिभयात्तस्यदेवादेवर्षयस्तथा ॥ ९ ॥ स्वानिस्थानानिसंत्यज्यब्रह्मलोकंगतानृप ॥ कारयामास
चेंद्रत्वमग्नित्वंचमहासुरः ॥ १० ॥ यमत्वंनैर्ऋतत्वंचवारुणत्वंचवायवम् ॥ निराकृतासुरास्तेनब्रह्मा

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

र्णांशरणंगताः ॥११॥ ऊचुःप्रांजलयःसर्वेविधिंसर्वैसुरासुराः ॥ देवाऊचुः ॥ वेत्रासुरभयार्त्तानामस्माकं
शरणंभव ॥ त्वयानाथेनदेवेशअनाथाइवसंप्रति ॥ १२ ॥ स्वानिस्थानानिसंत्यज्यदारांश्चैवधनानिच
॥ केवलंत्वांवयंदेवजीवनार्थमुपागताः ॥१३॥ तच्छ्रुत्वापद्मभूर्विष्णुंपूजयामासभक्तितः ॥ शंखचक्र
गदापाणिंश्रीवत्सांकितवक्षसम् ॥१४॥ निवेदयामासततोवेत्रासुरविचेष्टितम् ॥ तच्छ्रुत्वाभगवान्वि
ष्णुःपुंडरीकनिभेक्षणः ॥ १५ ॥ क्रोधमाहारयत्तीव्रंवधायास्यदुरात्मनः ॥ क्रुद्धस्यतस्यदेवस्यभृकुटी
कुटिलाननात् ॥ १६ ॥ ब्रह्मणश्चमहत्तेजोनिर्ययौवदनाद्बहिः ॥ इंद्रादीनांचदेवानांललाटात्तेजआब
भौ ॥ १७ ॥ तच्चैक्यंसमपद्याशुक्षणेनकुरुनंदन ॥ तत्तेजोवक्त्रधेराजेन्नादसीप्रत्यदीपयत् ॥ १८ ॥त
त्क्षणादभवन्नारीदेवीदिव्यस्वरूपिणी ॥ यदभूच्छांभवंतेजस्तेनाजायततन्मुखम् ॥१९॥ याम्येनच्चा
भवन्केशाबाहवोविष्णुतेजसा ॥ सौम्येनस्तनयोर्युग्मंमध्यंचैंद्रेणचाभवत् ॥ २० ॥ वसूनांचकरांगु
ल्यःकौबेरेणचनासिका ॥ तस्यास्तुदंताःसंभूताःप्राजापत्येनतेजसा ॥ २१॥ नयनत्रितयंजज्ञेतथापा ॥१३६॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

वकतेजसा ॥ भ्रुवौचसंध्ययोस्तेजः श्रवणावनिलस्यच ॥ २२ ॥ अन्येषांचैवदेवानामभवत्तेजसांसि
वा ॥ ततःसमस्तदेवानांतेजोराशिसमुद्भवाम् ॥२३ ॥ तांविलोक्यमुदंप्रापुर्देवावेत्रासुरार्दिताः ॥ शू
लंशूलीददौतस्यैचक्रंचक्रीतश्याददौ ॥ २४ ॥ ब्रह्मदंडंददौब्रह्मायमदंडंददौयमः ॥ वरुणःपाशमददा
द्वायुःशंखंप्रतापवान् ॥२५॥ इंद्रोवज्राद्ददौवज्रंशक्तिमाग्निस्तथापराम् ॥ पयःक्षीराब्धिरददाद्धारंचूडा
मणिंतथा ॥२६॥ हिमवान्सिंहमददाद्रत्नानिविविधानिच ॥ घंटामैरावतोनामाददौतस्यैमहाबलः ॥
॥ २७ ॥ हारकेयूरमुकुटान्विश्वेदेवाददुःपृथक् ॥ एवंदेवाददुस्तस्यैमंडनान्यायुधानिच ॥ २८ ॥ त
तोननादसादेवीकंपयंतीवरोदसी ॥ ततश्चचालपृथिवीसशैलवनकानना ॥ २९ ॥ द्यौश्चापिचुक्षुभे
प्यासीत्तस्यानादेनभीषिता ॥ सर्वमाविग्नमभवद्ब्रैर्यास्तदूर्जितेनच ॥ ३० ॥ तांदृष्ट्वाचजगुर्देवाः
स्तोत्रंचक्रुःपृथक्पृथक् ॥ जयत्वंदेविलोकानांमातात्वमसिभामिनि ॥ ३१ ॥ प्रकृतिर्विकृतिःसूक्ष्मा
योगनिद्रामहत्यपि ॥ त्वयाग्रस्तामिदंसर्वमाययासचराचरम् ॥३२ ॥ त्वंस्वाहात्वंस्वधादेविलमोंका

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

रानिरामया ॥ क्रियाकालीकरालक्ष्चलक्ष्मीःपुष्टिःसरस्वती ॥ ३३ ॥ लज्जाकीर्तिरुमादेवीप्रभामा
याश्रुतिर्दमा ॥ बुद्धिःसिद्धिरलंकाराश्रीर्मेधामधुरारमा ॥ ३४ ॥ गीर्वेदगर्भात्वंदेविदेवगर्भातथा
दितिः ॥ दैत्यगर्भादितिस्त्वंहिभूतगर्भाधराधरा ॥ ३५ ॥ त्वयाततमिदंविश्वंमहामायेनमोस्तुते ॥
ब्रह्मश्रीब्रह्मविश्वेशानुग्रहोनास्तिभामिनि ॥ ३६ ॥ विश्वोपकारिणीयस्माच्छरणंभवनोनघे ॥ स
र्वेषांप्राणिनांदेविशक्तिरित्यभिधीयसे ॥ ३७ ॥ त्वदुपेक्षयाजगत्सर्वंहीयतेससुरासुरम् ॥ त्वद
पेक्षयाविवर्धंतदेवोवादानवोपिसन् ॥ ३८ ॥ स्थितिसंहारकर्त्रीत्वंभूतानांभूतभाविनी ॥ त्वमेवजा
नासिजगत्त्वांनजानातिकश्चन ॥ ३९ ॥ पुरुषाधिष्ठितत्वाच्चयोगनिद्रेतिकथ्यसे ॥ इदानींसर्वदे
वानांदेहान्निष्क्रम्यशोभने ॥ ४० ॥ स्वरूपधारिणीदेविदृष्टिगोचरतांगता ॥ दुर्जयत्वाद्दुर्गमत्वा ॥१३७॥
न्नाम्नादुर्गेतिकथ्यसे ॥४१॥इतिश्रीस्कांदेगोकर्णपुराणेदुर्गासंभवोनामएकोनपंचाशोऽध्यायः॥४९॥
॥ सूतउवाच ॥ इतिस्तुतातदादेवीननादपरमेश्वरी ॥ तच्छ्रुत्वासकलालोकाचुक्षुभुःकुरुसत्तम ॥ १ ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

वेत्रासुरोपितच्छ्रुत्वानादंलोकभयंकरम् ॥ किमेतदितितंदेशमगमत्सबलोसुरः ॥२॥ ददर्शरूपंतद्देव्या
त्रैलोक्यव्यापकंशुभम् ॥ सहस्रबाहुभिर्व्याप्तंदिशोदशाविजृंभितम् ॥ ३ ॥ गर्जमानंनभोव्याप्तंयु
गांताग्निरिवोत्थितम् ॥ असुरोजातसंतापोयुयुधेसबलोनृप ॥ ४ ॥ ततःप्रवृत्तंयुद्धंतुतयातैर्महदद्भुत
म् ॥ शस्त्रास्त्रवर्षैरसुराअभ्यवर्षन्तदांबिकाम् ॥ ५ ॥ सापिछित्वास्त्रवर्षाणिरक्षसांभद्रकर्णिका ॥
जहासोच्चैर्भगवतीकंपयंतीवरोदसी ॥ ६ ॥ ततोमुखाद्विनिश्चेरुर्विविधायुधपाणयः ॥ भयंकरागणा
देव्यावक्रतोयुद्धलोलुपाः ॥ ७ ॥ युयुधेराक्षसैर्देवीभक्षयामासचासुरान् ॥ तेभक्ष्यमाणाह्यसुराक्षणा
न्नैशुरितस्ततः ॥ ८ ॥ पराजयंस्वसैन्यस्यदृष्ट्वासेनापतिर्महान् ॥ नियसोनामदैत्येंद्रःसोभ्यधावतवी
र्यवान् ॥ ९ ॥ गृहीत्वात्रिशिखंराजन्बहुयोजनविस्तृतम् ॥ भ्रामयित्वासाचिक्षेपगौरींप्रतिरुषान्वि
तः ॥ १० ॥ चूर्णयामासतद्देवीशतधाथसहस्रशः ॥ चक्रेणाशितधारेणवज्रेणचवरानना ॥ ११ ॥
ततस्त्रिशूलमुद्यम्यचिक्षेपवियसोरसि ॥ निर्भिन्नहृदयःसोथपपातचममारच ॥ १२ ॥ तस्मिन्हते

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

महावीर्यैर्वियसेत्रिबुधार्दने ॥ प्राद्रवन्भयसंतप्ताराक्षसाःसर्वतोदिशम् ॥ १३ ॥ तदृष्ट्वादनुजश्रेष्ठोष
ड्गोनामवीर्यवान् ॥ अभिदुद्राववेगेनभद्रकालींनिशाचरः ॥ १४ ॥ ववर्षशरवर्षेणननादचमहासु
रः ॥ चिच्छेदतान्छरान्देवीखड्गेननिशितेनच ॥ १५ ॥ नानारूपाणिशस्त्राणिराक्षसामुमुचुस्ततः॥
तान्हत्वाभक्षयामासुरंबिकानुचरामुदा १६॥ ततोनिशाचरःखड्गंगृहीत्वाचर्मचोत्तरम् ॥ जघानोर
सिचंडेशींवेगेनमहतायुतः ॥ १७ ॥ बभंजसातदाखड्गंशूलपातेनचंडिका ॥ ततःकेशंगृहीत्वातु
शिरश्चक्रेणचाच्छिनत् ॥ १८ ॥ छिन्नशीर्षःपपातोर्व्यांषड्भंगोगतजीवितः ॥ क्षणेनसैनिकान्ह
त्वाभक्षयामासचंडिका ॥ १९ ॥ हत्वातस्यबलंसर्वंचतुरंगंतथांबिका ॥ अभ्यधावतवेगेनवेत्रासुरम
नर्गलम् ॥ २० ॥ तामापतंतींवेगनसंप्रेक्ष्यचमहासुरः ॥ जघानबहुभिश्चास्त्रैर्वज्रकल्पैर्दुरासदैः ॥
॥ २१ ॥ सापितंशरवर्षेणववर्षसुरनंदिनी ॥ मायाभिर्बहुभिर्भूपपरस्परमयुध्यताम् ॥ २२ ॥ शि
लाभिःसर्वतश्चैवमुसलैर्दुःसहैरपि ॥ शक्त्यृष्टिभिःपरशुभिर्भिंडिपालैश्चखड्गिनः ॥ २३ ॥ बिभे ॥१३८॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

दतत्क्षणाद्देवीचक्रधाराभिरप्युत ॥ ततोजघानतंदेवीदैत्यंशूलेनवेगिता ॥ २४ ॥ सोपितांगदयावी
रोजघानोरसिवीर्यवान् ॥ द्विधाचक्रेचचक्रेणसादेवीचगदांतदा ॥२५॥ छित्वागदांपरशुनाताडयामा
ससासुरम् ॥ एवंपरस्परंराजन्चक्रतुर्युद्धमद्भुतम् ॥ २६ ॥ दिव्यवर्षशतंयुद्धंतयोस्तत्राभवन्नृप ॥ त
तोजग्राहतंदेवीमूर्धजेषुमहासुरम् ॥ २७ ॥ शूलेनताडयामासखड्गेनचवरानना ॥ चक्रेणकालदंडे
नवज्रेणचसुलोचना ॥ २८ ॥ युगपत्ताडयामासशस्त्रैरस्त्रैरनिंदिता ॥ संताड्यमानेबहुधादेव्या
वेत्रवतीसुतः ॥ २९ ॥ तत्याजजीवितंदैत्यःपपातचमहासुरः ॥ हतेवेत्रासुरेघोरेब्रह्माविष्णुमहेश्वराः
॥ ३० ॥ अभ्यनंदंस्तदादेवींतुष्टुवुश्चतदासुराः ॥ त्वयानाथावयंदेवित्वदाधाराश्चभामिनि ॥ ३१ ॥
त्वयैवचाल्यमानाश्चवसामोत्राकुतोभयाः ॥ त्वमंबासर्वभूतानांतस्मात्त्वामंबिकांविदुः ॥ ३२ ॥ यो
गानांप्रविभागज्ञाद्वैताद्वैतविधायिनी ॥ योगेश्वरीतित्वामाहुर्योगिनोवरवर्णिनि ॥ ३३ ॥ त्वंमाय
यामोहयसिजगत्स्थावरजंगमम् ॥ तस्मात्त्वामाहुरमलामहामायेतिभामिनि ॥ ३४ ॥ त्वयाततमि

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

दंविश्वंशक्तिरूपेणशोभने ॥ सुरासुराणांकल्याणित्वंभयेत्वभयप्रदा ॥ ३५ ॥ भक्तार्तिभंजनपरे
तेषांचाप्यभयप्रदे ॥ त्वयाहतोघपापिष्ठोदेवानांरिपुरूर्जितः ॥ ३६ ॥ वेत्रासुरोमहाघोरोबाधतेहर्निशं
प्रजाः ॥ तद्गीत्याज्याज्यसर्वस्वंदेवाअपिबिलंगताः ॥ ३७ ॥ त्वत्प्रसादात्पुनःप्राप्ताःस्वस्थानंदेव
तागणाः ॥ तस्मान्नमोस्तुतेदेविभद्रंनःप्रदिशानघे ॥ ३८ ॥ इतिसंस्तूयमानासादेवीदेवैर्मुदंययौ ॥
अथतामाहभगवान्ब्रह्मालोकगुरुःस्वयम् ॥ ३९ ॥ भविष्यत्कार्यमुद्दिश्यभूतभव्यभाविष्यकृत् ॥ ग
च्छभद्रेहिमागेरिंमन्नियोगादनिंदिते ॥ ४० ॥ शतशृंगमितिख्यातंशृंगमस्यमहागिरेः ॥ ममाश्रमं
महाभागेसुरासुरनमस्कृतम् ॥ ४१ ॥ तत्रत्वंवसकल्याणिनिशुंभश्चमहासुरः ॥ जगत्प्रबाधमानस्तु
तमोगुणसमुद्भवः ॥ ४२ ॥ तत्सहायामहादैत्याबलिनोलोककंटकाः ॥ मृत्युरूपाहितेषांत्वंतस्मा
द्गच्छमहागिरिम् ॥४३ ॥ हंतव्यास्तेमहादेविनान्यैःशक्यंसुरासुरैः ॥ मयादत्तवरास्तेहिमृत्युस्तेषांत्व
मंबिके ॥ ४४ ॥ तच्छ्रुत्वादेवदेवस्यवचनंभद्रकर्णिका ॥ तथेत्युक्त्वाययौदेवीशतशृंगंमहागिरिम् ॥१३९॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

॥ ४५ ॥ समस्तभूतसहितातपश्चर्तुंप्रचक्रमे ॥ अजशृंगमितिख्यातंतद्धिगौर्यधिवासितम् ॥ तेन
सार्धसमुत्पाट्यगरुडःपततांवरः ॥ ४६ ॥ पपातगोकर्णमभिपतितंतद्धिसागरे ॥ आर्यादुर्गाधिवस
नादार्याशृंगमितीर्यते ॥ ४७ ॥ सूतउवाच ॥ दशतीर्थानिकौरव्यगौरीशृंगेवसंतिहि ॥ शतानांचै
वतीर्थानांतानिमुख्यानिसत्तम ॥ ४८ ॥ गंगाधारंवसोर्धारंमाहिषंतीर्थमुत्तमम् ॥ गौरीह्रदंनागती
र्थंचामुंडोद्भवमेवच ॥ ४९ ॥ कालीह्रदंचकौमारमाप्सरंवारुणंतथा ॥ मुख्यानितानिराजेंद्रसहस्र
प्रवराणिच ॥ ५० ॥ तेषुस्नात्वानरोभक्त्यानवम्यांचविशेषतः ॥ त्रिजन्मचरितैःपापैर्मुक्तोरुद्रत्वमा
प्नुयात् ॥ ५१ ॥ दृष्ट्वादुर्गांततोभक्त्यासर्वान्कामानवाप्नुयात् ॥ आचार्यशृंगगादुर्गांप्राप्यगोकर्णमु
त्तमम् ॥५२॥ धर्माश्रमेस्वयंस्थित्वाशतशृंगतटेशुभे ॥ तीर्थंकृत्वासुविमलंतत्रस्नात्वास्वयंनृप॥५३॥
ततःकृत्वासुनियतंप्राप्यसिद्धिंसुदुर्लभाम् ॥ द्वारपालस्त्वमासाद्ययमलोकस्यदक्षिणे ॥ ५४ ॥ नंदिनी
नामसादुर्गायथास्थानंगतानृप ॥ सूतउवाच ॥ दुर्गाकुंडंनागतीर्थमस्तिधर्माश्रमान्नृप ॥ ५५ ॥ द

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

क्षिणेराजशार्दूलशरपातेशुभेस्थले ॥ चैत्रशुक्लनवम्यांतुस्नानंतत्रप्रशस्यते ॥ ५६ ॥ सर्वपापहरंपुण्यं
तत्तीर्थंसर्वकामदम् ॥ ५७ ॥इतिश्रीस्कांदेगोकर्णपुराणेदुर्गाकुंडवर्णनंनामपंचाशोऽध्यायः ॥ ५० ॥
॥ सूतउवाच ॥ दितेःपुत्रोमहातेजामहिषोबलदर्पितः ॥ ब्रह्मदत्तवरःसोथत्यजयत्सर्वविष्टपम् ॥१॥ तं
हत्वासानुगंदैत्यंसर्वदेवैःसुपूजिता ॥ ततःशुंभादिकान्दैत्यान्साहत्वारणभूर्धनि ॥ २ ॥ सान्यायुधा
निसंक्षाल्यशतशृंगतटेसुभे ॥ तपसेकृतसंकल्पात्यास्तेसादक्षिणामुखा ॥ ३ ॥ आयुधानिक्षालिता
नियत्रैवकुरुसत्तम ॥ तत्कालिह्रदयाख्यातंखड्गतीर्थमितीर्यते ॥४॥ तत्रस्नानंनकुर्वीतदर्शनात्पुण्यवर्ध
नम् ॥ दृष्ट्वैवपूजांकुर्वीततदनंतफलप्रदा ॥५॥ महाकालींसमभ्यर्च्यसर्वान्कामानवाप्नुयात् ॥गोकर्णक्षेत्र
रक्षार्थानियुक्ताशंभुनाहिसा ॥ ६ ॥ महाकाल्याश्रमंपुण्यंसर्वपापप्रणाशनम् ॥ सूतउवाच ॥ तस्माद्वा
यव्यदिग्भागेक्रोशमध्येतिपावनम् ॥ रुद्रपादमितिख्यातंसर्वपापप्रणाशनम् ॥ ७ ॥ पुराराजामित्रस
हःसूर्यवंशसमुद्भवः ॥ वसिष्ठेनैवशप्तःसन्राक्षसत्वमुपागतः ॥८॥ तेनरोषेणवमुनेःपुत्रानेकोत्तरंशतम् ॥

॥१४०॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

भक्षयामासदुष्टात्माराक्षसोघोरदर्शनः ॥ ९ ॥ दुर्गतित्वंततःप्राप्तावसिष्ठस्यसुताश्चते ॥ तेषांतद्दोषशां
त्यर्थंशक्तिपुत्रःपराशरः॥१०॥वसिष्ठेनसमाज्ञप्तोगोकर्णक्षेत्रमागमत् ॥ रुद्रपादंप्रतिष्ठाप्यतपःकुर्वन्महे
श्वरम् ॥ ११ ॥ तोषयामाससमुनिराज्ञयातस्यसत्तम ॥ श्राद्धंदत्वाविधानेनपिंडंदत्वातिलोदकम् ॥
॥ १२ ॥ स्वापितृभ्यःस्वशक्त्यातुततःशक्त्यादयश्चते ॥ तृप्ताःसर्वेब्रह्मलोकंजग्मुःसर्वसुखाश्रयम् ॥
॥ १३ ॥ ततोविप्रःसुहोत्राख्योमधुरायांसमुद्भवः ॥ कृत्वापापानिबहुशःस्वापितॄंश्चह्यपातयत् ॥१४॥
ततःस्वपितृवाक्येनगत्वागोकर्णमुत्तमम् ॥ रुद्रपादंसमासाद्यददौपिंडांतिलोदकम् ॥ १५ ॥ ततस्त
त्पितरःसर्वेस्वर्गलोकंययुर्नृप ॥सूतउवाच॥ वैवाहिकगिरेराजन्प्रतीच्यांदिशिवर्त्तते ॥१६॥ तस्माद्गि
रेःपूर्वदिशियानितीर्थानिसंतिहि ॥ तानितेकथयिष्यामिशृणुष्वनृपपुंगव ॥ १७॥ नहुषोराजशार्दूल
स्तवपूर्वपितामहः ॥ तपःकृत्वाविधानेनतत्रसिद्धिमुपागतः ॥ १८ ॥ अंबरीषोपिराजर्षिःसूर्यवंशस
मुद्भवः ॥ तीर्थंकृत्वासुविमलंतपसासिद्धिमागतः ॥ १९ ॥ नलोनिमिश्चनाभागोययातिश्चतथैव

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

च ॥ इक्ष्वाकूराजशार्दूलोबाणोबालिसुतस्तथा ॥ २० ॥ तपसामहताराजन्नेतेसिद्धिमुपागताः ॥ त
स्मात्प्राच्यांमहाराजक्रोशार्धेनिर्मलेस्थले ॥ २१ ॥ तपःकृत्वासुनियतंसिद्धिमापमहत्तराम् ॥ शतशृं
गगिरेर्मूर्ध्निमणिभद्रस्तथैवच ॥ २२ ॥ कोटितीर्थात्पूर्वदिशिव्यासःपुत्रसमन्वितः ॥ तपसामहता
राजन्सिद्धिमापसुदुर्लभाम् ॥२३॥ हिडिंबापितपस्तप्त्वासिद्धिंप्राप्तानृपोत्तम ॥ वेदाःशास्त्रसमायुक्ता
सिद्धिमापुस्तथैवच ॥ २४ ॥ गौतमस्तपतांश्रेष्ठइंद्रश्चापिशचीपतिः ॥ हनूमांश्चापिराजेंद्रतोषयि
त्वामहेश्वरम् ॥ २५ ॥ वज्रदेहमवापोच्चैर्दुर्जयत्वंचसंयुगे ॥ दुर्वासास्तपतांश्रेष्ठोदत्तात्रेयसमन्वितः
॥ २६ ॥ योगसिद्धिमवापाग्र्यांप्रसादाच्छंकरस्यतु ॥ विश्वकर्माकुरुश्रेष्ठतपसासिद्धिमागमत् ॥
॥ २७ ॥ शतशृंगगिरेस्तस्यदक्षिणस्यांकुरूद्वह ॥ तपसासिद्धिमापन्नान्शृणुष्वगदतोमम ॥ २८ ॥
तृणाग्निःकाश्यपश्चैवकपोतःसुरसातथा ॥ केसरीचकपिश्रेष्ठोविश्वेदेवास्तथैवच ॥ २९ ॥ वसुग्रहा
धिपाश्चैवजमदग्निर्भृगुस्तथा ॥ क्रतुरत्रिश्चांगिराश्चभरद्वाजस्तथैवच ॥ ३० ॥ नारदश्चैववाल्मीकि

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

स्तपसासिद्धिमागताः ॥ कोटितीर्थाद्दक्षिणस्यांप्रल्हादोदैत्यनायकः ॥ ३१॥ कृष्णश्चयादवश्रेष्ठस्तप
सासिद्धिमागतः ॥ दुर्मुखोनामव्याधोपितपसासिद्धिमाप्तवान् ॥३२ ॥ तथान्येनृपशार्दूलऋषयोदेव
तागणाः ॥ नानाराजर्षयश्चैवासिद्धिंप्राप्ताःपुरानघ ॥ ३३ ॥ असंख्यातान्याश्रमाणिसंतितत्रमहा
गिरौ ॥ आक्रीडाशैलमारभ्यशतशृंगतटेशुभे ॥ ३४ ॥ दक्षिणेकुरुशार्दूलसंतितत्रपृथक्पृथक् ॥
कामाघनाशिनीयत्रनदीपुण्यजलाशुभा ॥ ३५ ॥ तन्मध्यस्थिततीर्थानांनामधेयानिपार्थिव ॥ तेषां
पुण्यफलंवक्तुंनशक्यंहिमयानृप ॥ ३६ ॥ येमहत्वमभीप्संतितेतत्रनिवसंतिहि ॥ युगंपाश्चिममासा
द्यह्यदृश्याविचरंतिहि ॥३७॥ तपःस्वाध्यायनिरतायजंतोवृषभध्वजम् ॥ नतेषांनामधेयंतुवक्तुंशक्यं
कुरूद्वह ॥३८॥ तस्माच्छ्रेष्ठतमंलोकेगोकर्णंसुरपूजितम् ॥ तस्मिन्श्रेष्ठेनृपश्रेष्ठमुक्तिकामावसंतिवै
॥ ३९ दानंव्रतोपवासंचतपःस्वाध्यायमेवच ॥ तत्रकुर्वंतियेराजन्लभंतेतेसमीहितान् ॥ ४० ॥
॥ इतिश्रीस्कांदेगोकर्णपुराणेएकपंचाशोऽध्यायः ॥ ५१ ॥ ॥छ॥ ॥छ॥ ॥छ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

॥ सूतउवाच ॥ ततःशालूकिनीतीरेतपसासिद्धिमागतान् ॥ कथयामिनृपश्रेष्ठशृणुष्वगदतोमम
॥ १ ॥ मेरुःस्वपुत्रसहितःशालूकिन्यास्तटेशुभे ॥ आश्रमंसुमहत्कृत्वातपसासिद्धिमाप्तवान् ॥२॥
कृतत्रेतद्वापरश्चकलिश्चेतिचतुर्युगाः ॥ दिशश्चविदिशश्चैवकहोलःकनकःकषः ॥ ३ ॥ गालवोरोम
शश्चैवतपसासिद्धिमागताः ॥ अधर्मश्चनृपश्रेष्ठतस्यपुत्रास्तथैवच ॥ ४ ॥ असूयामत्सरीचंडीक्रो
धोद्वेषोक्षमातथा ॥ ईर्ष्यालक्ष्मीश्चघोराचमोहनाचततःपरम् ॥ ५ ॥ अधर्मपुत्राराजेंद्रतपसासिद्धिमा
गताः ॥ धर्मपुत्राञ्शृणुष्वत्वंशमादीन्नृपपुंगव ॥ ६ ॥ क्षमासत्यंदमःकीर्तिरहिंसानंदएवच ॥ बुद्धि
र्मानस्तथाराजन्लक्ष्मीर्लज्जाश्रुतिःस्मृतिः ॥ ७ ॥ तथामेधाधर्मपुत्रास्तपसासिद्धिमागताः ॥ शता
नीकउवाच ॥ शालूकिन्यास्तुमाहात्म्यंवदमेसूतनंदन ॥ विस्तरेणमुनिश्रेष्ठश्रोतुंकौतूहलंहिमे ॥८॥
॥ सूतउवाच ॥ पुराभगीरथोराजागंगांसंतोष्ययत्नतः ॥ पितृणांतारणार्थायगंगामानीतवान्दिवः ॥
॥ ९ ॥ जन्होराश्रममासाद्यगंगयासहपार्थिवः ॥ तत्रदृष्ट्वातपस्यंतंजन्हुमाहनृपस्तदा ॥ १० ॥ मु

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

नैचायातिगंगात्रवेगेनमहतायुता ॥ इदंस्थानंपरित्यज्यथाहिचान्यत्रवैद्रुतम्॥ ११ ॥ एवमुक्तेनृपति
नाराजानंप्राहवैमुनिः ॥ गमनेन्यत्रनोशक्तिर्यद्वाविनतदन्यथा ॥१२ ॥ एवमुक्त्वानृपंजन्हुर्गंगांदृष्ट्वा
पपौक्षणात् ॥ ततोभगीरथोराजापृष्ठतोवीक्ष्यसत्वरम् ॥ १३ ॥ तत्रगंगामदृष्ट्वैवज्ञात्वातन्मुनिचेष्टि
तम् ॥ चिंतामवापमहतींदुःखेनमहतायुतः ॥ १४ ॥ ततस्तन्निकटेस्थित्वाकृतवान्परमंतपः ॥
एवंतपस्यतस्तस्यतुष्टोभूत्वामहामुनिः ॥ १५ ॥ जानुंभित्वाददौजन्हुर्गंगांतस्मैकुरूद्वह ॥ तदाभगी
रथोगंगांदृष्ट्वासंहृष्टमानसः ॥ १६ ॥ मुनेरनुज्ञांसंगृह्यगंगयासहतत्क्षणात् ॥ गत्वाभगीरथोराजापा
तालेकपिलाश्रमम् ॥ १७ ॥ स्वपितॄन्तारयामासगंगयाकुरुपुंगव ॥ जन्हुःस्वस्याश्रमेराजन्यथापू
र्वमतिष्ठत ॥१८॥ ततःकालेनमहताजन्होराश्रममागमत् ॥ मुनिःसत्यतपानामसत्यवाग्विजितेंद्रियः
॥१९॥ तमागतमभिप्रेक्ष्यजन्हुःसत्यतपाह्वयम् ॥ अभ्युत्थायासनंदत्वापूजांचक्रेयथाविधि ॥ २० ॥
कुशलंपरिपृष्ट्वातुजन्हुःप्रोवाचतन्मुनिम्॥ कुतआगम्यतेविद्वन्दुर्लभंतवदर्शनम्॥२१॥ब्रूहिमेमुनिशार्दू

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

लअत्रागमनकारणम् ॥ सत्यतपा उवाच ॥ पुष्पभद्रानदीतीरेस्थितोहंसुचिरंमुने ॥ काशीक्षेत्रादिकं गत्वात्यागतोहंतवांतिकम् ॥ २२ ॥ दर्शनार्थमुनिश्रेष्ठशृणुष्वेदंवचोमम ॥ श्रुत्वाभगीरथेनोक्तंवचः सत्यंमुनीश्वर ॥ २३ ॥ मोहात्त्वयातिरस्कृत्यहास्ययुक्तेनचेतसा ॥ पीतासुरनदीनूनमयुक्तंकृतवान सि ॥ २४ ॥ तदादिदोषशांत्यर्थंक्षिप्रंसिद्धिकरंव्रज ॥ पश्चिमांवुधितीरस्थंक्षेत्रंगोकर्णनामकम् ॥ २५॥ तत्रशालूकिनीनामनदीसर्वमलापहा ॥ आस्तेसारुद्रयोन्यास्तुउदीच्यांदिशिवैमुने ॥ २६ ॥ कोश ह्रयेमहापुण्यातत्तीरेत्वंसमाहितः ॥ गंगामूर्त्तिंप्रतिष्ठाप्यपूजयस्वयथाविधि ॥ २७ ॥ एवंत्वयाकृतेत त्रलोकवादोद्भवोद्विज ॥ दोषःक्षिप्रंलयंयातिगंगायास्तुप्रसादतः ॥ २८ ॥ अत्रतेकथयिष्यामिपुरावृ त्तंमुनेतव ॥ रोमपादपृथुग्रीवौकंडुश्चेतिद्विजास्त्रयः ॥ २९ ॥ वेदाभ्यासंप्रकुर्वंतोमत्सेवातत्पराय णाः ॥ ऊषुर्मदाश्रमेविप्रास्तेभ्यःसर्वाण्यनुक्रमात् ॥ ३० ॥ अब्रुवंवेदशास्त्राणिप्रीतियुक्तेनचेतसा ॥ एकदामांसमभ्येत्यपृथुग्रीवोब्रवीद्वचः ॥ ३१ ॥ गुरोद्यकंडुनापीतासुरातद्रोमपादकः ॥ दृष्टवानपि

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तत्सर्वंभवान्युक्तंकरोतुयत् ॥ ३२ ॥ इत्युदीरितमाकर्ण्यरोमपादंचपृष्टवान् ॥ सोपिमित्यमितिप्राह
ततोहंकंडुमुक्तवान् ॥३३॥ यस्मात्त्वमीदृशंकर्मकृतवानसिगर्हितम् ॥ याहिमद्भवनाच्छीघ्रंयस्मात्त्वं
ब्राह्मणाधम॥३४॥इत्युदीरितमाकर्ण्यमहावाक्यंब्राह्मणोत्तमः॥ साष्टांगंप्रणिपत्योर्व्यांमांकृतांजालिरब्रवी
त्॥३५॥स्वामिन्मद्वचनंसत्यंपिबामिपितृशासनात्॥ दूर्वारसंफेनयुतंनित्यंप्रातर्गुरोरहः॥३६॥ एतस्मि
न्नंतरेकालेवागुवाचाशरीरिणी ॥ निष्पापोयंसत्यतपःशिष्यस्तेभृगुनंदनः ॥३७॥ पृथुग्रीवेणमात्सर्या
त्कूटसाक्ष्यंततोदितम् ॥ रोमपादेनतन्मैत्र्यात्तथैवोक्तंमहामुने ॥ ३८ ॥ नविचार्यत्वयासम्यक्त्यक्त
वान्सकुतोबहिः ॥ तस्मात्त्वमपिविप्रर्षेकिंचिद्दुष्कृतवानभूः ॥ ३९ ॥ एतत्पापविशुध्यर्थंगच्छगोक
र्णमयवै ॥ तत्राश्रमपदंकृत्वातपश्चरमहामते ॥ ४० ॥ महादेवप्रसादेनतवदोषोविनश्यति ॥ रोम
पादस्यकंडोश्चपृथुग्रीवस्यवैतथा ॥ ४१ ॥ इत्युक्त्वाभूमानभोवाणीविररामचतत्रवै ॥ ततःशिष्यैःस
मंगत्वागोकर्णक्षेत्रमुत्तमम् ॥ ४२ ॥ उदीच्यांरुद्रयोन्यास्तुसार्धक्रोशेमुनीश्वर ॥ गोकर्णक्षेत्रसीमा

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

यांस्थित्वात्रह्यचरन्तपः ॥४३॥ एवंबहुदिनेतीतेशंकरःशिवयान्वितः ॥ आविर्बभूवपुरतोमुनीनांभावि
तात्मनाम् ॥ ४४ ॥ तैःपूजितःस्तुतःशंभुःस्वकपर्दाज्जहौतदा ॥ गंगांत्रैलोक्यजननींसर्वलोकमला
पहम् ॥ ४५ ॥ नदीभूत्वातुसादेवीसर्वलोकमनोहरा ॥ समुद्रंप्रविवेशाशुगंगात्रैलोक्यपाविनी ॥
॥ ४६ ॥ ततःप्रोवाचभगवान्शंकरोभक्तवत्सलः ॥ एषानदीपुण्यतमाशाल्मलीनामनामतः ॥४७॥
महापातकिनोयेचकूटशाल्मालिसंस्थिताः ॥ तेषांपुत्रायदिस्नायुःपितॄनुद्दिश्यभक्तितः ॥४८॥ सर्वपाप
विनिर्मुक्ताःप्राप्नुयुःपरमांगतिम् ॥ तस्माच्छाल्मूकिनींनाम्नावदिष्यंतिजनाभुवि ॥ ४९ ॥ गोकर्णक्षेत्र
सीमेयंभवेदेवंमुनीश्वराः ॥ अत्रस्नात्वातुमुनयोभवंतःसुसमाहिताः ॥ ५० ॥ गोकर्णक्षेत्रमासाद्यस्ना
नंतीर्थेषुसर्वशः ॥ इत्युक्त्वाभगवान्शंभुस्तत्रैवांतरधीयत ॥५१॥ ततोहंशिष्यसहितःस्नात्वानद्यांसमा
हितः ॥ गोकर्णस्थेषुतीर्थेषुस्नात्वास्वस्थानमाप्तवान् ॥५२॥ तस्मात्त्वंगच्छभद्रंतेगोकर्णक्षेत्रमुत्तमम् ॥
तत्रशाल्मूकिनीतीरेजन्होकृत्वाश्रमंशुभम् ॥५३॥स्नानंकुर्वन्तत्रनद्यांगंगामूर्तिंप्रपूजय ॥एवमुक्त्वासत्य

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तपाजन्हुःस्वैरगतिर्ययौ॥५४॥सूतउवाच॥पूर्वंगंगानदीयस्मात्कूटसाक्ष्यवनाशकृत॥तस्मात्कूटशाल्मलि
नामाभूत्सेयंपुण्यतमानदी॥५५॥त्रिषुलोकेषुराजेंद्रस्नातानांसर्वकामदा॥सूतउवाच॥जन्हुःसद्यतपेनो
क्तंवचःश्रुत्वासमाहितः॥गोकर्णक्षेत्रमासाद्यशाल्मल्याश्चतटेशुभे॥५६॥कृत्वाश्रमपदंपुण्यंगंगामूर्तिंनि
धायच ॥ स्नानंकुर्वन्तत्रमुदागंगांनित्यंप्रपूजयन् ॥ ५७ ॥ तुलासंस्थेदिनकरेकार्तिकेतुविशेषतः ॥
नृत्तगीतैश्चनैवेद्यैर्नमस्कारप्रदक्षिणैः॥५८॥स्तोत्रैरुपनिषद्भिश्चगंगानामसहस्रकैः ॥ एवंपूजयतस्तस्य
गंगातुष्टाबभूवह ॥ ५९ ॥ आश्वयुज्यसितेपक्षेह्यष्टम्यामरुणोदये ॥ आविर्बभूवशाल्मल्यांगंगान
द्यांशिवैषिणी ॥ ६० ॥ दिव्यांबरधरादेवीदिव्यस्रगनुलेपना ॥ सर्वाभरणदीप्तांगीमंदस्मितमुखांबु
जा ॥ ६१ ॥ मत्तमातंगगमनाईषत्कुंचितमूर्धजा ॥ जन्हुंप्राहमुदायुक्तावरंवरयसुव्रत ॥ ६२ ॥
भक्त्याचनियमेनाद्यतपसाचदमेनच ॥ तुष्टास्मिनितरांब्रह्मन्यत्तेमनसिवर्तते ॥ ६३ ॥ इत्युदीरि
तमाकर्ण्यगंगायावचनंमुनिः ॥ प्रणम्यदंडवद्भूम्यांकृतांजलिरभाषत ॥ ६४ ॥ जन्हुरुवाच ॥ वरंद

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

दासिचेन्नह्यंवराहोयदिचाप्यहम् ॥ कृतोमयापराधस्तेगंगेज्ञानाञ्चमोहतः ॥ ६५ ॥ भगीरथोक्ति
चापास्यमयापीतासिभामिनि ॥ तत्पापंनाशयशुभेत्वरमेतद्वृणोम्यहम् ॥ ६६ ॥ अस्मिन्कालेत्रयः
स्नात्वातवमूर्तिंसमर्चति ॥ भुक्तिमुक्तिंसलभतुप्रसन्नायदिमेशुभे ॥ ६७ ॥ ततोगंगामुदायुक्ताजन्हुं
प्राहवचस्तदा ॥ गंगोवाच ॥ मोहेनैवत्वयाजन्होपीताचाहंद्विजोत्तम ॥ महामायाभगवतीमोहय
त्यनिशंजनान् ॥६८॥ बलात्कारेणविप्रर्षेसाचेतोज्ञानिनामपि ॥ तस्मान्नास्तितत्रयिद्रोहोमत्प्रसादा
न्नसंशयः ॥ ६९ ॥ यद्यदिच्छसितत्सर्वंतुभ्यंदत्तंमहामुने ॥ आश्वयुज्यसितेपक्षेह्यष्टम्यामरुणोदये
॥ ७० ॥ नदीनदैःसर्वतीर्थैःसिद्धैःसुरगणैःसह ॥ आविर्भवाम्यत्रनद्यांसर्वपापहरान्नृणाम् ॥ ७१ ॥
तस्माद्गंगावलीनाम्नानदीख्याताभविष्यति ॥ तस्मिन्कालेत्रयःस्नात्वामन्मूर्तिंपूजयेन्मुने ॥ ७२ ॥
इहदत्वासर्वभोगान्तस्मैदास्यामिमत्पदम् ॥ तुलासंस्थेदिनकरेह्याश्विनेमासियोनरः ॥ ७३ ॥ स्ना
त्वारुणोदयेचात्रदेवर्षिपितृतर्पणम् ॥ कृत्वामत्पूजनंपश्चाद्गंधपुष्पाक्षतादिभिः ॥ ७४ ॥ धूपदीपैः ॥१४५॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

सनैवेद्यैस्तांबूलैर्नृत्तगायनैः ॥ शक्त्यादानानिकुर्वीतब्रह्मचर्यपरायणः ॥ ७५ ॥ ब्राह्मणान्भोजयि
त्वातुस्वयंभुंजीतवाग्यतः ॥ एवंमासंव्रतंकुर्वन्गंगाष्टम्यांविशेषतः ॥ ७६ ॥ एवंयःकुरुतेतत्रतस्यपु
ण्यफलंशृणु ॥ आजन्मचरितंपापंस्वल्पंवायदिवाबहु ॥ ७७ ॥ ब्रह्महत्यादिकंयच्चतत्सर्वंविलयंव्र
जेत् ॥ इहभुक्त्वासुविपुलान्भोगान्यभिमतान्वरान् ॥ ७८ ॥ पुत्रपौत्रैःसहमुनेअंतेमत्परमंपदम्
॥ व्रजत्येवनसंदेहोमत्प्रसादान्महामुने ॥ ७९ ॥ एवंदत्वावरंतस्मैजन्हवेभरतर्षभ ॥ तत्रैवांत
र्दधेमूर्तौगंगात्रिपथगामिनी ॥ ८० ॥ एवंप्राप्तवरोजन्हुर्गोकर्णेवांछितंफलम् ॥ स्नात्वातत्रत्य
तीर्थेषुसंपूज्यचमहेश्वरम् ॥ ८१ ॥ स्वमाश्रमंजगामाशुयथापूर्वमतिष्ठत ॥ ८२ ॥ इतिश्रीस्कांदे
गोकर्णमाहात्म्येशाल्मलीमहिमानुवर्णनंनामद्विपंचाशोऽध्यायः ॥ ५२ ॥ ॥ छ ॥ ॥
॥ शतानीकउवाच ॥ सर्वेषांचैवतीर्थानांलिंगानांसूतनंदन ॥ यात्राक्रमंविधानेनश्रोतुमिच्छाप्रवर्तते
॥ १ ॥ एतत्कथयमेसूतश्रद्दधानायविस्तरात् ॥ सूतउवाच ॥ शृणुतीर्थानिसर्वाणिगोकर्णेयानिकौरव

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

॥ तेषांस्नानक्रमंचैवनिबोधकुरुनंदन॥ २॥गोकर्णःसर्वतीर्थानांमध्येसंपरिवर्तते ॥ यस्याभितःसमस्तानि
तीर्थान्यायतनानिच ॥ ३ ॥ रुद्रोद्भवत्वाद्राजेंद्रश्रेष्ठंतत्तीर्थमुच्यते ॥ सआदिःसर्वतीर्थानांदेवानांच
महाबलः ॥४॥ तस्मादारभ्यतीर्थानिशृणुकौरवनंदन ॥ त्रिःप्रदक्षिणमावृत्यतीर्थंतल्लिंगमेवच ॥ ५॥
ततःस्नानंप्रकुर्वीतप्राङ्मुखःप्रयतःपुमान् ॥ दक्षिणाभिमुखोभूयःस्नात्वातत्रसमाचरेत् ॥ ६ ॥ पूर्वाशा
भिमुखोभूत्वानमस्कृत्वामहेश्वरम् ॥ यथाविधिकुरुश्रेष्ठतर्पयित्वापितामहान् ॥ ७ ॥ तल्लिंगंपूजयि
त्वातुप्रदक्षिणमथाचरेत् ॥ दानंचैवयथाशक्तिदातव्यंब्राह्मणायच ॥ ८ ॥ ततःशालेश्वरंपूज्यमहेश्वर
मतोव्रजेत् ॥ स्नानंकृत्वातुतत्तीर्थेततस्तल्लिंगमर्चयेत् ॥९॥ दानंदत्वायथाशक्तिमंत्ररत्नंसमुच्चरेत् ॥
ततस्तुताम्रगौर्यांतुस्नात्वातामर्चयेद्बुधः ॥ १० ॥ ततोगणपतिंपूज्यवेदेशानुक्रमतोयजेत् ॥ गाय
त्र्यादिषुतीर्थेषुस्नात्वातल्लिंगमर्चयेत् ॥ ११ ॥ ततोगच्छेत्राजेंद्रब्रह्मकुंडमनुत्तमम् ॥ तत्रस्नात्वार्च
येद्देवंशतशृंगनिवासिनम् ॥ १२ ॥ विश्वामित्र्यांततःस्नात्वातल्लिंगंपरिपूजयन् ॥ मणिभद्रंसमभ्यर्च्य

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

पितृस्थालींततोव्रजेत् ॥ १३ ॥ संगमेताम्रगौर्यास्तुसमुद्रस्यचसत्तम ॥ स्नानंकुर्वीतविधिवत्प्राणा
यामपरायणः ॥ १४ ॥ देवान्ऋषीन्पितृंश्चैवसंतर्प्यचयथाविधि ॥ अम्रेशंचार्चयित्वापापस्थालीश्व
रंयजेत् ॥ १५ ॥ तत्रसद्रसरमायस्थांयथाशक्त्यनुवर्तयेत् ॥ शक्त्याचदक्षिणांदत्वासगरेशंततोर्चये
त् ॥ १६ ॥ गौतमेशंतमभ्यर्च्यपूजयेच्चतुराननम् ॥ इंद्रेश्वरंसमभ्यर्च्यशक्त्यादेयाचदक्षिणा ॥
॥ १७ ॥ कुबेरतीर्थेस्नात्वातुतल्लिंगंपूजयेन्नरः ॥ सवणेशादिलिंगानिपूजयित्वायथाक्रमम् ॥ १८ ॥
संवर्त्तवाप्यांस्नात्वातुतल्लिंगंपूजयेदपि ॥ ततःपापविनाशिन्यांस्नात्वापुण्येश्वरंयजेत् ॥ १९ ॥ सूर्य
तीर्थेततःस्नात्वासूर्येशंपरिपूजयेत् ॥ मार्कंडेयह्रदेस्नात्वातल्लिंगंपूजयेन्नरः ॥ २० ॥ विघ्नेश्वरंततःपू
ज्यदुर्गाकुंडंततोव्रजेत् ॥ तत्रस्नात्वाततोदुर्गांनंदिनींपूजयेदपि ॥ २१ ॥ नागतीर्थेततःस्नात्वानागेश्व
रमथोर्चयेत् ॥ दत्तात्रेयस्यतीर्थेतुस्नात्वाभक्तिसमन्वितः ॥ २२ ॥ त्र्यंबकेशंसमभ्यर्च्यभूतनाथंसमर्च
येत् ॥ विश्वकर्मेश्वरंनत्वाएलापत्रंततोर्चयेत् ॥ २३ ॥ कपर्दनाशंसंपूज्यपूर्वंदिक्परिपालकम् ॥ त

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तउन्मज्जनेस्नात्वावैतरण्यांततःपरम् ॥ २४ ॥ दुर्गादेवींनमस्कृत्वाव्यासतीर्थेनिमज्जयेत् ॥ शुक्रकुं
डेततःस्नात्वाहिडिंबातीर्थमाव्रजेत् ॥ २५ ॥ नारायणाश्रमंप्राप्यदेवौहरिहरौयजेत् ॥ मंडपत्रितयं
राजन्पूजयित्वायथाक्रमम् ॥ २६ ॥ शक्त्याचदक्षिणांदत्वामंत्रमष्टाक्षरंजपेत् ॥ अशोकपंचकेस्ना
त्वाअशोकेशंसमर्चयेत् ॥ २७ ॥ वाल्मीकिराश्रमंगत्वास्नात्वापूज्यजगन्मयम् ॥ ततोघनाशिनींप्रा
प्यस्नात्वातत्रयथाविधि ॥ २८ ॥ स्थंडिलेदेवमभ्यर्च्यदशदानादिकंचरेत् ॥ कामेश्वरंततोगत्वास्ना
त्वापूज्यतमीश्वरम् ॥ २९ ॥ संपूज्यमोदकाद्यैस्तुचिंतामणिविनायकम् ॥ गंगाधारेततःस्नात्वासुमि
त्रेशंततोर्चयेत् ॥ ३० ॥ भीमकुंडेततःस्नात्वामृन्मयंलिंगमर्चयेत् ॥ वसिष्ठवाप्यांस्नात्वातुवासिष्ठे
शंसमर्चयेत् ॥ ३१ ॥ स्नात्वादूर्वाससस्तीर्थेशक्त्यादत्वाचदक्षिणाम् ॥ अगस्त्यतीर्थेस्नात्वातुवरदे
शंसमर्चयेत् ॥ ३२ ॥ मित्रावरुणयोस्तत्रदेवेशंपूजयेत्ततः ॥ स्नात्वागरुडतीर्थेतुगरुडंपरिपूज्यच
॥ ३३ ॥ जप्त्वागरुडगायत्रींततोकृष्णंसमर्चयेत् ॥ नरसिंहंसमभ्यर्च्यकालभैरवसंयुतम् ॥३४॥ क्षे

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

त्रपालंसमभ्यर्च्यवटकाद्यैःसमाहितः ॥ हनुमदीश्वरंपूज्यशक्त्यादेयाचदक्षिणा ॥ ३५ ॥ ततोगोग
र्भमासाद्यपूजयित्वामहेश्वरम् ॥ प्रविश्यपश्चिमद्वारेपूर्वद्वाराद्विनिर्गमेत् ॥ ३६ ॥ मंत्ररत्नंजपन्तत्रपू
जयित्वापुनर्नृप ॥ ब्रह्मकुंडेपूजयित्वाह्यात्मनिप्रोक्षयेज्जलम् ॥ ३७ ॥ ग्रहाश्रमेततःस्नात्वाजमद
ग्नेर्भृगोस्तथा ॥ पुलस्त्यस्यतथात्रेश्चतथाचांगिरसोमुनेः ॥ ३८ ॥ भरद्वाजस्यतीर्थेतुनारदस्यक्रतोस्त
था ॥ विश्वावसोस्तुंबुरोश्चापितृसेनस्यपार्थिव ॥३९॥ तथैवाप्सरसांतीर्थेस्नात्वाभक्तिसमन्वितः ॥ उ
मान्हदेतुसंस्नात्वायथाविभवविस्तरम् ॥ ४० ॥ उमामहेश्वरंपूज्यशक्त्यादत्वाचदक्षिणाम् ॥ कुंडि
कांचततःपूज्यमंत्रंपंचाक्षरंजपेत् ॥ ४१ ॥ छायापादपमाश्रित्यपूजयेत्तत्रशंकरम् ॥ ततस्तुमालि
नीतीर्थेस्नात्वाभक्तिसमन्वितः ॥ ४२ ॥ तृणबिंदोःकाश्यपस्यतीर्थेस्नात्वासमाहितः ॥ शिशुमारंत
तोगत्वातत्रस्नात्वायथाक्रमम् ॥ ४३ ॥ शिलालिंगंपूजयित्वाशक्त्यादत्वाचदक्षिणाम् ॥ एकबिंद्वा
दितीर्थेषुक्रमात्स्नायाद्यथाविधि ॥ ४४ ॥ स्नात्वाभीमगदातीर्थेऔर्वतीर्थेततःपरम् ॥ सोमतीर्थेनरः

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

स्नात्वासूर्यतीर्थेनिमज्यच ॥ ४५ ॥ ततःस्नात्वानंततीर्थेतस्मागस्तिंसंपूजयेत् ॥ स्नात्वातुवारुणेतीर्थे
तीर्थेपांडवसंश्रिते ॥ ४६ ॥ रामतीर्थंततोगत्वास्नात्वाचैवयथाक्रमम् ॥ हनूमल्लक्ष्मणायुतंसीतारामं
ततोर्चयेत् ॥४७॥ मंत्रमष्टाक्षरंजप्त्वाशक्त्यादत्वाचदक्षिणाम् ॥ ततःसमुद्रेस्नात्वातुपूजयेच्चमहाबल
म् ॥ दक्षयात्राक्रमोराजन्प्रोक्तःसंक्षेपतोमया ॥ ४८ ॥ इतिश्रीस्कांदेगोकर्णमाहात्म्येदक्षिणयात्रा
क्रमोनामत्रिपंचाशोऽध्यायः ॥ ५३ ॥ छ ॥ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥
॥ सूतउवाच ॥ आदौस्नात्वाकोटितीर्थेपूजयित्वामहाबलम् ॥ ततोविनायकंगत्वास्केतकीवनवासिनम्
॥ १ ॥ तीर्थेवैनायकेस्नात्वागणानांत्वेतिमंत्रतः ॥ रक्तगंधैरक्तपुष्पैर्गणनाथंततोयजेत् ॥ २ ॥ स्नात्वा
तुशुद्धमनसातीर्थेकेतकिसंश्रिते ॥ गिरिंताम्रतलंप्राप्यआलोकेत्पश्चिमामुखः ॥३॥ स्थित्वातस्यतलेरा
जन्प्रणम्यचमहेश्वरम् ॥ अष्टाक्षरंजपेन्मंत्रंसऋषिच्छंददैवतम् ॥ ४ ॥ उच्चैःशब्दंप्रकुर्वीतहारिरित्यथ
वाहरः ॥ तच्छ्रुत्वाकाशगादेवीह्यभिशिक्ष्यत्यसंशयः ॥५॥ तदधस्तात्तुराजेंद्रताम्रगौर्यासमुद्भवः ॥ तत्र ॥१४८॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

स्नानंविधायैववन्हिकुंडेनिमज्जयेत् ॥ ६ ॥ कलंकलेश्वरंपूज्यरुद्रपादंसमर्चयेत् ॥ अरण्यतीर्थेस्नात्वातु
स्नायात्कापिलसंज्ञिके ॥७॥ चक्रतीर्थेनिमज्ज्यैवचक्रखंडेश्वरंयजेत् ॥ हर्यश्वतीर्थेस्नात्वैवश्रद्धयानन्य
मानसः ॥ ८ ॥ अघमर्षस्यसुपुत्रस्यतीर्थेषुस्नानमाचरेत् ॥ क्षमादिधर्मपुत्राणांस्नायात्तीर्थेषुसर्वतः ॥ ९ ॥
शालूकिनींसमासाद्यतत्रस्नात्वाविधानतः ॥ देवान्ऋषीन्पितॄंश्चैवसंतर्प्यविधिपूर्वकम् ॥ १० ॥ गंगादे
वींसमभ्यर्च्यदद्यादानादिकंचरेत् ॥ मेरोराश्रममासाद्यतत्तीर्थेस्नानमाचरेत् ॥ ११ ॥ स्नात्वायुगानांतीर्थेषु
दिक्तीर्थेस्नानमाचरेत् ॥ गालवस्यकहोलस्यकनकस्यकषस्यच ॥ १२ ॥ रोमशस्यांबरीषस्यतीर्थेषुस्ना
नमाचरेत् ॥ नलस्यनहुषस्यापिनाभागस्यातिथेस्तथा ॥ १३ ॥ इक्ष्वाकोश्चययातेश्चबाणतीर्थेवगाहयेत्
सिद्धाश्रमंसमासाद्यतत्रस्नात्वाविधानतः ॥ १४ ॥ सिद्धेश्वरंसमभ्यर्च्यदत्वावित्तानुसारतः ॥ पंचाक्षरंज
पेन्मंत्रंशिवध्यानपरायणः ॥ १५ ॥ व्यासाश्रमंसमासाद्यपूजयित्वाविधानतः ॥ महाकाल्याश्रमंगत्वा
तत्तीर्थेपरिपूज्यच ॥ १६ ॥ महाकालींततोगत्वातांनत्वाभ्यर्चयेत्सुधीः ॥ सुनादस्याश्रमंप्राप्यस्नात्वाती

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

येंतुतस्यवै ॥ १७ ॥ नादेश्वरंसमभ्यर्च्यअधोभूमेरवस्थितम् ॥ ततःतमुद्रेस्नात्वातुदशदानादिकंचरे
त् ॥१८॥ महाबलंपूजयित्वारुद्रमंत्रादिनानृप ॥ स्नातोतीर्थेंषुसर्वेंषुयथाविभवमादरात् ॥१९॥ सं
वत्सरंवसेत्तत्रनियतोनियताशनः ॥ मौनव्रतपरोनित्यंब्रह्मचारीजितेंद्रियः ॥ २० ॥ अनेनैवशरीरे
णमुक्तोसौनात्रसंशयः ॥ तत्रसिद्धिमवाप्नोतिमासमुष्ययथाविधि ॥ २१ ॥ सर्वबंधविनिर्मुक्तोदि
व्यज्ञानसमन्वितः ॥ दिव्यचक्षुर्दिव्यदेहोरुद्रलोकंसगच्छति ॥ २२ ॥ सएवविष्णुर्ब्रह्माचसरुद्रोना
त्रसंशयः ॥ एतेषुसर्वतीर्थेंषुअशक्तःस्नानकर्मणि ॥ २३ ॥ त्रयस्त्रिंशत्स्वाश्रमेषुस्नानंकुर्याद्यथावि
धि ॥ मार्कंडेयाश्रमंपुण्यंकुमाराश्रममेवच ॥ २४ ॥ संवर्त्तकाश्रमंपुण्यंवैनायकमतःपरम् ॥ सन
त्कुमारंसौमित्रंब्राह्ममांगिरसंतथा ॥ २५ ॥ मैत्रावरुणमाग्नेयंयाम्यमागस्त्यभार्गवम् ॥ आत्रेयंचतथा
शोकंविश्वामित्रस्यचाश्रमम् ॥ २६ ॥ नागाश्रमंचौशनसंसप्तर्षीणांतथाश्रमम् ॥ बिंदाश्रमंचसा
वित्रमानंतंसौम्यमेवच ॥ २७ ॥ गायत्र्याश्चसरस्वत्याऐंद्रंकौबेरमेवच ॥ धर्माश्रमंमहालंबंरौद्रंपितृव

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

मंतथा ॥ २८ ॥ विश्वेदेवाश्रमंपुण्यंवैष्णवंचनृपोत्तम ॥ एतेष्वाश्रममुख्येषुसर्वतीर्थफलंलभेत् ॥
॥ २९ ॥ त्रयस्त्रिंशातिलिंगानिशृणुवक्ष्यामिपार्थिव ॥ ब्रह्मेश्वरंचकामिशंसांवर्त्तचकलंकलम् ॥३०॥
सनत्कुमारंकौमारंवारुणंसूर्यनायकम् ॥ मार्कंडेयंधर्मशिवंशास्त्रंवेदेश्वरंतथा ॥ ३१ ॥ रसलिंगंनागलिं
गंसावित्रंकौशिकंतथा ॥ भारद्वाजंतथाभौमंसौमित्रंचगणेश्वरम् ॥ ३२ ॥ अगस्त्यंनारदीयंचसौपर्णं
चविहायसम् ॥ माहेंद्रंमधुपर्कंचनारायणमतःपरम् ॥ ३३ ॥ नादेश्वरंचकौबेरंसार्वभौमोमहाबलः
त्रयस्त्रिंशत्प्रधानानिलिंगानिनृपसत्तम ॥ ३४ ॥ तत्राप्यशक्तोयादिचतस्यवक्ष्येनृपोत्तम ॥ गोकर्णशत
शृंगश्चताम्रगौरीचनिम्नगा ॥ ३५ ॥ तीर्थराजःसमुद्रश्चपुण्यमेतद्धिपंचकम् ॥ एतेषुस्नानमात्रेणस
र्वयात्राफलंलभेत् ॥ ३६ ॥ प्रायोपवेशनंकृत्वायोम्रियेतत्तत्रकौरव ॥ समुद्रलोकमासाद्यरुद्रैकत्वमवा
प्नुयात् ॥ ३७ ॥ कर्मक्षयेहिभवतिबुद्धिस्तत्क्षेत्रसेवने ॥ पापिष्ठास्तंनजानंतिगत्वानार्चंतिशंकरम् ॥
॥ ३८ ॥ तत्रस्थोयोमहादेवमर्चयेद्वृषभध्वजम् ॥ सोपिदेवत्वमाप्नोतिपापिष्ठोपिनसंशयः ॥ ३९ ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

विष्णुंवात्रिदशश्रेष्ठंसुरासुरनमस्कृतम् ॥ व्रतोपवासैर्विविधैःसोपिमुक्तोभविष्यति ॥ ४० ॥ स्नाप
यित्वाशिवंतत्रविष्णुंवाविधिपूर्वकम् ॥ अभ्यर्च्यमुक्तिमाप्नोतिगोकर्णेसकृदप्युत ॥ ४१ ॥ तस्मात्पु
ण्यतमंनास्तित्रिषुलोकेषुकौरव ॥ रहस्यमेतद्देवानांऋषीणांभावितात्मनाम् ॥ ४२ ॥ नाकपृष्ठोपिन
तथागोकर्णस्यनसंशयः ॥ देवानांसिद्धिदंराजन्नृषीणामपिसत्तम ॥ ४३ ॥ तत्क्षेत्रादभितोराजन्स
दातिष्ठंतिपापिनः ॥ तेहिधर्मविधानार्थंनररूपेणराक्षसाः ॥ ४४ ॥ नास्तिकाभिन्नमर्यादानिर्भयास्ते
बहिःस्थिताः ॥ युगंपश्चिममासाद्यनात्रदृश्यंतिदेवताः ॥ ४५ ॥ ऋषयश्चमहाभागाअदृश्याःपापकर्म
भिः ॥ बिलेविशालेकेचित्तुवियतिस्थाश्चकेचन ॥ ४६ ॥ सर्वभूतैरदृश्यास्तेकेचित्तत्रैवसंस्थिताः ॥
तपस्यंतश्चनियताःसिद्धिकामाःसुरासुराः ॥ ४७ ॥ सूतउवाच ॥ इतिबहुविधतीर्थेष्वाप्लुतानांनराणा
मिहकृतदुरितानांकोटयोनाशमेति ॥ दिविमुनिसुरवृंदैरर्चिताह्यप्सरोभिःसकलसुखरसाब्धिंप्राप्यमो
दंत्यजस्रम् ॥ ४८ ॥ इतिश्रीस्कांदेगोकर्णपुराणेयात्राक्रमोनामचतुःपंचाशोऽध्यायः ॥ ५४ ॥

॥१५०॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

सूतउवाच ॥ श्रुत्वाख्यानामिदंपुण्यंगोकर्णक्षेत्रवैभवम् ॥ देवर्षेरग्निपुत्रस्यसंवादंपुण्यवर्धनम् ॥ १ ॥
तिर्यग्योनिगतौचापिनिर्वाणपदमापतुः ॥ नकुलीभषकश्चैवयोगिनामपिदुर्लभम् ॥ २ ॥ शौनकउ
वाच ॥ नकुलीभषकश्चैवकथंदुर्योनिमापथुः ॥ कौतौपुरातनभवेकृतवंतौचकिंपुरा ॥ ३ ॥ सूतउ
वाच ॥ वैवस्वतमनोःकालेद्वापरेमुनिपुंगव ॥ मथुरायांद्विजवरोत्यात्रिगोत्रसमुद्भवः ॥ ४ ॥ आलिजं
घइतिख्यातोत्यास्तेवेदविवर्जितः ॥ पानासक्तोद्यूतकारीपरस्त्रीगमनेरतः ॥ ५ ॥ वेदब्राह्मणविद्वेषीपि
तृभक्तिविवर्जितः ॥ स्वकर्मणःपरित्यागीनित्यंदुर्जनसंगतः ॥ ६ ॥ तस्यासीज्जारिणीजायास्वधर्मप
रिवर्जिता ॥ नाम्नाचानंगलेखासापतिभक्तिविवर्जिता ॥ ७ ॥ स्वजनैःकलहानित्यंचौर्यवृत्तिरतास
दा ॥ एवमब्देषुगच्छत्सुकेषुचिद्द्विजदंपती ॥ ८ ॥ पूर्वकर्मवशादेवजग्मतुःक्षेत्रमुत्तमम् ॥ मुदायुक्तोनृ
पवरश्रीरंगंनामपुण्यदम् ॥९॥ तुलासंस्थेदिनकरेकार्तिकेमासिपुण्यदे ॥ बहवस्तत्रचाजग्मुर्यात्रार्थं
कुरुपुंगव ॥ १० ॥ यात्राव्याजेनतौचापितैःसाकंनृपसत्तम ॥ तत्रस्नात्वाचकावेर्यांउषःकालेस

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

माहितौ ॥ ११ ॥ तत्रस्थित्वामासमेकंछद्मनाधनकांक्षया ॥ रंगनाथंचसंपूज्यश्रुत्वाहरिकथांनिशि
॥ १२ ॥ मासांतेदेवताद्रव्यंमुषित्वाप्रययौद्विजः ॥ पत्न्यासहैवशनकैर्मार्गमध्यंगतोद्विजे ॥१३॥ चौ
र्यमार्गायितुंजग्मूरंगक्षेत्राद्दतंभटाः ॥ ददृशुर्मार्गमध्येतंसदेवद्रव्यकंद्विजम् ॥१४॥ बध्वाराजांतिकंनि
न्युर्दूतास्तेवैद्विजाधमम् ॥ दृष्ट्वातौदंपतीराजातयोःशिक्षामकारयत् ॥ १५ ॥ ततस्तेनैवदुःखेनपीडि
तौद्विजदंपती ॥ ततोयमभटाबध्वानिन्युर्वैवस्वतंपुरम् ॥१६॥ यमस्तयोर्विचार्याथकृतंकर्मशुभाशुभ
म् ॥ दूतानाज्ञापयामासपात्येतांनरकेत्विमौ ॥१७॥ ततोयमाज्ञयादूताःक्षेपुस्तेनरकादिषु ॥ ततःकर्मा
वशेषेणभुवंसंप्राप्यदंपती ॥ १८ ॥ स्थावरादिषुसंजातावसंख्यातासुयोनिषु ॥ क्रिमिकीटमृगव्याल
पतंगादिषुवैक्रमात् ॥ १९ ॥ पश्चात्सानंगलेखातुबभुवनकुलीनृप ॥ अलिजंघश्चभषकःसंजातःपु
ण्यलेशतः ॥ २० ॥ गोकर्णेनृपशार्दूलव्याजेनोर्जव्रतादिकात् ॥ जातिस्मरत्वंसंप्राप्यगोकर्णेसुचि
रंस्थितौ ॥ २१ ॥ ततःकर्मवशादेवसंवर्त्तस्याश्रमेशुभे ॥ गोकर्णक्षेत्रमाहात्म्यंनारदेनप्रकीर्त्तितम् ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

॥ २२ संवर्त्तकायशर्जेंद्रसर्वैताभ्यांश्रुतंत्थभूत् ॥ ततोविंयोनिजादुःखाद्विमुक्तौतौबभूवतुः ॥ २३ ॥
देवलोकात्तदादूताःपाकशासनशासनात् ॥ दिव्यंविमानमादायतयोर्निकटमाययुः ॥ २४ ॥ ताभ्यांद
त्वादिव्यदेहंविमानेस्थाप्यतौनृप ॥ गोकर्णान्निर्ययुःशीघ्रंत्रिदिवंप्राप्यपार्थिव ॥ २५ ॥ देवैःसाकंदे
वपुरेभुक्त्वाभोगाननेकशः ॥ उषित्वासुचिरंकालंपत्न्यासाकंद्विजोत्तमः ॥ २६ ॥ ततःसुकृतशेषेण
पुनर्भूलोकमागतः ॥ अंगदेशाधिपःसोभूत्कनकांगदनामवान् ॥ २७ ॥ तत्पत्नीचापिसंजातागौरा
ष्ट्राधिपतेःसुता ॥ नाम्नाकलावतीराजन्तमेवकनकांगदम् ॥ २८ ॥ पतिमापसुचार्वंगीमुदापरम
यायुता ॥ कनकांगदस्तुभूपालःप्राप्यपत्नींकलावतीम् ॥ २९ ॥ राज्यंचकारसुचिरंप्रजाधर्मेणपाल
यन् ॥ पुत्रानुत्पादयामासकलावत्यांकुरूद्वह ॥ ३० ॥ त्रीन्देवसदृशान्राजासुमुदेसुतरांतदा ॥ कृत्वा
विवाहंसर्वेषांदत्वाराज्यंस्वकंनृपः ॥ ३१ ॥ अश्वमेधादिकान्यज्ञान्दक्षिणासहितान्बहून् ॥ कृत्वाव्र
तानिसर्वाणिदत्वादानानिसर्वशः ॥३२॥ भुक्त्वाभोगान्यथाकामंपुत्रपौत्रादिभिर्युतः ॥ पत्न्यासहत

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तोराजाविरक्तःसर्ववस्तुषु ॥ ३३ ॥ तीर्थयात्राप्रसंगेनप्रययौभार्ययासह ॥ स्नात्वातीर्थेषुसर्वेषुगंगादि
षुमहीपतिः ॥३४॥ ततोगोकर्णमासाद्यभार्ययासहितोनृप ॥ तत्रास्थितेषुतीर्थेषुस्नात्वाराजायथाक्रम
म् ॥३५॥ महाबलंपूजयंश्चतत्रास्थित्वाचरत्तपः ॥ सुचिरंनृपशार्दूलअंतेनिर्वाणमाप्तवान् ॥३६॥ सूतउ
वाच ॥ इत्थंवोनृपशार्दूलसर्वपापप्रणाशनम् ॥ गोकर्णक्षेत्रमाहात्म्यंकथितंसर्वकामदम् ॥३७॥ यइ
दंक्षेत्रमाहात्म्यंशृणोतिपठतेनृप ॥ एकवारंचापिनरोतस्यपुण्यफलंशुभम् ॥३८॥ वक्तुंवर्षशतंनालंसर्व
तीर्थफलप्रदम् ॥ सर्वव्रतेषुयत्पुण्यंसर्वदानेषुयत्फलम् ॥ ३९ ॥ सर्वयज्ञेषुयत्पुण्यंतत्फलंलभतेनरः ॥
गोकर्णक्षेत्रमाहात्म्यंलिखित्वापुस्तकेर्पयेत् ॥ ४० ॥ भूतवेतालकूष्मांडशाकिनीडाकिनीगणाः ॥
दुष्टग्रहाश्चनश्यंतियक्षराक्षसपन्नगाः ॥४१॥ कुक्षिरोगंचत्द्द्रोगंशूलापस्मारकादयः ॥ एकाहिकद्व्या
हिकादिचातुर्थिकमथज्वराः ॥ ४२ ॥ क्षिप्रंनश्यंतितद्देहेइतिबाधाविनश्यति ॥ राजानोवश्यतांयांति
शत्रवोयांतिमित्रताम् ॥ ४३ ॥ राज्यकामोलभेद्राज्यंधनकामोलभेद्धनम् ॥ विद्याकामोलभेद्विद्यां

॥१५२॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

स्त्रीकामःस्त्रीमवाप्नुयात् ॥ ४४ ॥ पुत्रकामोलभेत्पुत्रंकीर्तिमंतंबहुश्रुतम् ॥ बद्धोबंधाद्विमुच्येतव्या
लव्याघ्रभयंनहि ॥ ४५ ॥ ब्रह्मघ्नश्चपशुघ्नश्चभ्रूणहागुरुतल्पगः ॥ मुच्यतेसर्वपापेभ्योकृतघ्नश्चापिशौ
नक ॥४६॥ नारीवाशृणुयाद्भक्त्यापूजयित्वाचपुस्तकम् ॥ भर्तृप्रियत्वंलभतेनवैधव्यंकदाचन ॥४७॥
सौभाग्यलाभंलभतेपुत्रलाभंचाविंदति ॥ भूमिप्रदक्षिणेनैवयत्पुण्यंलभतेनरः ॥ ४८ ॥ तत्फलंकोटि
गुणितंसकृच्छ्रवणमात्रतः ॥ निर्जलेमरुभूम्यांतुकोटिकूपकृतंफलम् ॥ ४९ ॥ दुर्भिक्षेचप्रतिदिनंब्रा
ह्मणानांसुभोजनम् ॥ श्रद्धयापरयादद्यात्सहस्रपरिवत्सरम् ॥ ५० ॥ तत्फलंसमवाप्नोतिब्रह्मज्ञानं
चविंदति ॥ यंयंकामयतेकामंतंतमाप्नोतिनिश्चितम् ॥ ५१ ॥ इदंरहस्यमत्यंतंनाभक्तायवदेत्क्वचित्
॥ सत्यंसत्यंपुनःसत्यमुद्धृत्यभुजमुच्यते ॥ ५२ ॥ गोकर्णक्षेत्रनिलयोद्विभुजोवरदःसताम् ॥ पातुवः
सकलान्कामान्दत्वासिद्धिविनायकः ॥ ५३ ॥ चिंतामणिःप्रणमतांनिशामणिशिरोमणिः ॥ कपा
लीलोकपालीवःपातुनित्यंमहाबलः ॥५४॥ इतिश्रीस्कांदेगोकर्णमाहात्म्येपंचपंचाशोऽध्यायः ॥५५॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

॥ इतिश्रीस्कंदपुराणांतर्गतगोकर्णमाहात्म्यंसमाप्तम् ॥

इदं पुस्तकं मुंबय्यां भारतीनामक मुद्रणयंत्रालये मुद्रितम्

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

॥ इति श्रीगोकर्णमहात्म्यं समाप्तम् ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri